KASHMIR SERIES OF TEXTS AND STUDIES.
No. XLVII.

THE

TANTRĀLOKA

OF

ABHINAVA-GUPTA.

WITH COMMENTARY

BY

RĀJĀNAKA JAYARATHA.


EDITED BY

PANDIT MADHUSUDAN KAUL SHĀSTRĪ, M.A., M.O.L.,
VIDYĀVĀRIDHI, SUPERINTENDENT, RESEARCH
DEPARTMENT, JAMMU AND KASHMIR
STATE, SRINAGAR.

PUBLISHED UNDER THE AUTHORITY OF THE
GOVERNMENT OF HIS HIGHNESS MAHĀRĀJĀ
SIR HARISINGH BAHĀDUR,
K. C. I. E., K. C. V. O.,
MAHĀRĀJĀ OF JAMMU AND KASHMIR STATE.

Volume VIII.

Ahnikas 13th and 14th.



BOMBAY:
PRINTED AT THE "TATTVA-VIVECHAKA" PRESS.
1926.

श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरवत्सर्ववन्द्यत्वमाप ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४७

श्रीतन्त्रालोकः ।

श्रीमन्महामाहेश्वराचार्यवर्य-
श्रीमदभिनवगुप्ताचार्यविरचितः ।
श्रीमन्महामाहेश्वराचार्य-
श्रीजयरथकृतविवेकाभिख्यटीकोपेतः ।

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-
श्रीप्रतापसिंहवर-प्रतिष्ठापिते
प्रत्नविद्याप्रकाश (रिसर्च) **कार्यालये**
तदध्यक्ष-पण्डित-मधुसूदन-कौल-शास्त्रिणा
उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन संगृह्य,
संशोधनादिसंस्करणोत्तरं
पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य
मुम्बय्यां
' तत्त्वविवेचक ' मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतः ।
(अष्टमो भागः)



संवत् १९८३. **काश्मीर-श्रीनगर** खैस्ताब्दः १९२६.
(अस्य ग्रन्थस्य सर्वे प्रकाशन-मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः
स्वायत्तीकृताः सन्ति)

(All rights reserved.)

Printed by Yeshwant Kashinath Padwal, at the Tattva Vivechaka Press, Parel Road, Byculla, BOMBAY.

Published by Pandit Madhusudan Kaul Shastri, M. A., M. O. L., **for the Research Department, Jammu and Kashmir State, SRINAGAR.**

अथ

श्रीतन्त्रालोके

श्रीमन्महामाहेश्वराचार्याभिनवगुप्तविरचिते

श्रीजयरथकृतविवेकाख्यटीकोपेते

त्रयोदशमाह्निकम् ।

जयवर्धनः सुखाङ्कि
वर्धयतात्पूर्णचन्द्रविशदगतिः ।
आप्याययति जगद्यः
स्वशक्तिपातामृतासारैः ॥

इह

'संविदि फलभेदोऽत्र न प्रकल्प्यो मनीषिभिः।'(मा०वि० २।२९)

इत्याद्युक्त्या यद्याणवादीनामनुत्तरपदावाप्तिरेव फलं तदेक एवोपाय उपदिश्यतां किमेभिस्त्रिभिरित्याशङ्कां निराचिकीर्षुरधिकारभेदमुपदिष्टं द्वितीयार्धेन शक्तिपातक्रमविवेकमभिधातुं प्रतिजानीते

अथाधिकृतिभाजनं
क इह वा कथं वेत्यलं

विवेचयितुमुच्यते
विविधशक्तिपातक्रमः ॥ १ ॥

इहेति, आणवादावुपायत्रये ॥ १ ॥

नन्वन्यैरुक्तः शक्तिपातविवेक इति किमिहापि तेन स्यात्, बाढं किंतु तदेवानूद्य दूषयित्वा स्वसिद्धान्तः करिष्यत इत्याह

तत्र केचिदिह प्राहुः
शक्तिपात इमं विधिम् ।
तं प्रदर्श्य निराकृत्य
स्वमतं दर्शयिष्यते ॥ २ ॥

इमं विधिमिति, उपक्रान्तं शक्तिपातविवेकप्रकारमित्यर्थः ॥ २ ॥

नन्विह प्रकृतिपुरुषविवेकज्ञानान्मुक्तिस्तस्य च वैराग्यादि निमित्तमिति किमदृष्टस्य शक्तिपातस्य परिकल्पनेनेत्याशङ्कां गर्भीकृत्य सांख्यात्तावदाधिक्यं प्रतिपादयति

तत्रेदं दृश्यमानं स-
त्सुखदुःखविमोहभाक् ।

---

१ ग० पु० कृतेति पाठः ।

विषमं सत्तथाभूतं
समं हेतुं प्रकल्पयेत् ॥ ३ ॥
सोऽव्यक्तं तच्च सत्त्वादि-
नानारूपमचेतनम् ।
घटादिवत्कार्यमिति
हेतुरेकोऽस्य सा निशा ॥४॥

तत्रेति परकीयशक्तिपातविवेकानुवादतन्नि-राकरणस्वमतप्रदर्शनेषु कर्तव्येषु शक्तिपात-क्रमोपपादनपरतयेदमुच्यते इत्यर्थः। इदमिति महदादिक्षित्यन्तं, सुखदुःखमोहभात्त्वादेव वि-षमं परस्पराङ्गाङ्गिभावावस्थितसत्त्वादिगुणरूप-मित्यर्थः । तथाभूतमिति सुखदुःखमोहस्वभा-वम् । सममिति अनङ्गाङ्गिभावावस्थितगुणमि-त्यर्थः । अत एव 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः' इत्युक्तम् । स इति हेतुः । नन्वस्तु सांख्यमतमेतद्वैषम्यं साम्यविश्रान्तमिति; साम्यं च नित्यमेकमकारणपूर्वकं तत ऊर्ध्वं तु तद्धेतु-भूतं तत्त्वान्तरं न संभवेदिति किं नाम तत आधिक्यमित्याशङ्क्याह तच्चेत्यादि । अयं चात्र

प्रयोगः—अव्यक्तं कार्यमाचैतन्ये सत्यनेकत्वात् यदाचैतन्ये सत्यनेकं तत्सर्वं कार्यं यथा घटः, यन्न कार्यं तदाचैतन्ये सत्यनेकं न भवति यथात्मा, आचैतन्ये सत्यनेकं चाव्यक्तं तस्मात्कार्यमिति । उक्तं च प्राक्

'अचेतनमनेकात्म सर्वं कार्यं यथा घटः ।
प्रधानं च तथा तस्मात्कार्यं नात्मा तु चेतनः ॥'(९।१५६)

इति । कार्यत्वाच्चाव्यक्तस्य किं कारणमित्युक्तं हेतुरेकोऽस्य सा निशेति ॥ ४ ॥

नन्वेवमस्माकमिव प्रकृतिर्मायैव भवतां विश्वकारणमस्तु किं तदधिष्ठात्रेश्वरेणापि,—इत्याशङ्क्याह

सा जडा कार्यताद्रूप्या-
त्कार्यं चास्यां सदेव[1] हि ।
कलादिधरणीप्रान्तं
जाड्यात्सा सूतयेऽक्षमा ॥५॥
तेनेशः क्षोभयेदेनां
क्षोभोऽस्याः सूतियोग्यता ।

१ ग० मु० सदैवेति पाठः ।

ननु कार्यजाड्याद्यपि मायाया अपि जाड्यं तत्कुम्भकारस्यापि कुम्भवत् तत्प्रसजेदित्याशङ्क्याह 'कलादिधरणीप्रान्तं कार्यं चास्यां सदेव हि' इति। नियतिदशायां हि यदेव यस्य केनचिद्रूपेणानुयायि भासते तदेव तस्य मृदिव घटस्य मुख्यं कारणं तत्रैव चास्य सत्त्वमिति भावः। तेनेति सूत्यक्षमत्वेन हेतुना। एवं च प्रकृतिपुरुषादिविवेकज्ञानादेव मुक्तिर्न स्यादित्यावेदितम्। नहि ईश्वरशक्तिपातमन्तरेण तद्विवेकज्ञानमेवोदियादिति तन्निमित्ताया मुक्तेरपि कोऽवसरः। एतच्च प्रागेवोपपादितं नेह पुनरायस्तम्॥

ननु चेश्वरक्षोभितेयं किं नाम सुवीतेत्याशङ्क्याह

पुंसः प्रति च सा भोग्यं
सूतेऽनादीन् पृथग्विधान्॥ ६॥

भोग्यमिति कलादिक्षित्यन्तम्। एवंप्रसवश्चास्या न स्वार्थं जाड्यात्, नापीश्वरार्थं तस्य शुद्धबोधैकरूपत्वात् तत् किं प्रतीत्याशङ्क्योक्तम्—अनादीन् पृथग्विधान् पुंसः प्रतीति॥

ननु यद्येवं तत् पुंस्त्वाविशेषान्मुक्ताणून् प्रत्यपि किं न तत्सुवीतेत्याह

पुंसश्च निर्विशेषत्वे
मुक्ताणून् प्रति किं न तत् ।

अथोच्यते तत्कर्मसंस्कारसहचारितयास्या एवं सूतियोग्यत्वं, मुक्ताणुषु च कर्मसंस्कार एव नास्तीति कथं तान् प्रत्येवं स्यादिति तत्तेषां कर्मसंस्काराभावः कुतस्त्य इत्याह

निमित्तं कर्मसंस्कारः
स च तेषु न विद्यते ॥ ७ ॥
इति चेत्कर्मसंस्कारा-
भावस्तेषां कुतः किल ।

कुत इति न कुतश्चिदित्यर्थः ॥

यतो न तावद्भोगात्कर्मक्षयः, द्विधा हि भोगः संभाव्यते क्रमेणाक्रमेण वा । तत्र क्रमेण भोगे कर्मान्तरप्रसङ्गो दुर्निवार इति कदाचिदपि नास्य क्षयः स्यात्, अक्रमेण पुनरेषां

---

१ क० ख० पु० सद्भाव इति पाठः ।

भोग एव न भवेत्, एवं हि कर्मणा क्रमफल-दानात्मा स्वभाव एव त्यक्तो भवेत्। न चैतत्, इत्युभयथापि न कर्मक्षयः सिद्ध्येत्। तदाह

न भोगादन्यकर्मांश-
प्रसङ्गो हि दुरत्ययः॥ ८॥
युगपत्कर्मणां भोगो
नच युक्तः क्रमेण हि।
फलेद्यत्कर्म तत्कस्मा-
त्स्वं रूपं संत्यजेत्क्वचित्॥ ९॥
ज्ञानात्कर्मक्षयश्चेत्त-
त्कुत ईश्वरचोदितात्।
धर्माद्यदि कुतः सोऽपि
कर्मतश्चेत्तदुच्यताम्॥ १०॥

अथ

'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन।' (गी० ४।३७)

इत्याद्युक्त्या यदि ज्ञानात्कर्मक्षय इष्यते तज्ज्ञानेऽपि किं निमित्तमित्युक्तं तत्कुत इति। तस्य हि षट्षोडशपदार्थपरिशीलनाद्यनेकप्रकारमन्यैर्निमित्तमुक्तं तत् कतरत् तावत्तदेकनिय-

तमिति न जानीमः । तत्र सेश्वरमीमांसावादाधिकारेण तावदाह ईश्वरेत्यादि । धर्मादिति अपूर्वादिशब्दव्यपदेश्याद्यजेतेत्यादिचोदनालक्षणादर्थादित्यर्थः । तस्यापि किं निमित्तमित्युक्तं कुतः सोऽपीति । कर्मत इति, विहितं हि कर्म क्षणिकत्वाच्चिरभावि फलं दातुमसमर्थमिति तत्सिद्ध्येऽन्तरा पुंसां संस्कारविशेषः कल्पनीयो यो धर्म इत्यपूर्वमिति च व्यपदिश्यते यद्वशादियं निखिलैव कर्मफलव्यवस्था सिद्ध्येत् । यदाहुः

'फलाय कर्म विहितं क्षणिकं चिरभाविने ।
तत्सद्धिर्नान्यथेत्येवमपूर्वमधिगम्यते ॥'

इति । तदिति कर्म येन संस्कारद्वारिका ज्ञानावाप्तिः स्यात् । उच्यतामिति साक्षेपं प्रश्नेनात्यन्तमसंभाव्यत्वं सूचितम् ॥ १० ॥

तदेवाह

नहि कर्मास्ति तादृक्षं
येन ज्ञानं प्रवर्तते ।
कर्मजत्वे च तज्ज्ञानं
फलराशौ पतेद्ध्रुवम् ॥ ११ ॥

---

१ ग० पु० यदिति पाठः ।

चो हेतौ । फलराशौ पतेदिति फलरूपं भवेदित्यर्थः ॥ ११ ॥

नच कर्मान्तरफलने कर्मान्तरस्य प्रक्षयो न्याय्य इत्याह

अन्यकर्मफलं प्राच्यं
कर्मराशिं च किं दहेत् ।

एवं हि फलत्वाविशेषात् स्वर्गपश्वादिरूपमपि फलं ज्ञानजनकं कर्मापि दहेदित्याशयः ॥

ननु कर्मफलत्वाविशेषेऽपि तथेश्वरेच्छावशाज्ज्ञानमेव कर्मान्तरदाहकं न स्वर्गपश्वाद्यपि,—इत्याशङ्क्याह

ईशस्य द्वेषरागादि-
शून्यस्यापि कथं क्वचित् ॥ १२ ॥
तथाभिसंधिर्नान्यत्र
भेदहेतोरभावतः ।

क्वचिदिति ज्ञाने, अन्यत्रेति स्वर्गपश्वादौ, भेदहेतोरभावत इति, नहि रागद्वेषादिविरहभाज ईश्वरस्यैवं कश्चिद्विशेषोऽस्ति येन विना-

---

१ क० पु० फलेनेति पाठः ।

पि निमित्तमेकं दाहकत्वेनाभिसंदध्यादितरच्च दाह्यत्वेनेति ॥

नच कर्मफलत्वेऽपि ज्ञानस्येश्वरेच्छोपनतमेव कर्मान्तरदाहकत्वं किंतु युक्तिबलोपनीतमित्याह

नन्वित्थं प्रदहेज्ज्ञानं
कर्मजालानि कर्म हि ॥ १३ ॥
अज्ञानसहकारीदं
सूते स्वर्गादिकं फलम् ।
अज्ञानं ज्ञानतो नश्ये-
दन्यकर्मफलादपि ॥ १४ ॥

इह तावदनुष्ठीयमानमग्निहोत्रहवनादिलक्षणं कर्म

'कर्तर्यबोधे कार्मं तु' (ई० प्र० ३।९)

इत्याद्युक्तेरज्ञानसहकारितमेव तत्तत्स्वर्गादिकं फलं जनयेत्, अज्ञानं च कर्मान्तरहेतुमत्तयोदिताज्ज्ञानान्नश्येदिति वस्तुतः सहकार्यभावात् प्रतिरुद्धफलजननसामर्थ्यं कर्म जायते,—इत्येतावदुच्यते ज्ञानं कर्मजालानि प्रदहेदिति ॥

ननु यदि नाम फलदानसहकारिभूताज्ञानानिवर्तनद्वारेण निरुद्धफलजननसामर्थ्यं कर्म संपाद्यते, तद्यत्राज्ञानं च न निवार्यते कर्म च निष्फलीक्रियते तत्र किं प्रतिपत्तव्यमित्याशङ्क्याह

उपवासादिकं चान्य-
दृष्टकर्मफलं भवेत् ।
निष्फलीकुरुते दुष्टं
कर्मेत्यङ्गीकृतं किल ॥ १५ ॥

इह खल्वन्यत् स्मृत्यादिशास्त्रान्तरोद्दिष्टमुपवासादिकमादिशब्दादनघत्वादीत्येवंप्रकारं कर्मफलं दुष्टं भवेत् कर्मफलव्यवस्था तत्रोत्सीदेदित्यर्थः। किल यतो विनाप्यज्ञाननिवृत्तिमर्थादुपवासादि प्रायश्चित्तकर्म दुष्टं श्वदंशाद्यात्मविरुद्धं कर्म निष्फलीकुरुते प्रतिरुद्धफलोत्पादनसामर्थ्यं करोत्येवं कर्मवादिभिर्भवद्भिरेवाभ्युपगतम् । यच्छातातपः

'सुव्रतं तु शुना दृष्टं त्रिरात्रमुपवासयेद् ।'

इति ॥ १५ ॥

तन्नैतद्युक्तमज्ञानविनिवर्तनद्वारेण कर्म निष्फलीक्रियते न वा—इति दूरदूरा चिन्ता स्यादित्याशशङ्क्याह

अज्ञानमिति यत्प्रोक्तं
ज्ञानाभावः स चेत्स किम्[1] ।
प्रागभावोऽथवा ध्वंस
आद्ये किं सर्वसंविदाम् ॥ १६ ॥
कस्यापि वाथ ज्ञानस्य
प्राच्यः पक्षस्त्वसंभवी ।

'ज्ञानाभाव' इति प्रसज्यप्रतिषेधावलम्बनात् । ध्वंसः प्रध्वंसाभावः । तत्र च प्रागभावं तावद्विकल्पयति आद्य इत्यादिना । कस्यापीति प्रतिनियतस्य । प्राच्यः पक्ष इति सर्वसंविदभावलक्षणः ॥

नह्येवं कश्चित्क्रमः संभवति, यदनादावस्मिन् संसारे यस्य न किञ्चिदपि ज्ञानमुत्पन्नम् एवंविधः संकुचितः कश्चिदात्मास्तीति तदाह

---

१ क० ख० चेत्कथमिति पाठः ।

न किंचिद्यस्य विज्ञान-
मुदपादि तथाविधः ॥१७॥
नाणुरस्ति भवे ह्यस्मि-
न्ननादौ कोऽन्वयं क्रम :।

एवं ह्यसावनेलमूकतया घटादिप्राय एव भवेदित्यभिप्रायः ॥

एवं सर्वसंविदभावपक्षं प्रतिक्षिप्यैकतरज्ञानाभावपक्षमपि प्रतिक्षिपति

भाविनः प्रागभावश्च
ज्ञानस्येति स्थिते सति॥१८॥
मुक्ताणोरपि सोऽस्त्येव
जन्मतः प्रागसौ नच।
ज्ञानं भावि विमुक्तेऽस्मि-
न्निति चेच्चर्च्यतामिदम् ॥१९॥

भाविन इति भविष्यतः। भूतस्याभावे हि प्रध्वंसाभावो भवेदिति भावः। न केवलमस्मदादेर्बद्धात्मनो यावन्मुक्ताणोरपीत्यपिशब्दा-

र्थः। स इति भाविज्ञानप्रागभावः। कथमित्याह जन्मत इत्यादि, असौ प्रागभावो ह्युत्पत्तेः प्राग्भवेदित्युक्तम्। न चास्मिन्मुक्ताणावुत्पत्स्यमानं ज्ञानमेवं चर्च्यतां कस्मान्न मुक्ताणौ ज्ञानं भावीति ॥ १९ ॥

तदाह

कस्माज्ज्ञानं न भाव्यत्र
ननु देहाद्यजन्मतः।
तत्कस्मात्कर्मणः क्षैण्या-
त्तत्कुतोऽज्ञानहानितः ॥२०॥
अज्ञानस्य कथं हानिः
प्रागभावे हि संविदः।
अज्ञानं प्रागभावोऽसौ
न भाव्युत्पत्त्यसंभवात् ॥२१॥

इह बद्धाणुष्वपि हि बाह्येन्द्रियबुद्धिसंबन्धाद्युपस्थापितविषयत्वे ज्ञातुरेव ज्ञानत्वं व्यवह्रियते, न तु वस्ततो ज्ञानस्योदयव्ययौ स्तः, मुक्ताणुषु पुनर्देहेन्द्रियादिसंबन्धवन्ध्यतया ज्ञानस्य

व्यावहारिक्यप्युत्पादादिवार्ता दूरतो निरस्तेत्युक्तं 'देहाद्यजन्मत' इति । विकल्पज्ञानं तु मुक्तत्वादेवात्र नाशङ्कनीयम् । 'अज्ञानहानितः' इत्यज्ञानसहचरितानि कर्माणि किल फलन्तीति प्रागेवोक्तम् । ननु मुक्ताणौ भाविज्ञानप्रागभावलक्षणमज्ञानं न स्यादित्युक्तमज्ञानस्य कथं हानिरिति । अवश्यं हि मुक्ताणोरपि भाविनो ज्ञानस्य प्रागभावो भवेदित्याह प्रागभावे हि संविदो ज्ञानमिति । 'संविद' इति कस्यचिद्भाविनो ज्ञानस्येत्यर्थः । ननु मुक्ताणावुत्पत्स्यमानं ज्ञानमेव नास्ति,—इति कस्य प्रागभावः स्यादित्याह 'प्रागभावः' इत्यादि ॥

ननु मुक्ताणौ भाविज्ञानासंभवे किं निमित्तमित्याह

कस्मान्न भावि तज्ज्ञानं
ननु देहाद्यजन्मतः ।
इत्येष सर्वपक्षघ्नो
निशितश्चक्रकभ्रमः ॥ २२ ॥

एवं हि भाविज्ञानाभावे देहाद्यजन्म नि-

मित्तं, तत्रापि कर्मक्षैण्यं तत्राप्यज्ञानहानिस्तत्रापि भाविज्ञानानुत्पादस्तत्रापि देहाद्यजन्म तत्रापि कर्मक्षैण्यमित्येवं परिवर्त्तमानं मूलक्षतिकरं चक्रकचोद्यमापद्यते,—इति नेदं युक्तमुक्तमज्ञानं ज्ञानस्य प्रागभाव इति ॥ २२ ॥

न चात्र प्रध्वंसाभावोऽपि न्याय्यः, इत्याह

अथ प्रध्वंस एवेद-
मज्ञानं तत्सदा स्थितम् ।
मुक्ताणुष्विति तेष्वस्तु
मायाकार्यविजृम्भितम्॥२३॥

सदा स्थितमिति, तत्तद्विषयाहितसुखदुःखज्ञानाद्यात्मनो भोगस्यात्यन्त विनिवृत्तेः, तत्तेष्वप्यज्ञानस्य सदास्थितत्वात् तत्सहचरितानि कर्माण्यपि फलन्तीति तन्निमित्तकमायीयमलोल्लासे कलादिक्षित्यन्तस्य तत्कार्यस्यापि समुल्लासोऽस्तु, बद्धाणुभ्यो मुक्ताणवो न विशिष्येरन्नित्यर्थः ॥ २३ ॥

एवं प्रसज्यप्रतिषेधपक्षं प्रतिक्षिप्य पर्युदासमुपक्षिपति

अथाज्ञानं नह्यभावो
मिथ्याज्ञानं तु तन्मतम् ।
तदेव कर्मणां स्वस्मि-
न्कर्तव्ये सहकारणम् ॥२४॥

ननु यदि नाम कर्मणां स्वकर्तव्यतायां मिथ्याज्ञानं सहकारिकारणं तस्किमेषां फलोत्पत्तिकाल एव सहकारितयाकस्मिकमापतेदुत स्योत्पत्तिकालात्प्रभृति फलावध्यनुवर्तते—इति वाच्यमित्याह

वक्तव्यं तर्हि किं कर्म
यदा सूते स्वकं फलम् ।
तदैव मिथ्याज्ञानेन
सता हेतुत्वमाप्यते ॥ २५ ॥
अथ यस्मिन्क्षणे कर्म
कृतं तत्र स्वरूपसत् ।
मिथ्याज्ञानं यदि तत-
स्तादृशात्कर्मणः फलम् ॥२६॥

तदैव सतेति, मृद इव दण्डादिना कार्यो-

त्पादकाल एवोपनिपततेत्यर्थः । तादृशादिति, मिथ्याज्ञानसहचरितात् । तेन यथा क्षित्यादि-सहचरितादन्त्याद्बीजादेरङ्कुरादि स्यात् तथा मिथ्याज्ञानसहचरितात् कर्मणस्तत्तद्भोगादि-लक्षणं फलमिति ॥ २६ ॥

एतदेव क्रमेण प्रतिक्षिपति

प्राक्पक्षे प्रलये वृत्ते
प्राच्यसृष्टिप्रवर्तने ।
देहाद्यभावान्नो मिथ्या-
ज्ञानस्य क्वापि संभवः ॥२७॥
उत्तरस्मिन्पुनः पक्षे
यदा यद्येन यत्र वा ।
क्रियते कर्म तत्सर्व-
मज्ञानसचिवं तदा ॥ २८ ॥
अवश्यमिति[1] कस्यापि
न कर्मप्रक्षयो भवेत् ।

'प्रलय' इति देहप्राणबुद्धिशून्यानामपि सं-

---

१ क० ख० अपीति पाठः ।

क्षयात् प्रकृष्टे लये महासंहार इत्यर्थः। प्राच्येति प्राथमिक्यायेति यावत्। इहादिसर्गे तावदीश्वरः स्वकर्मानुरूप्येणैवाणूनां तत्तद्देहसंयोजनादि विदध्यादिति नास्ति विमतिः। कर्म चाज्ञानसहचरितमेव फलति, अज्ञानं च तदा देहाद्यसंभवे निरधिकरणं नास्तीति तत्साहचर्याभावात्प्रतिरुद्धफलजननसामर्थ्येषु कर्मसु सृष्ट्यसंपत्तेस्तत्र प्रवृत्तिमात्रमपि नेश्वरस्य सिद्ध्येदिति न किंचित्स्यात्। अथ कर्मणामुत्पत्तिकालादारभ्य फलपर्यन्तमज्ञानस्यानुवर्तमानत्वं तत्सर्वकालमेषामवश्यमेव तत्साचिव्यं स्यादिति कदाचिदपि कस्यापि न कर्म क्षीयेत, अज्ञाननाशाद्धि तन्नश्येदित्युक्तम्, अज्ञानं चात्र सर्वदैवानुवर्तमानमवतिष्ठते इति कथमेवंभावो भवेत्॥

ज्ञानिनापि हि क्रियमाणं कर्म कर्मतयैवाज्ञानसहचरितं स्यात्, तत्तत्रापि तन्निरुद्धफलभाजनसामर्थ्यमित्यज्ञानिषु का वार्ता। भवतु वा, मिथ्याज्ञानसाहचर्याभावाज्ज्ञानिना क्रिय-

---

१ क० ख० अपीति पाठः।

माणं कर्म निष्फलं ज्ञानादर्वाक् कृतं तु कथमेवं स्यादित्याह

यद्यपि ज्ञानवान्भूत्वा
विधत्ते कर्म किंचन ॥ २९ ॥
विफलं स्यात्तु तत्पूर्व-
कर्मराशौ तु का गतिः ।

का गतिरिति ज्ञानिनोऽप्यनन्तपूर्वकर्मवैफल्ये न किंचिन्निमित्तं संभवेदित्यर्थः ॥

ननु किमनेन नः पक्षेण प्राच्य एव पक्षोऽस्तु यत् प्रलयस्य वृत्तत्वाद्देहाद्यभावेऽपि चित्स्वभावत्वादणूनां ज्ञानं संभवत्येवेत्याह

अथ प्रलयकाले ऽपि
चित्स्वभावत्वयोगतः ॥ ३० ॥
अणूनां संभवत्येव
ज्ञानं मिथ्येति तत्कुतः ।
स्वभावादिति चेन्मुक्ते
शिवे वा किं तथा नहि ॥ ३१ ॥

भवतु नामैषां ज्ञानं, मिथ्यात्वं पुनः कुत-

स्त्यमित्युक्तं 'मिथ्येति तत्कृतः' इति । अथ ज्ञानत्वादेव ज्ञानस्य मिथ्यात्वं तच्चित्स्वभावत्वाविशेषान्मुक्ताणूनां शिवस्यापि वा कथं न मिथ्याज्ञानयोग इत्याह 'मुक्ते शिवे वा किं तथा नहि' इति ॥ ३१ ॥

नन्विह सामान्येनाज्ञानं न विवक्षितं किंतु प्रकृतिपुरुषविवेकादर्शनरूपं यथा सांख्यैराख्यातं, तदेवाह

यच्चादर्शनमाख्यातं
निमित्तं परिणामिनि ।
प्रधाने तद्धि संकीर्ण-
वैविक्त्योभययोगतः ॥ ३२ ॥

दर्शनाय पुमर्थैक-
योग्यतासचिवं धियः ।
आरभ्य सते धरणी-
पर्यन्तं तत्र यच्चितः ॥ ३३ ॥

बुद्धिवृत्त्यविशिष्टत्वं
पुंस्प्रयाशप्रसादतः ।

प्रकाशनाद्धियोऽर्थेन
सह भोगः स भण्यते ॥३४॥

प्रधाने परिणामिनि निमित्तमिति तत्तद्बुद्ध्यादिरूपतया प्रधानपरिणामार्थमित्यर्थः। तदेव च भोगापवर्गमयसांकर्यवैचित्र्यदर्शनाय भवेदित्युक्तं 'तद्धि संकीर्णवैचित्र्योभययोगतो दर्शनाय' इति। यदाहुः

'विना सर्गेण बन्धो हि पुरुषस्य न युज्यते।
सर्गस्तस्यैव मोक्षार्थ.....।।'

इति। तत्र परिणामित्वं तावदाह 'पुमर्थेत्यादि'। पुंसः प्रधानकैवल्यावधिपरिच्छिन्ने सांकर्यदर्शनात्मन्यर्थे येयमेकानन्यसाधारणा कार्यजननाभिमुख्यलक्षणा योग्यता तत्सचिवं तत्सहकृतमित्यर्थः। तदुक्तम्

'पुरुषस्य दर्शनार्थः कैवल्यार्थस्तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥'
'प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥'
(सां०का० २२)

इति। नन्वेवं परिणमतु प्रधानं सांकर्येण

वैविक्त्येन वा, दर्शनं पुनरत्र किं नामोच्यते, इत्याशङ्क्याह 'तत्रेत्यादि'। तत्रैवं प्रधानस्य परिणामे पुंस्प्रकाशसंक्रान्तिमहिम्ना तत्तदर्थाकारायाबुद्धेराचैतन्येऽपि चेतनायमानतयावस्थानाद्यश्चितः पुरुषस्यौदासीन्येऽपि स्वच्छायासंक्रान्तिद्वारेणोभयतो निर्मलदर्पणप्रख्याया बुद्धेरिदमहं जानामीत्येवमात्मिकया वृत्त्या कर्तृतयेवाभिमानात्सारूप्यं स एव विषयच्छायायोगिन्यां बुद्धौ चिच्छायासंक्रान्तेः सांकर्यदर्शनात्मा भोगो भण्यते,—इति वाक्यार्थः। यदुक्तम्

'तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।
गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः॥'
(सां०का०२०)

इति ॥ ३४ ॥

एवं सांकर्यमभिधाय वैविक्त्यं व्यनक्ति

बुद्धिरेवास्मि विकृति-
धर्मिकान्यस्तु कोऽप्यसौ।
मद्विलक्षण एकात्मे-
त्येवं वैविक्त्यसंविदि ॥ ३५ ॥

१ ग० पु० धर्मान्यस्तु स क इति पाठः। २ स्वस्थ इति सां० पाठः।

पुमर्थस्य कृतत्वेन
सहकारिवियोगतः ।
तं पुमांसं प्रति नैव
सूते किंत्वन्यमेव हि ॥ ३६ ॥

विकृतिधर्मेत्यनेनास्याः परिणामित्वादाचैतन्याद्युक्तम्, अत एव पुंसश्चेतनत्वादियोगात् एतद्वैलक्षण्यं कटाक्षयितुं कोऽपीति मद्विलक्षण इति चोक्तम् । यदाहुः

'त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥'
(सां० का० ११)

इति । वस्तुतः प्रकृतिपुरुषयोरुपरतविषयच्छायायां बुद्धौ निष्कम्पदीपशिखाप्रख्यकेवलचिच्छायासंक्रान्तिर्नाम वैवित्तयज्ञानमुच्यते, यत्रेदमुपचर्यते प्रकृतिरन्या पुरुषोऽन्यश्चेति । यदुक्तम्

'एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥'
(सां० का० ६४)

इति । एवं चोभयथा दर्शनात्मनः पुमर्थस्य

कृतत्वात् अत एव पुमर्थैकयोग्यतात्मनः सहकारिणो वियोगात्तं प्राप्तविवेकज्ञानं पुरुषं प्रति नैव सूते प्रतिनिवृत्तप्रसवा भवतीत्यर्थः। यदुक्तम्

'तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम्।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः॥
दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरतैका।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य॥'

(सां० का० ६६)

इति। न चैवं निवृत्तप्रसवत्वात् प्रकृतेरविशेषेणैव सर्वेषां निर्मोक्षप्रसङ्ग इत्युक्तं किंत्वन्यमेव हीति। अन्यमित्यप्राप्तविवेकज्ञानमित्यर्थः॥

एतदेव संक्षेपेण प्रतिक्षेतुमुपक्षिपति

अत्र पुंसोऽथ मूलस्य
धर्मोऽदर्शनता द्वयोः।
अथवेति विकल्पोऽय-
मास्तामेतत्तु भण्यताम्॥३७॥

एतद्धि यदि नामादर्शनात्मकमज्ञानं पुंसो धर्मस्तत्तस्य नित्यमेव बन्धे ज्ञानोदये वा विकारित्वादाचैतन्यम्, प्रकृतेश्च तद्धर्मत्वे पुंसः

किमायातं येन तस्य बन्ध इति सदैवास्य निर्मोक्षः स्यात्, उभयधर्मत्वे चोभयथापि दूषणोपनिपात इत्यादि विविच्यमानमतिगहनत्वात् वस्तुतस्तु व्याहतिनिमित्तत्वमियादित्याशयः । एतत् परं वक्ष्यमाणदृशा मया चोद्यमानं निर्णीयतामित्युक्तम्—एतत्तु भण्यतामिति ॥ ३७ ॥

तदेवाह

भोगो विवेकपर्यन्त
इति यत्तत्र कोऽवधिः[1] ।
विवेकलाभे निखिल-
सूतिदृग्यदि सापि किम्॥ ३८
सामान्येन विशेषैर्वा
प्राच्ये स्यादेकजन्मतः ।
उत्तरे न कदाचित्स्या-
द्भाविकालस्य योगतः ॥३९॥

यदभिप्रायेणैव

'कैवल्यार्थं प्रवृत्तेश्च' (सां० का० १७)

इत्याद्युक्तम् । यदि नाम निखिलसूतिसंपत्ति-

---

१ क० ख० विधिरिति पाठः ।

रेव विवेकलाभे सूत्यन्तरसम्पत्त्ययोगादव-धिः। तर्किं सापि सूतिमात्रात्मना वा स्यात् पार्थिवघटाद्यात्मविशिष्टसूत्याद्यात्मना वेत्याह सा किं सामान्येन विशेषैर्वेति। न चैतदुभय-मपि सङ्गच्छते,—इत्याह प्राच्य इत्यादि। एकजन्मत इति, एकस्यामपि व्यक्तौ सामा-न्यस्य कात्स्न्र्येनैव वृत्तेः। न कदाचिदिति, भा-विनां सूतिविशेषाणामानन्त्यात् ॥ ३९ ॥

ननूत्तर एव पक्षोऽस्तु आनन्त्यचोद्यं तु निःशेषविशेषानवलम्बनात् कतिपयविशेषाश्रय-णाच्च न स्यादित्याशङ्कते

कैश्चिदेव विशेषैश्चे-
त्सर्वेषां युगपद्भवेत्।
विवेकोऽनादिसंयोगा-
त्कां ह्यन्योन्यं विचित्रता ॥४०॥

इह खलु प्रकृतिसंयोगानादित्वस्य तुल्य-त्वात् सर्वेषामेव पुरुषाणां प्रकृतिनियतविशेष-सूतिसंपत्तिसामनन्तर्येण युगपददूरविप्रकर्षेण

---

१ क०ख०पु० सेति पाठः।

वा तद्विवेक उदियाच्छरदीव शालिस्तम्बानां पाक इत्येषां परस्परस्य वैचित्र्यान्तरायोगात् क्रमेण भोगापवर्गौ न स्याताामिति न सांख्योक्तमप्यज्ञानं नैयायिकतामवलम्बते ॥ ४० ॥

अत आह

तस्मात्सांख्यदृशापीद-
मज्ञानं नैव युज्यते ।

सांख्यदृशापीत्यपिशब्देन न केवलं प्रागुक्तक्रमेणैतन्न युज्यते यावदनेनापि मतेनेत्युक्तम् ॥

नन्विह भोगापवर्गमात्रमेवोपादेयमिति तदेव विविच्यतां, किमज्ञानयुक्तायुक्तत्वकथनेनेत्याशङ्क्याह

अज्ञानेन विना बन्ध-
मोक्षौ नैव व्यवस्थया ॥४१॥
युज्येते तच्च कथित-
युक्तिभिर्नोपपद्यते ।

व्यवस्थयेति 'अयं बद्धोऽयं मुक्त' इति ॥४१

ननु माभूदज्ञानं युक्तमयुक्तं वा किमनया

नश्चिन्तया यदणूनां मायासद्भावादेव बन्धमोक्षविभागः सिद्ध्येदित्याशङ्क्याह

मायाकर्माणुदेवेच्छा-
सद्भावेऽपि स्थिते ततः॥४२॥
न बन्धमोक्षयोर्योगो
भेदहेतोरसंभवात् ।

देवेच्छेति, ईश्वरशक्त्यधिष्ठानं विना हि मायादि जाड्यात्किंचिदपि कर्तुं न शक्नुयादित्याशयः । तत इत्यज्ञानस्यायौक्तिकत्वात् । योगो युक्तिः । भेदहेतोरसंभवादिति, नहि मायादीनां प्रतिपुंनियतत्वादीश्वरस्य च वीतरागद्वेषत्वादयं बद्धोऽयं मुक्त इति विभागे किंचिन्निमित्तं संभवेदिति भावः ॥ ४२ ॥

एवमणूनां ज्ञत्वकर्तृत्वप्रतिबन्धकमज्ञानशब्दवाच्यं किंचिदावरणं वक्तव्यं, येनायं बद्धोऽयं मुक्त इति विभागो भवेदित्याह

तस्मादज्ञानशब्देन
ज्ञत्वकर्तृत्वधर्मणाम् ॥४३॥

चिदणूनामावरणं
किंचिद्वाच्यं विपश्चिता ।

अज्ञानशब्देनेति, यदुक्तम्

'मलोऽज्ञानं पशुत्वं च तिरस्काररसस्तमः ।
अविद्या ह्यावृतिर्मूर्च्छा पर्यायास्तत्र चोदिताः ॥'

इति ॥ ४३ ॥

तच्च कीदृगित्याह

आवारणात्मना सिद्धं
तत्स्वरूपादभेदवत् ॥४४॥
भेदे प्रमाणाभावाच्च
तदेकं निखिलात्मसु ।

स्वरूपादभेदवदिति अवयविवन्निरंशात्मकमित्यर्थः । एवमप्यवयविनामानैक्ये प्रमाणमस्ति कारणभेदो नाम, नेह तथेत्युक्तं भेदे प्रमाणाभावात्तदेकमिति । निखिलात्मसु इति बहुवचननिर्देशादेकमपीदं बहुशक्तिकमन्यथा ह्यस्य निखिलात्मावारकत्वं न घटेत, एकमुक्तौ वा सर्वे मुच्येरन्निति । यदाहुः

'मलशक्तयो विभिन्नाः प्रत्यात्मानं च तद्गुणावरिकाः।'

इति ॥ ४४ ॥

तच्चैवंविधं किं नित्यं कार्यं वा, कार्यं चेत्तत्कुतोऽस्य प्रसव इत्याह

तच्च कस्मात्प्रसूतं स्या-
न्मायातश्चेत्कथं नु सा ॥४५॥
क्वचिदेव सुवीतैत-
न्न तु मुक्तात्मनीत्ययम् ।
प्राच्यः पर्यनुयोगः स्या-
न्निमित्तं चेन्न लभ्यते ॥४६॥
उत्पत्त्यभावतस्तेन
नित्यं नच विनश्यति ।

मायातश्चेदस्य प्रसवस्तत्सर्वान् प्रत्येवासावेतत् सुवीत न कंचिदेव वा प्रतीति, तदाह मायातश्चेदित्यादि। ततश्च बद्धाणुवन्मुक्ताणून् प्रत्यप्यविशेषेणासावेतत् सुवीत,—इति प्राच्यएवायं पर्यनुयोगः परापतेत् । तथाहि ज्ञानत्वादेव ज्ञानस्य मिथ्यात्वे, तत्स्वभावत्वाविशेषात् मुक्ताणुष्वपि तद्योग इत्युक्तं प्राक्, नहि वस्तु भवत्पक्षपाति भवेदिति भावः । अथास्य

नास्ति किंचिन्निमित्तं, तर्हि नित्यमेवास्त्वित्याह निमित्तमित्यादि । तेनेति निमित्तालाभेन, उत्पत्त्यभावे चायं हेतुः, तन्निमित्ताभावादुत्पत्त्यभावः,—तस्माच्चेदं नित्यमिति नित्यत्वादेव चेदं न विनश्वरमित्युक्तं नच विनश्यतीति ॥४६॥

न केवलं नित्यत्वादेव नैतद्विनश्यति यावन्निमित्तान्तरादपीत्याह

तत एवैकतायां चा-
न्यात्मसाधारणत्वतः ॥४७॥

तत एव भेदे प्रमाणाभावलक्षणात् प्रागुक्ताच्चैतोरेकतायां सत्यां स्वपरसाधारणत्वाच्चैतन्न विनश्यतीति प्राच्येन सम्बन्धः । अस्य ह्येकत्वेन सर्वसाधारण्यादेकत्र नाशे सर्वत्रैवासौ स्यादिति युगपदेव सर्वे मुच्येरन्नित्यभिप्रायः ॥

नन्वेतज्ज्ञानाभावमात्ररूपत्वान्न किंचिदिति किमनेन तुच्छेन कृत्यमित्याशङ्क्याह

न वावस्त्वर्थकारित्वा-
न्न चित्तत्संवृतित्वतः ।

अर्थकारित्वादिति पुमावरणलक्षणायामर्थ-

---

१ ख० पु० न चेति पाठः ।

क्रियायामस्य कर्तृत्वादित्यर्थः । न चैवमप्यस्य ज्ञानमेव रूपमित्युक्तं न चित्तत्संवृतित्वतः इति । नहि चिदेव चिदावरिका भवेदिति भावः ॥ ४७ ॥

ननु भवतु नामैतत्, आत्मनां पुनरनेन किं-कारणकः सम्बन्ध इत्याशङ्क्याह

न चैतेनात्मनां योगो
हेतुमांस्तदसंभवात् ॥४८॥

तदसंभवादिति परिकल्प्यमानो हि हेतुः किं निर्मलान् पुंसः प्रति मलं योजयेदुत समलान् । तत्राद्ये पक्षे निर्मलत्वाविशेषाच्छिवमुक्ताणून् प्रत्यपि योजयेत् शिववद्वा न कंचिदपि प्रतीति । द्वितीयस्मिन् पुनर्व्यर्थं तद्योजनं ततः पूर्वमपि समलत्वात्, अतश्चात्मनामनादिरेव तत्सम्बन्ध इति सिद्धम् । यदाहुः

'अनाद्यनादिसम्बन्धो मल..... ।'

इति । आगमोऽपि

'अनादिमलसम्बन्धाद्..... ।'

इत्याद्युपक्रम्य

'विशुद्धं स्फटिकं कस्मात्कस्मात्ताम्रं सकालिकम् ।
यथा तत्र निमित्तं नो तथा शुद्धशिवात्मनोः ॥'

इति ॥ ४८ ॥

एतदेव व्यस्ततयोक्तमाणवमलस्वरूपं सामस्त्येनोपसंहारदिशानुवदन् मलान्तरकारणत्वं तस्यैव विधातुमाह

तेनैकं वस्तु सन्नित्यं
नित्यसंबद्धमात्मभिः ।
जडं मलं तदज्ञानं
संसाराङ्कुरकारणम् ॥ ४९ ॥

तदेवंविधमाणवं मलं संसारस्य

'शरीरभुवनाकारं मायीयम्.....।'

इत्यादिना निरूपितस्य मायीयमलस्याङ्कुर इवाङ्कुरः कारणं कार्मं मलं तस्य कारणं मलद्वयस्यापि साक्षात्पारम्पर्येण च निमित्तमित्यर्थः। यदुक्तम्

'मलः कर्मनिमित्तं तु नैमित्तिकमतः परम् ।'

इति ॥ ४९ ॥

नन्वेवंविधं मलं चेन्नित्यमणुभिर्वा नित्यमेव

संवर्द्धं, तन्न कदाचिदपि संसारः शाम्येदित्यनिर्मोक्ष एव प्रसजेदित्याशङ्क्याह

तस्य रोद्ध्री यदा शक्ति-
रुदास्ते शिवरश्मिभिः ।
तदाणुः स्पृश्यते स्पृष्टः
स्वके ज्ञानक्रिये स्फुटे ॥५०॥
समाविशेदयं सूर्य-
कान्तोऽर्केणेव चोदितः ।

उदास्ते इति स्वस्मान्निरोधाख्याद्व्यापारान्निवर्तते इत्यर्थः । स्पृश्यते इति शिवशक्तिपातभाग्भवेदि त्यर्थः । तेन यथार्करश्मिस्पृष्टः सूर्यकान्तः स्वकामभिज्वलनलक्षणां क्रियां समाविशेत् तथायमपि शिवशक्तिपातपूतः स्वके पूर्णे ज्ञानक्रिये, समभिव्यक्तस्वसंविद्वैभवो भवेदित्यर्थः ॥

ननु यद्येवं तत्कथं शुद्धात्मनामपि पूर्णनिजज्ञानक्रियासमावेशाविशेषात् स्वरूपाभिव्यक्तावन्योन्यस्य वैचित्र्यं स्यादित्याशङ्क्याह

रोद्ध्र्याश्च शक्तेर्माध्यस्थ्य-
तारतम्यवशक्रमात् ॥ ५१ ॥

विचित्रत्वमतः प्राहु-
रभिव्यक्तौ स्वसंविदः ।

अतः शिवरश्मिस्पर्शाद्धेतोरणूनां या स्वसंविदाभिव्यक्तिस्तस्यां वैचित्र्ये मलसम्बन्धिन्या एव रोद्धयाः शक्तेः स्वव्यापारौदासीन्यात्मनो माध्यस्थ्यस्य यत्तारतम्यं परात्परमतिशयस्तत्प्रयुक्तः क्रमो निमित्तं येनात्मनां शुद्धत्वेऽप्यन्योन्यस्य विशेषः ॥ ५१ ॥

ननु सर्वत्र पारमेश्वरः शक्तिपात एव स्वसंविदाभिव्यक्तौ निमित्तमित्यादिष्टं, तत्कथमिह रोधशक्त्यौदासीन्यात्मा मलपरिपाक एवोक्त इत्याशङ्क्याह

स एष शक्तिपाताख्यः
शास्त्रेषु परिभाष्यते ॥५२॥

स इति मलपरिपाकहेतुकः प्रक्रान्तः शिवरश्मिस्पर्शः । एष इति समनन्तरमेव प्रत्यक्षतया परामृष्टः । परिभाष्यते इति श्रीमत्खेटपालाचार्यप्रभृतिभिः स्वसमयेनावस्थाप्यते इत्यर्थः ॥ ५२ ॥

एवं परकीयं शक्तिपातविधिं प्रदर्श्य निराकरोति

अत्रोच्यते मलस्ताव-
दित्थमेष न युज्यते ।
इति पूर्वाह्णिके[1] प्रोक्तं
पुनरुक्तौ तु किं फलम् ॥५३॥

इत्थमुक्तेन रूपेण । पूर्वाह्णिक इति नवमाह्निकादौ । पुनरुक्तौ किं फलमिति तदतिरिक्तं तु किंचिद्विवेच्यमित्याशयः ॥ ५३ ॥

तदेवाह

मलस्य पाकः को ऽयं स्या-
न्नाशश्चेदितरात्मनाम् ।
स एको मल इत्युक्ते-
र्नैर्मल्यमनुषज्यते ॥५४॥
अथ प्रत्यात्मनियतो-
ऽनादिश्च प्रागभाववत् ।
मलो नश्येत्तथाप्येष
नाशो यदि सहेतुकः ॥५५॥

---

१ ग० घु० केषूक्तमिति पाठः ।

हेतुः कर्मेश्वरेच्छा वा
कर्म तावन्न तादृशम् ।

पाकः कोऽयमिति, न तु मल एव स हि स्वरूपतः पूर्वमेव निराकृतप्राय इत्यभिप्रायः। एको मल इति, एकत्वे हि मलस्यैकत्रापि तन्नाशे सर्वेषामप्यसौ स्यादिति युगपदेव विश्वनिर्मोक्षप्रसङ्गः। न च रोद्र्याः शक्तेरानैक्यं युज्यते,—इत्युपपादितं पूर्वं येनापि युगपन्मुक्तिपरिहारकदशा स्यात्, अयमेव वा प्रत्यात्मनियत इष्यतां येन नैवं कश्चिद्दोषः इत्युक्तम् 'अथ प्रत्यात्मनियत' इति। ननु भवतु नामैवमनियतो नियतो वा मलस्तस्य पुनरनादित्वात्कथं नाशो युज्येतेत्याशङ्क्याह प्रागभाववदनादिरपि मलो नश्येदिति। अनादिरपि हि प्रागभावः कार्योत्पादान्नश्येदित्याशयः। यदि चानादेरयुक्तोऽपि नाशोऽभ्युपगम्यते तत्किमसौ सहेतुको निर्हेतुको वा?। सहेतुकत्वे च को हेतुरित्याह तथापीत्यादि। तत्र तावत्कर्मणो हेतुत्वं [न] न्याय्यमित्याह कर्मे-

त्यादि । तादृशमिति मलनाशहेतुभूतं तस्य भोगैकहेतुत्वात् । नापीश्वरेच्छायाः, सापि किं स्वतन्त्रा तद्धेतुरुत परतन्त्रा [न तावत्परतन्त्रा] मलकर्मपाकतारतम्यातिरिक्तस्यापेक्षणीयस्याभावात् । मले च नाश्ये तदयोगात् । नापि स्वतन्त्रा ईश्वरस्य वीतरागद्वेषत्वात्सर्वान्प्रत्यविशेषेणैव तथाभावापत्तेः ॥ ५५ ॥

तदाह

ईश्वरेच्छा स्वतन्त्रा च
क्वचिदेव तथैव किम् ॥५६॥

अहेतुत्वे चास्य द्वितीयक्षणपरिसंख्यातो नाशः, इत्यनारब्धपरिसमाप्त एव संसारः स्यादित्याह

अहेतुकोऽस्य नाशश्चे-
त्प्रागेवैष विनश्यतु ।

प्रागेव विनश्यत्विति, स्थित्यन्तरमेवैष मा दर्शीत्यर्थः ॥

अथोच्यते निरन्तरसुसदृशक्षणान्तरसन्ततिवृत्त्या ध्वस्तोऽप्यध्वस्त इवास्ते येनादर्शनं न यायादित्याह

क्षणान्तरं सदृक् सूते
इति चेत्स्थिरतैव सा ॥५७॥

एवं हि सन्तानवृत्त्या निरपेक्षतया क्षणान्तरमारभमाणो नतु विच्छेदमधिगच्छेदित्युक्तं स्थिरतैव सेति। न हि अस्यान्त्यस्येव घटक्षणस्य सामग्र्यन्तरोपनिपातः संभाव्यते येन विसदृशकार्योत्पादे निरन्वयो नाशः स्यात्॥५७॥

एतच्च मलस्य नाशमभ्युपगम्योक्तं, वस्तुतस्त्वसावस्य न स्यादित्याह

न च नित्यस्य भावस्य
हेत्वनायत्तजन्मनः।
नाशो दृष्टः प्रागभाव-
स्त्ववस्त्विति तथास्तु सः॥५८॥

हेत्वनायत्तजन्मनश्च प्रागभावस्य नाशो दृश्यते इति किमेतदुक्तमित्याशङ्क्याह प्रागभावस्त्ववस्त्विति। तथास्तु स इति प्रागभावे हि अवस्तुत्वान्न काचिन्नियमेन व्यवस्था स्यात्, भावे त्वयं नियमो यदनादेरानन्त्यमिति॥५८॥

अथ मलस्य न नाशः पाकः किंत्वस्य शक्तिप्रतिबन्धो नामेत्याह

अथास्य पाको नामैष
स्वशक्तिप्रतिबद्धता ।
सर्वान्प्रति तथैष स्याद्-
रुद्धशक्तिर्विषाग्निवत् ॥५९॥
पुनरुद्भूतशक्तौ च
स्वकार्यं[1] स्याद्विषाग्निवत् ।
मुक्ता अपि न मुक्ताः स्युः
शक्तिं चास्य न मन्महे॥६०॥

यदि नामास्य स्वशक्तिप्रतिबन्ध एव पाकस्तद्यथा विषमग्निर्वा प्रतिरुद्धमरणदाहशक्ती सर्वान्प्रति अविशेषेणैव स्यातां, तथायमपि प्रतिरुद्धरोधकशक्तिरिति युगपदेव सर्वे मुच्येरन्। एवं च केनापि निमित्तेन प्रतिबन्धकनिवृत्तौ यद्यस्य विषाग्निवत् पुनरपि स्वा शक्तिरुन्मज्जेत् तत्सर्वान्प्रति अविशिष्टैवासौ स्यादिति महता-

१ ग० पु० शक्तिविषेति पाठः ।
२ ग० पु० स्वामिति पाठः ।

यासेन मुक्ता अप्यकस्मादेव बद्धा भवेयुस्तान्प्रति प्रतिप्रसवन्यायेन निरोधकत्वस्य संभाव्यमानत्वात्, अतश्च बन्धमोक्षौ प्रति न कस्यचिदपि दार्ढ्यं भवेत्,—इति को नाम प्रेक्षापूर्वकारी बन्धं हातुं मोक्षं चोपादातुमुद्यच्छेत् । किंनामधेया चास्य शक्तिरिति न बुद्ध्यामहे यस्या अपि प्रतिबन्धो नामास्य पाकः स्यादित्याह 'शक्तिं चास्य न मन्महे' इति ॥ ६० ॥

अथोच्यते रोधिकास्य शक्तिरिति तत्किमसौ रुन्ध्यादित्याह

रोद्धीति चेत्कस्य नृणा
ज्ञत्वकर्तृत्वयोर्यदि ।

यद्येवं, तदस्याः किं संनिधिमात्रेण तद्रोधकत्वमुत किंचित्करत्वेनेत्याशङ्क्याह

सद्भावमात्राद्रोद्धृत्वे
शिवमुक्ताण्वसंभवः ॥६१॥

तत्र संनिधिमात्रेणैवास्या रोधकत्वे तत्संनिधानस्याविशेषाद् विमुक्ताणून्प्रत्यपि तथा स्यादिति सर्वमिदमन्धमूकप्रायं बद्धमेव जगत्स्यात् ॥ ६१ ॥

द्वितीयमपि पक्षं प्रतिक्षेप्तुमाह

संनिधानातिरिक्तं च
न किंचित्कुरुते मलः ।
आत्मना परिणामित्वा-
दनित्यत्वप्रसङ्गतः ॥६२॥

यदि नाम हि संनिधानातिरेकेण मलस्तच्छक्तिर्वा कंचिदप्यतिशयमात्मनामादध्यात् तत्तेषां विकारित्वादनित्यत्वं प्रसजेदिति स्वसिद्धान्तभङ्गो भवेत् ॥ ६२ ॥

ननु न किंचिदप्यात्मनां मलः कुर्यात् किंतु तत्समवेतं ज्ञत्वकर्तृत्वाद्यावृणुयाद् येनैषां बद्धत्वमुच्यते,—इत्याशङ्क्याह

ज्ञत्वकर्तृत्वमात्रं च
पुद्गला न तदाश्रयाः ।
तच्चेदावारितं हन्त
रूपनाशः प्रसज्यते ॥६३॥

नहि वैशेषिकानामिव भवतां धर्मधर्मिणोः कश्चिद्भेदो येन ज्ञत्वकर्तृत्वयोराश्रया आत्मानः,-

इति तदावरणेनात्मनां किमिति स्यात्, किंतु ज्ञानक्रिये एवात्मनां रूपं तत्तदावरणमात्रादेवैषां रूपनाशः प्रसजेदित्युक्तमेव प्राक्

'विभोर्ज्ञानक्रियामात्रसारस्याणुगणस्य च ।
तदभावो मलो रूपध्वंसायैव प्रकल्पते ॥'
धर्माद्धर्मिणि यो भेदः समवायेन चैकता ।
न तद्भवद्भिरुदितं कणभोजनशिष्यवत् ॥ (तं० ९।७९)

इति ॥ ६२ ॥

इह च मलेन ज्ञानक्रिययोरावरणं नाम पटेनेव घटस्य द्रष्टारं प्रत्यप्रकाशनमुच्यते, तच्च वस्तुनो नावस्तुतामाधातुं शक्नुयाद् येन ज्ञानस्याज्ञानत्वं स्यात् । ततश्च सर्व एव मुक्ता भवेयुर्बद्धा वा इति, सत्यपि मले न काचिद्बन्धमोक्षव्यवस्था सिद्ध्येत्, तदाह

आवारणं चादृश्यत्वं
न च तद्वस्तुनोऽन्यताम् ।
करोति घटवज्ज्ञानं
नावरीतुं च शक्यते ॥६४॥

अत्र न केवलमेवं यावदावरणमेव न संभवति,—इत्याह घटवदित्यादि । न हि मूर्तेना-

मूर्तेन वा मलेनामूर्तस्य ज्ञानस्यावरणं घटते तद्धि मूर्तस्यैव मूर्तेन भवेदिति भावः। क्रिया च ज्ञानपल्लवप्रायेति च नात्र तस्याः पृथगुपादानम् ॥ ६४ ॥

प्रत्युतास्यावरणायायातो मलो ज्ञेयः स्यादिति ज्ञातृत्वमेवोत्तेजितं भवेदित्याह

ज्ञानेनावरणीयेन
तदेवावरणं कथम्।
न ज्ञायते तथा च स्या-
दावृतिर्नाममात्रतः ॥६५॥

आवरणीयेनेत्यावार्यतयाभिमतेनेत्यर्थः। आवरणमिति तात्कर्म्यान्मलम्। अतश्चैतदतिरस्कृतत्वान्मलवदेव सर्वमपि जानीयादिति सर्वः सर्वज्ञो भवेत्,—इति वस्तुशून्यं शब्दैकमात्रशरणमावरणमुक्तं स्यादित्युक्तं 'तथा च स्यादावृतिर्नाममात्रतः' इति ॥ ६५ ॥

यदि च नामास्य स्वशक्तिप्रतिबन्ध एव पाकस्तत्कोऽस्याः प्रतिबन्धकः, ईश्वरश्चेत्किमसौ निरपेक्षः प्रवर्तते किमुत कर्मसाम्यम-

पेक्ष्येति, निरपेक्षश्चेत् सर्वान्प्रत्येव तथा स्यादित्याह

रोद्ध्याश्च शक्तेः कस्तस्य
प्रतिबन्धक ईश्वरः ।
यद्यपेक्षाविरहित-
स्तत्र प्राग्दत्तमुत्तरम् ॥६६॥

दत्तमिति । यदुक्तम्

'ईश्वरेच्छा स्वतन्त्रा च क्वचिदेव तथैव किम्'।(तं०१३।९६)

इति ॥ ६६ ॥

उत्तरस्मिन् पुनः पक्षे कर्मणां साम्यमेव किमुच्यते यदपेक्ष्यास्य प्रवृत्तिः स्यादित्याह

कर्मसाम्यमपेक्ष्याथ
तस्येच्छा संप्रवर्तते ।
तस्यापि रूपं वक्तव्यं
समता कर्मणां हि का ॥६७॥

तदेवाह

भोगपर्यायमाहात्म्या-[1]
त्काले क्वापि फलं प्रति ।

---

१ ग० पु० भोग्येति पाठः ।

विरोधात्कर्मणी रुद्धे
तिष्ठतः साम्यमीदृशम्॥६८॥

इह भोगक्रममहिम्ना बहुषु कर्मसु क्षीणेषु क्वाप्यनियते काले यत्परिपक्वेऽपि तुल्यफलविरुद्धे कर्मणी विरोधात्फलं प्रति रुद्धे तिष्ठतः प्रातिस्विकं प्रतिनियतं भोगं दातुमुदासाते तदनन्तरभावीनि कर्माणि चापरिपक्वत्वाद् अर्थाद्भोगाय नोन्मुखीभवन्ति, तदीदृशं विरुद्धकर्मद्वयविरोधलक्षणं कर्मणां साम्यमुच्यते, इति वाक्यार्थः ॥ ६८ ॥

ननु भवतु नामैवं कर्मसाम्यं, का पुनरीश्वरस्य एतदपेक्षा,—इत्याशङ्क्याह

तं च कालांशकं देवः
सर्वज्ञो वीक्ष्य तं मलम्
रुन्द्धे लक्ष्यः स कालश्च
सुखदुःखादिवर्जनैः ॥६९॥

तमिति रुद्धविरुद्धकर्मोपलक्षितं, तदवेक्षणे च विशेषणद्वारेण सर्वज्ञत्वं हेतुः । नन्वेवंविध-

---

१ क० ख० ग० पु० दुःख विवर्जितैरिति पाठः ।

स्यास्य कालस्यास्तित्वे किं प्रमाणमित्याशङ्क्याह 'लक्ष्यः' इत्यादि । स चैवंविधः कालः सुखादिवर्जनैर्लक्ष्यः, सर्वेषामेव सुखदुःखाद्यनुभवशून्यतया स्वसंवेदनसिद्ध इत्यर्थः ॥ ६९ ॥

एतदेव हि प्रतिक्षिपति

नैतत्क्रमिकसंशुद्ध-
व्यामिश्राकारकर्मभिः
तथैव देये स्वफले
केयमन्योन्यरोद्धृता ॥७०॥

इह हि त्रिविधानि कर्माणि शुभान्यशुभानि शवलानि च । तत्र शुभमशुभं च कर्म प्रतिनियतरूपत्वात् संशुद्धाकारं, शवलं पुनरनियतरूपत्वाद् व्यामिश्राकारं, तेषां क्रमिकत्वमेव न्याय्यं परस्परपरिहृतस्वरूपतया युगपदवस्थानायोगात् । अतश्च क्रमेणैव स्वमपि फलं ददाति, एषां का नाम फलं प्रत्यन्योन्यस्य रोद्धृता कस्मिंश्चिदपि कालक्षणे युगपत्प्रवृत्त्ययोगात्, एषां हि अनुष्ठानेऽवस्थाने फलदाने च क्रमिकैकजीवितत्वमेवेत्युक्तं बहुशः ॥ ७० ॥

भवतु नाम वैतत्कापि काले फलं प्रति विरुद्धे कर्मणी रुद्धे तिष्ठत इति, तत्र पुनरन्तरा ततोऽन्यत्कर्म किंचित्किं फलेन्नवा ? यदि फलेत् कृतं तन्निरोधेन प्राग्वदेव कर्मणामानुपूर्व्येण फलदानावस्थितेः, अथ न फलेत्तज्जात्यायुष्प्रदमपि कर्म न फलेदिति तदैव सर्वस्य देहपातः, तत्कृतं मलशक्तिप्रतिबन्धेन,—इत्याह

रोधे तयोश्च जात्यायु-
रपि न स्यादतः पतेत्
देहो भोगदयोरेव
निरोध इति चेन्ननु ॥७१॥

जात्यायुष्प्रदकर्मांश-
संनिधौ यदि शंकरः
मलं रुन्द्धे भोगदातुः
कर्मणः किं बिभेति सः ॥७२॥

ननु केनेदमुक्तं जात्यायुष्प्रदमपि कर्म तदा न फलेदिति भोगदकर्माभिप्रायेण खल्वे-

तद्विवक्षितमित्याशङ्कते 'भोगदयोरेव निरोध इति चेत्' इति । नन्वेवं जात्यायुष्प्रदकर्मा-निरोधेऽपि यदीश्वरो मलं निरुन्ध्यात् तद्भोगदस्यापि कर्मणो निरोधमनपेक्ष्यैव मलं रुणद्धु, किं तस्माद्बिभेति यद्यत्तन्निरोधमवश्यमपेक्षते,—इत्याह 'ननु' इत्यादि ॥ ७२ ॥

न चैतदैकान्तिकं यत्सुखदुःखाद्यनुभवशून्ये कर्मसाम्यात्मनि कालक्षण एवेश्वरो मलशक्तिं रुणद्धि, —इति शतशोऽप्येवमनुभवे हि न कैश्चिदपि मलशक्तिनिरोधहेतुकपारमेश्वरशक्ति-पातचिह्नं किंचन संचेत्यते,—इति, तदाह

शतशोऽपि ह्लादताप-
शून्यां संचिन्वते दशाम् ।
न च भक्तिरसावेश-
मिति भूम्ना विलोकितम् ॥ ७३ ॥

ह्लादतापौ सुखदुःखे, भक्तिरसावेशमिति, भक्तिर्हि नाम शक्तिपातस्य प्रथमं चिह्नम् । यदुक्तम्

'तत्रैतत्प्रथमं चिह्नं रुद्रे भक्तिः सुनिश्चला ।' (मा०वि०२।१४)
इति ॥ ७३ ॥

इदानीं सर्वतः प्रच्यावितस्य परस्य कुशकाशावलम्बनेन पक्षान्तरमाशङ्कते

अथापि कालमाहात्म्य-
मपेक्ष्य परमेश्वरः ।
तथा करोति वक्तव्यं
कालोऽसौ कीदृशस्त्विति॥७४॥

कालमाहात्म्यमिति, कालस्य क्षणलवादिक्रमेण कल्पमहाकल्पपर्यन्तं वैचित्र्यमित्यर्थः । तथा करोति इति मलशक्तिं प्रतिबध्नीयादित्यर्थः। ननु यद्येवं तद्दिक्कालादीनां सर्वसाधारण्यादविशिष्टमेव कालस्य माहात्म्यमिति मलशक्तिप्रतिबन्धे कतरत्तावदीश्वरस्तदपेक्षते,—इति न जानीमः,—इत्युक्तं 'कीदृशोऽसौ कालः इति वक्तव्यम्' इति ॥ ७४ ॥

तत्र हि सामान्येन तदपेक्षायां युगपदेव सर्वे मुच्येरन् विशेषश्चात्रान्वेष्यमाणो न लभ्यते,—इत्याह

किं चानादिरयं भोगः
कर्मानादि सपुद्गलम् ।
ततश्च भोगपर्याय-
कालः सर्वस्य निःसमः ॥७५॥

ततः कर्मतद्भोगपुद्गलादीनामनादित्वस्याविशेषाद् भोगक्रमे सर्वस्य पुद्गलस्य निःशेषेण दूरमपि विप्रकर्षं परिहृत्य समः कालः स्यात् येन वृक्षफलानामिवर्तौ मलशक्तीनां सममेव सामनन्तर्येण वा पाक उदियादिति सर्वस्य मुक्ताविशेष एव प्रसजेत् ॥ ७५ ॥

स्यात् पुनरयं विशेषो, यदि कर्मादित्रितयान्यतरस्य कस्यचिदादिमत्त्वं भवेत् यदवधिकतयानेन कल्पं भुक्तमनेन तु कल्पद्वयम् अत एव च चिरक्षिप्रलक्षणात्प्रतिनियताद्भोगक्रमात्कर्मणामपि साम्यमित्याह

आदिमत्त्वे हि कस्यापि
वर्गादस्माद्भवेदियम् ।
वैचित्री भुक्तमेतेन
कल्पमेतेन तु द्वयम् ॥७६॥

इयतो भोगपर्यायाः
त्स्यात्साम्यं कर्मणामिति ।

न चैतद्भवतामिति सर्वथा सावद्यमेवैतत् ॥ ७६ ॥

एवं च न केवलमियदेव अवद्यं यावदन्यदपीत्याह

अनेन नयबीजेन
मन्ये वैचित्र्यकारणम् ॥७७॥
जगतः कर्म यत्कृतं
तत्तथा नावकल्पते ॥

अनेन इति समनन्तरोक्तेन कर्माद्यनादित्वाविशेषलक्षणेन इत्यर्थः । मन्ये इति संभावनायाम् ॥ ७७ ॥

तदनवकल्पनमेव उपपादयति

अनादिमलसंच्छन्ना
अणवो दृक्क्रियात्मना ॥७८॥
सर्वे तुल्याः कथं चित्रां
श्रिताः कर्मपरम्पराम् ।

इह अणूनामनादिमलसंच्छन्नत्वात् अविशेष एव सर्वथा,—इति कर्मपरम्पराश्रयणेऽपि अविशिष्टत्वमेव एषां न्याय्यं तत्कर्मण एव वैचित्र्यं नास्ति,—इति कथं तज्जगद्वैचित्र्येऽपि निमित्ततामियात् ॥ ७८ ॥

अथात्र भोगलोलिका चेन्निमित्तं तत्तस्या अपि कुतस्त्यं वैचित्र्यमित्याह

भोगलोलिकया चेत्सा
विचित्रेति कुतो ननु ॥७९॥

सेति भोगलोलिका। ननु इति आक्षेपे॥७९॥

अथ भोगलोलिकाया अपि वैचित्र्ये कर्मवासनावैचित्र्यं निमित्तमित्युच्यते, तत्पुनरपि स एव दोषस्तद्वैचित्र्येऽपि किं निमित्तमितीत्याह

अनादि कर्मसंस्कार-
वैचित्र्यादिति चेत्पुनः।
वाच्यं तदेव वैचित्र्यं
कुतो नियतिरागयोः ॥८०॥

महिमा चेदयं तौ किं
नासमञ्जस्यभागिनौ ।

अनादीति क्रियाविशेषणम् । तेन अनादि कृत्वा कर्मवासनावैचित्र्यात्सा विचित्रेत्यर्थः । एवं कर्मसंस्कारस्तावत्कर्माहित इति तद्वैचित्र्ये कर्मवैचित्र्यं निमित्तं, तत्रापि भोगलोलिका, तत्रापि कर्मसंस्कारवैचित्र्यं, तत्रापि कर्मवैचित्र्यम्,—इत्येवं विपरिवर्तमानो मूलक्षतिकरोऽयं दुरतिक्रमश्चक्रकचपातः । अथोच्यते नैतद्भोगलोलिकाया वैचित्र्ये निमित्तं, किंतु नियतिरागयोरिदं विजृम्भितम्,—इत्याह नियतीत्यादि । रागस्य हि किंचिन्मे भूयादिति भोगलोलिकैव रूपम् । इदमेव इति तु नियतेः रूपम् । ततस्तावेव भोगलोलिकवैचित्र्यकारिणाविति । एतदपि न,—इत्याह तावित्यादि । नियतिर्हि तत्र तत्र विषयवैचित्र्येणैव नियच्छति, रागो वा रञ्जयति,—इति तद्वैचित्र्येऽपि अन्यन्निमित्तमन्वेष्यम्, तत्राप्यन्यदिति मूलक्षतिकारिणी व्यक्तमनवस्थापतेत् ॥ ८० ॥

अथ ईश्वरेच्छा कर्मवैचित्र्ये निमित्तमित्युच्यते, तदपि नेत्याह

ईश्वरेच्छानपेक्षा तु
भेदहेतुर्न कल्पते ॥८१॥

सा न तावत्सापेक्षा मलकर्मातिरिक्तस्य अपेक्षणीयस्य अभावात् कर्मवैचित्र्ये च कार्ये तदयोगात्, नापि अनपेक्षा ईश्वरस्य वीतरागद्वेषत्वात् सर्वान्प्रति अविशिष्टतया तद्वैचित्र्यानुपपत्तेः ॥ ८१ ॥

ननु न कदाचिदनीदृशं जगदित्यादिवेदनादेव कर्मवैचित्र्यमेवमवस्थितम्,– इति किमनया निमित्तपर्येषणया इत्याह

अथानादित्वमात्रेण
युक्तिहीनेन[1] साध्यते ।
व्यवस्थेयमलं तर्हि
मलेनास्तु वृथामुना ॥८२॥

एवं तर्हि अनादि विचित्रं कर्मैव सर्वव्यवस्थासहिष्णु भविष्यति,–इति किं नाम

१ क० ख० ग० पु० बुद्धिहीनेनेति पाठः ।

अनेन व्यर्थेन मलेन अभ्युपगतेन इत्युक्तम् 'अलं तर्हि मलेनास्तु वृथामुना' इति ॥८२॥

एतदेव उपपादयति

तथाहि कर्म तावन्नो
यावन्माया न पुद्गले ।
व्याप्रियेत न चाहेतु-
स्तद्वृत्तिस्तन्मितो मलः ॥८३॥

इत्थं च कल्पिते माया-
कार्ये कर्माणि हेतुताम् ।
अनादि कर्म चेद्गच्छे-
त्किं मलस्योपकल्पनम्॥८४॥

इह तावदेवंविधा व्यवस्था यदात्मनां प्रलयकालव्यवस्थायां यावन्मायीयो मलो न व्यापृतः तावत्कार्म एव न संभवेत्, अन्यथा हि एषां पुनः कलादियोगो न घटेत । न चास्याहेतुकत्वं न्याय्यं नित्यं सत्त्वस्यासत्त्वस्य वा प्राप्तेः। तस्मात्कार्ममलान्यथानुपत्त्या तद्धेतुराणवाख्यो मलोऽनुमित इति । यदागमोऽपि

'निमित्तमभिलाषाख्यं नैमित्तिकमतः परम् ।'

इति । एवमपि मायापदवर्तिनि कर्माणि यदि अनादितद्वासनात्मकं कर्मैव हेतुतयाभ्युपगम्यते तद्व्यर्थं मलस्योपकल्पनमिति ॥ ८४ ॥

यदि नाम चैतदभ्युपगम्यते माभून्मल इति, तन्न काचन भवन्मते भोगापवर्गभूता कर्मव्यवस्था सिद्ध्येत्,—इत्याह

ननु माभून्मलस्तर्हि
चित्राकारेषु कर्मसु ।
सन्तत्यावर्तमानेषु
व्यवस्था न प्रकल्पते ॥८५॥

असति हि मले विचित्राकारतया सन्तन्यमानमपि कर्म जीवन्मुक्तमिव सर्वं प्रति अकिंचित्करमेव,—इति नास्य भोगहेतुतयावस्थानमवकल्पते, नापि अपवर्गहेतुतया। सा हि साम्ये सत्यस्य घटते । तच्च विचित्राकारत्वादस्य न कदाचिदपि स्यात् । यत् आदौ मध्ये च विचित्रत्वात् साम्यं न सहते तत्कथमन्तेऽपि तथा भवेदिति भावः ॥ ८५ ॥

तदाह

---

१ क० ख० ग० मन्तव्या वर्तमानेति पाठः ।

आदौ मध्ये च चित्रत्वा-
त्कर्मणां न यथा समः ।
आत्माकारोऽपि कोऽप्येष
भाविकाले तथा भवेत् ॥८६॥

एकः अपिशब्दो भिन्नक्रमः, तेन भाविकालेऽपीति। एष इति कोऽपि आत्माकारः भवेदिति न समः । इदमत्र आकूतं,—भवतां हि मले सति कर्म यस्यापि साम्ये तत्परिपाकोऽपवर्गनिमित्तमिति मतम् । यत्र च मल एव नास्ति तत्र कः कर्मार्थो यदपेक्षयापि एवं स्यादिति ॥ ८६ ॥

एवमुच्छिन्न एव भवदभिमतो बन्धमोक्षविभागः, कृतं च शास्त्राडम्बरेण,—इत्याह

इत्थमुच्छिन्न एवायं
बन्धमोक्षादिकः क्रमः ।
अज्ञानाद्बन्धनं मोक्षो
ज्ञानादिति परीक्षितम् ॥८७॥

ननु आस्तामेतत्, अभ्युपगम्यापि मलं कर्मसाम्यं न संगच्छते,—इत्याह

विरोधे स्वफले चैते
कर्मणी समये क्वचित् ।
उदासाते यदि ततः
कर्मैतत्प्रतिबुध्यताम् ॥८८॥
शिवशक्तिनिपातस्य
कोऽवकाशस्तु तावता ।

यदि नाम कस्मिंश्चित्काले विरुद्धे कर्मणी भोगदानं प्रति रुद्धे तिष्ठतस्तदौचित्यादन्तरा कर्मान्तरमेव किंचित्प्रतिबुध्यतां, तत्प्रतिक्षेपेण स्वमेव फलं दातुं समुज्जृम्भताम्। तावता कर्मप्रतिरोधमात्रेणैव पुनरकाण्डकूष्माण्डन्यायेन शिवशक्तिनिपातस्य कोऽवसरः ॥ ८८ ॥

एवं हि प्रलयदशायां युगपदेव अणूनां तन्निपातः प्रसजेत् तदानीं सर्वकर्मणां भोगदाने प्रतिरुद्धशक्तित्वात्, नच कर्मसाम्येऽभ्युपगम्यमाने शिवशक्तिनिपातेन कश्चिदर्थ इत्याह

क्वापि काले तयोरेत-
दौदासीन्यं यदा ततः ॥८९॥
कालान्तरे तयोस्तद्व-
द्विरोधस्यानिवृत्तितः ।
अतश्च न फलेतान्ते
ताभ्यां कर्मान्तराणि च ॥९०॥
रुद्धानि प्राप्तकालत्वा-
द्वताभ्यामुपभोग्यताम् ।
एवं सदैव वार्तायां
देहपाते तथैव च ॥९१॥
जाते विमोक्ष इत्यास्तां
शक्तिपातादिकल्पना ।

यदि नाम हि कस्मिंश्चित्काले विरुद्धे कर्मणी रुद्धे तिष्ठतस्तदुत्तरकालमपि विरोधस्य अनिवृत्तत्वात् तथैव आसाते, कर्मान्तराणि च प्राप्तकालानि उपभोग्यतागमनेन प्राप्तकाल-त्वात् रुन्धाते,—इति कदाचिदपि किमपि कर्म न फलेत् । एवं च सदातन्यां वार्तायां क्रमा-

दायुष्प्रदस्य कर्मणोऽप्यन्तरा क्षैण्यात् देहपातोऽवश्यं भवेत्,—इति अयत्नत एव मोक्षः सिद्ध्येत्। तत्

'अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्।'

इति भङ्ग्या व्यर्थं शक्तिपातपरिकल्पनमिति॥९१॥

अथोच्यते रुद्धे सती कर्मणी सदैव कर्मान्तरमपि रुन्धाते, किंतु उत्तरकालं कदाचिदपि तत्फलेत् इति। तत्प्रथम एव क्षणे तत्फलतु नियतनिमित्तावचनात् किं कर्मान्तरप्रतीक्षणेन,—इत्याह

अथोदासीनतत्कर्म-
द्वययोगक्षणान्तरे ॥९२॥
कर्मान्तरं फलं सूते
तत्क्षणेऽपि तथा न किम्।

अथ न तत्र कर्मान्तरं किंचित्फलेत्, अपितु ते एव प्रतिबन्धवर्जिते रुद्धे कर्मणी फलत इतीष्यते, तत्तयोः प्रतिबन्धवर्जनमेव किं-कृतमित्याह

क्षणान्तरेऽथ ते एव
प्रतिबन्धविवर्जिते ॥९३॥
फलतः प्रतिबन्धस्य
वर्जनं किंकृतं तयोः ।

तदपि तयोः किं स्वतः परतो वा। स्वतश्चेत् आदावेव अस्तु, परतश्चेत्कुत इत्यनवधारणादास्तामेतत् ॥ ९३ ॥

ननु कर्मसाम्यमपेक्ष्य परमेश्वरः शक्तिपातं कुर्यादित्युक्तम्, नच तदुभयमपि स्वयमविचित्रत्वात् तीव्रमध्यमन्दादिभेदभिन्ने शक्तिपातवैचित्र्ये निमित्तं भवितुमर्हति,—इत्याह

कर्मसाम्यं स्वरूपेण
न च तत्तारतम्यभाक् ॥९४॥
न शिवेच्छेति तत्कार्ये
शक्तिपाते न तद्भवेत् ।

न च तारतम्यभागिति, साम्यात्मकत्वात् नित्यत्वाच्च । तादिति तारतम्यम्। कारणगुणप्रक्रमेण हि कार्येण भाव्यमिति भावः ॥९४॥

एवमनुग्रहवन्निग्रहोऽपि भवन्मते न घटते इत्याह

तिरोभावश्च नामायं
स कस्मादुद्भवेत्पुनः ॥९५॥
कर्मसाम्येन यत्कृत्यं
प्रागेवैतत्कृतं किल ।

इयदेव हि कर्मसाम्यस्य कृत्यं यत्तदपेक्ष्य अणूनामीश्वरः शक्तिपातं कुर्यादिति । तच्च अनेन प्रागेव कृतमिति पुनस्तदनन्तरमपि तिरोभावो नाम कस्मादुद्भवेत्, तदुद्भवे न किंचिन्निमित्तं उत्पश्याम इत्यर्थः । न तावन्मलं तस्य परिपक्वत्वात्। नहि तत्कृतकार्यत्वात् परिपक्वं सत् पुनरपि पुंबन्धकतया परिणमेत्। एवं हि यत्नसंस्थापितापि शास्त्रव्यवस्था विसंस्थुलतां यायात् । नापि कर्ममलसहकृतस्यैवास्य भोगदानं प्रति सामर्थ्यम्, नापि तत्साम्यं तस्य शक्तिपातमात्रहेतुतया चरितार्थत्वात् ॥९५॥

ननु किमेभिरेश्वरेच्छैवास्य हेतुरुच्यतामित्याह

हेतुत्वे चेश्वरेच्छाया
वाच्यं पूर्ववदेव तु ॥९६॥

तत्र हि न तावदियं निरपेक्षा तद्धेतुरित्युक्तं प्राग्बहुशः। नापि सापेक्षा मलकर्माभ्यामन्यस्य अपेक्षणीयस्य अभावात् तिरोभावे च कार्ये तदयोगात्। तत्पराहतं भेदवादिनामीश्वरः पञ्चकृत्यकारीति ॥ ९६ ॥

अनयैव भङ्ग्या च किमीश्वरेच्छा नित्यहेतुरेवं कुर्यात् उत अनित्यहेतुः,—इत्यादिकल्पनान्तराण्यपि परिकल्पितानि निरस्तानि,—इत्याह

एतेनान्येऽपि येऽपेक्ष्या
ईशेच्छायां प्रकल्पिताः।
ध्वस्तास्तेऽपि हि नित्यान्य-
हेत्वहेत्वादिदूषणात् ॥९७॥

तत्र अहेतुत्वे नित्यं सत्त्वमसत्त्वं वेति दोषः। नित्यहेतुत्वे नित्यं सत्त्वमेव। अनित्यहेतुत्वे च को नामायमनित्योऽन्यो हेतुरिति तदनवधारणान्न किंचित्सिद्ध्येदिति ॥ ९७ ॥

---

१ घ० पु० चेश्वरेच्छादेरिति पाठः

अथोच्यते वैराग्याद्यपेक्ष्य परमेश्वरः शक्तिपातं विदध्यादिति, तदपि नेत्याह

वैराग्यं भोगवैरस्यं
धर्मः कोऽपि विवेकिता ।
सत्सङ्गः परमेशान-
पूजाद्यभ्यासनित्यता ॥९८॥
आपत्प्राप्तिस्तन्निरीक्षा[1]
देहे किंचिच्च लक्षणम् ।
शास्त्रसेवा भोगसंघ-
पूर्णता ज्ञानमैश्वरम् ॥९९॥
इत्यपेक्ष्यं यदीशस्य
दूष्यमेतच्च पूर्ववत् ।

एतच्च पूर्ववदूष्यमिति, यदपेक्षणीयस्य वैराग्यादेरहेतुत्वे नित्यं सत्त्वमसत्त्वं वेति दोषः। सहेतुत्वे च किं नित्यो हेतुः कादाचित्को वा। तत्राद्ये नित्यं सत्त्वमेव, इतरत्र च कोऽन्यः कादाचित्को हेतुः। न तावदीश्वरेच्छा, तथात्वे

१ क. पु. आपत्प्राप्तिस्तन्निरीक्षेति पाठः

ह्यन्योन्याश्रयः। नापि मलपरिपाकः कर्मसाम्यं वा। एवं हि शक्तिपाते कार्ये तदेव ईश्वरोक्तवदपेक्षणीयमस्तु, किमेभिरपि अन्तरापरिकल्पितैः। न च इतरदपि कारणं किंचिद्वक्तुं शक्यं तस्यापि नियमायोगात् ॥ ९९ ॥

ननु इह वैराग्यादयस्तावच्छक्तिपातवदव्यभिचरितसहभावाः सर्वत्र दृश्यन्त इत्येतावता इदं संभाव्यते यन्नूनं वैराग्याद्यपेक्ष्य परमेश्वरः शक्तिपातं विदध्यादिति, अन्यथा हि कथमेषामेतत्सहभावो भवेत्, तत्र पुरःस्थितानां वैराग्यादीनां

'कार्यं चेदुपलभ्येत किं कारणपरीक्षया।'

इति न्यायेन किमेवं कारणान्वेषणेन,—इत्याह

व्यभिचारश्च सामस्त्य-
व्यस्तत्वाभ्यां स्वरूपतः १००
अन्योन्यानुप्रवेशश्चा-
नुपपत्तिश्च भूयसी।

इह शक्तिपाते कार्ये किमीश्वरेण वैराग्यादयः समस्ता अपेक्ष्याः उत व्यस्ताः, उभय-

थापि व्यभिचारः। तत्र न तावत्समस्ताः शक्तिपातवतां तथारूपत्वादृष्टेः। नापि व्यस्ताः बौद्धादीनां वैराग्येऽपि शक्तिपाताभावात्। वैराग्यादयश्च परस्परान्तर्भावादियन्तोऽपि न संभवन्ति,—इत्याह 'स्वरूपतोऽन्योन्याश्रयानुप्रवेशश्च' इति। यतः

'वैराग्यं नाम भोगेभ्यो वैमुख्यमुच्यते इति।'

ततः पृथग्भोगवैरस्यं न वाच्यं तत्रैवास्य अन्तर्भावात्। भूयसी च इयमनुपपत्तिर्यदियदपेक्षते परमेश्वर इति। किंचिन्मात्रमपेक्षमाणस्यापि हि स्वातन्त्र्यं खण्ड्येत, किं पुनरियद्वस्तुजातं यत्रैकतराभावेऽपि न किंचित् सिध्येदिति। तद्धिगिदमैश्वर्यं यत्स्वेच्छयैव न किंचिदपि कर्तुं पार्यत इति। यदाहुः

'राज्यमिव मन्त्रिपरवशमैश्वर्यं कोपयुज्यते तादृक्।
यत्रापरनिरपेक्षं रुच्यैव न रच्यते किंचित्॥'

इति॥ १००॥

तद्भेदवादिनां कस्तावच्छक्तिपातविधौ क्रम इति न जानीम इत्याह

तस्मान्न मन्महे कोऽयं
शक्तिपातविधेः क्रमः॥१०१॥

एवं शक्तिपातविधौ परकीयमतमनुवादपुरःसरं निराकृत्य, स्वमतं दर्शयितुमाह

इत्थं भ्रान्तिविषावेश-
मूर्च्छानिर्मोकदायिनीम् ।
श्रीशंभुवदनोद्गीर्णां
वच्म्यागममहौषधीम् ॥ १०२॥

तदेव प्रकटयति

देवः स्वतन्त्रश्चिद्रूपः
प्रकाशात्मा स्वभावतः ।
रूपप्रच्छादनक्रीडा-
योगादणुरनेककः ॥ १०३॥

इह एक एव परमेश्वरश्चिद्रूपः सन् प्रकाशात्मा, नतु सूर्यादिप्रकाशान्तरवत् जडः । अत एव स्वतन्त्रोऽत एव निखिलजगल्लयोदयक्रीडाकारित्वात् देवः स्वभावत एव नतु किंचिदपि अपेक्ष्य । परिपूर्णदृक्क्रियास्वभावस्य एकस्यैव आत्मनो गोपनेन संकुचितदृक्क्रियात्माणुरनेककः

परिगृहीतकृत्रिमानेकरूपः संवृत्तो येनायमि-यतः संसारस्य समुल्लासः ॥१०३॥

ननु एतावता कः संसारार्थ इत्याशङ्क्याह

स स्वयं कल्पिताकार-
विकल्पात्मककर्मभिः ।
बध्नात्यात्मानमेवेह
स्वातन्त्र्यादिति वर्णितम्॥१०४॥

इह हि स एव स्वेच्छावशात्परिकल्पिततत्त-दाकारैरिदं कार्यम् इदमकार्यम् इत्येवंविधवि-विधविकल्पमात्रपरमार्थैः कर्मभिः

'तत्रापि कार्ममेवैकं मुख्यं संसारकारणम् ।'
(ई. प्र. ३ अ. १० श्लो०)

इत्युक्तया मुख्यया वृत्त्या कार्मेण मलेन स्व-स्वातन्त्र्यादात्मानं बध्नाति तत्तज्जात्यायुर्भोग-वैचित्र्येण संसरति,—इति नवमाह्निकादावुक्तप्रा-यम्,—इति किं पुनस्तत्प्रपंचनेनेत्यर्थः ॥१०४॥

न केवलं स्वातन्त्र्यादात्मानं बध्नात्येव याव-न्मोचयत्यपीत्याह

स्वातन्त्र्यमहिमैवायं
देवस्य यदसौ पुनः ।

स्वं रूपं परिशुद्धं स-
त्स्पृशत्यप्यणुतामयः ॥१०५॥

इदमपि हि नाम अस्य स्वातन्त्र्यविजृम्भितमेव यदणुरूपोऽपि सन्नसौ प्रत्यावृत्त्या स्वयं परिशुद्धं रूपं स्पृशति, गोपितमपि पूर्णदृक्क्रियास्वभावमात्मानं प्रकटयति इत्यर्थः ॥१०५॥

ननु यद्येवं तत्कस्मात्कस्मिंश्चिदेव पुंस्यसावेवमात्मानमभिव्यनक्ति, किमन्यत्र अस्य प्रद्वेष इत्याशङ्कां निरवकाशयति

नं[1] वाच्यं तु कथं नाम
कस्मिंश्चित्पुंस्यसौ तथा ।
नहि नाम पुमान्कश्चि-
द्यस्मिन्पर्यनुयुज्यते ॥१०६॥

नहि अस्मद्दर्शने भेदवादिवत् तदतिरिक्तः कश्चित् पुमान् नाम संभवेत् यत्रायं पर्यनुयोगः स्यात् सर्वानेव मोचयतु मा वा कंचिदिति । यावता हि देव एवासौ स्वातन्त्र्यात् शुद्धा-

---

१ ब० पु० नच वाच्येति पाठः

शुद्धात्मतया प्रथते यदस्य तादृशमेव स्वं रूपमिति ॥ १०६ ॥

ननु भवतु नामैवं, तथापि भेददशाधिशायित्वेऽस्य किं नायं पर्यनुयोग इति। ननु एवं चेन्मन्यसे कः पर्यनुयोगार्थ इत्याह

देव एव तथासौ चेत्
स्वरूपं चास्य तादृशम् ।
तादृक्प्रथास्वभावस्य
स्वभावे कानुयोज्यता॥ १०७॥

कानुयोज्यतेति न काचिदित्यर्थः। अपर्यनुयोज्यो हि भावस्वभाव इति भावः ॥१०७॥

न चैतदस्माभिरेवोक्तमित्याह

आहास्मत्परमेष्ठी च
शिवदृष्टौ गुरूत्तमः ।

एतदेवाह

पञ्चप्रकारकृत्योक्ति-
शिवत्वान्निजकर्मणे ॥ १०८॥
प्रवृत्तस्य निमित्ताना-
मपरेषां क्व मार्गणम् ।

सृष्ट्यादिपञ्चप्रकारं कृत्यं यस्य तस्योक्तिः पंचविधकृत्योऽयमिति एवंस्वभावं यच्छिवत्वं तस्मात्, अनुग्रहाद्यात्मने निजकर्मणे प्रवृत्तस्य अस्य देवस्य अपरेषां रागद्वेषादीनां निमित्तानां क्व मार्गणं निमित्तान्वेषणप्रसंगस्यैव अभावात्, कथमेवमात्मस्वरूपाभिव्यक्तिलक्षणमनुग्रहं विदध्यादिति न पर्यनुयोज्यम् ॥

ननु कर्मणि तत्फलोपभोगे वा कर्तव्ये निमित्तमन्तरेण पुंसः प्रवृत्तिरेव न भवेत्, तत्किमेतदुक्तमपरेषां निमित्तानां क्व मार्गणमिति इत्याशङ्क्याह

छन्नस्वरूपताभासे
पुंसि यद्यादृशं फलम् ॥१०९॥
तत्राणोः सत एवास्ति
स्वातन्त्र्यं कर्मतो हि तत्।

परिगृहीतसंकोचे हि पुंसि तीव्रमन्दादिरूपं यत्सुखाद्यात्म फलं, तत्र भोक्तव्ये यत्तस्य भुजिक्रियाविषयं स्वातन्त्र्यं कर्तृत्वं तदणोः सत एव। यतस्तत्कर्मजं नतु सहजमिति तत्र स्त्र्यादि निमित्तान्तरमवश्यमृग्यमन्यथा हि कथं तदनुभव एव भवेत् ॥

ननु एवं स्वरूपगोपनात्मनि अणुत्वे सति कार्मः, ततस्तन्निमित्तकः संसार इति तयोः सर्ववादिप्रतिपन्नमनादित्वं व्याहन्येत इत्याशङ्क्याह

ईश्वरस्य च या स्वात्म-
तिरोधित्सा निमित्तताम् ॥ ११० ॥
साभ्येति कर्ममलयो-
रतोऽनादिव्यवस्थितिः ।

इह ईश्वरस्य स्वरूपतिरोधित्सैव तावदाणवस्य मलस्य कारणं यत्स्वरूपाख्यातिरेव तत्, अख्यातिनान्तरीयकमेव च कर्म यत्पूर्णे रूपे तद्योगो नास्ति इति मलवत्तस्यापि सैव कारणमिति मलकर्मणोरनादित्वे समानः पन्थाः, किंतु उत्पन्नं सत् कर्ममलमपि अपेक्षते । यदुक्तं

'निमित्तमभिलाषाख्यं नैमित्तिकमतः परम् ।'

इति ॥

ननु एवमख्यातिराणवं मलमस्तु, अभिलाषरूपता पुनरस्य कुतस्त्या, यदभिलाषक्रियायां कर्ता तावन्नास्ति तस्य गोपितस्वरूपत्वात् । नापि तत् कर्म अभिलषणीयस्य इदानीन्तनक्षणं यावदनुल्लसितत्वात् । तत्कथं 'निमित्तमभिला-

षाख्यम्' इत्यादिरागमः प्रमाणतां यायादित्याशङ्क्याह

तिरोधिः पूर्णरूपस्या-
पूर्णत्वं तच्च पूरणम् ॥१११॥
प्रति भिन्नेन भावेन
स्पृहातो लोलिका मलः ।

इह खलु पूर्णस्य रूपस्य तिरोभावो नाम अपूर्णत्वमुच्यते। तच्च भिन्नेन भावेन पूरणं प्रति स्पृहा योग्यतया तदौन्मुख्यमात्रमतो लोलिका इति अभिलाष इति च मलः सर्वशास्त्रेषु उद्घोष्यते इति युक्तमुक्तम्

'.....अभिलाषो मलोऽत्र तु ।' (स्व० ४।१०९)

इति ॥

ननु भेदवादिवन्मलादीनामीश्वरस्य च

'यथानादिप्रवृत्तोऽयं घोरः संसारसागरः ।
शिवोऽपि हि तथानादिः संसारान्मोचकः स्मृतः ॥'

इत्यादिनीत्या तुल्यकक्ष्यतयैव अनादित्वमुच्यतां, किमेवं प्रक्रियागौरवकारिणा हेतुहेतुमद्भावपरिकल्पनेनेत्याशंक्याह

विशुद्धस्वप्रकाशात्म-
शिवरूपतया विना॥११२॥

न किंचिद्युज्यते तेन
हेतुरत्र महेश्वरः ।

इह मलादीनां सत्तान्यथानुपपत्त्या विशुद्ध-स्वप्रकाशात्ममहेश्वरसंविद्विश्रान्तिरेव तत्त्वमित्यत्र महेश्वर एव हेतुः, यत्प्राक्

'यत्तत्र नहि विश्रान्तं तन्नभःकुसुमायते ।' (८।३)

इत्युक्तम् ॥

ननु यद्येवं, तत्किमेभिरन्तर्गडुप्रायैर्मलादिभिरीश्वरेच्छैव विश्वसर्गादौ निरपेक्षा निमित्तमस्तु इत्याशंक्याह

इत्थं सृष्टिस्थितिध्वंस-
त्रये मायामपेक्षते ॥११३॥
कृत्यै मलं तथा कर्म
शिवेच्छैवेति सुस्थितम् ।

इह खलु उक्तयुक्त्या विश्वत्र सृष्टिस्थितिसंहारलक्षणं निजं कृत्यत्रयं कर्तुमीश्वरेच्छैव प्रगल्भते, किंतु मलं कर्म मायां चापेक्ष्य । यत्परमेश्वरः

'शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः ।'

इत्युक्त्या मायीयेऽध्वनि अनन्तमुखेन सृष्ट्या-

दि विदध्यात्। न च तस्य ईश्वरवदनन्यापेक्षमेव स्वातन्त्र्यं समस्ति इति अवश्यमस्य मलाद्यपेक्षणीयम्। अन्यथा हि कथं प्रतिपुं विचित्रं सृष्ट्यादि स्यादिति सर्वं सुस्थम्॥

ननु परमेश्वरः सृष्ट्यादौ कृत्यत्रये मलाद्येवमपेक्षते इत्युक्तम्, अवशिष्टे पुनरनुग्रहादौ कृत्यद्वये किं तदपेक्षते नवा इत्याशंक्याह

यत्तु कस्मिंश्चन शिवः
स्वेन रूपेण भासते ॥११४॥

ननु इदमर्धजरतीयं, यदीश्वरः किंचित्कृत्यं सापेक्षं कुर्यात् किंचिच्च निरपेक्षमित्याशंक्याह

तत्रास्य नाणुगे तावदपेक्ष्ये मलकर्मणी।
अणुस्वरूपताहानौ
तद्गतं हेतुतां कथम् ॥११५॥
व्रजेन्मायानपेक्षत्व-
मत एवोपपादयेत्।

यन्नाम हि मलाद्यणुतायां निमित्तं तत्कथं तदपगमे हेतुतां यायात्, नहि घटस्य घटतायां

निमित्तं मृच्चक्रसूत्रादि तन्नाशे कर्परादिजनने वा कश्चिदपेक्षते,—इति युक्तमुक्तमस्यानुग्रहे कार्ये तद्विरुद्धे मलकर्मणी नापेक्ष्ये इति। एवमत्र मायानपेक्षत्वमपि उपपादनीयम्। यत्र हि मलाद्यपि नापेक्षणीयं, तत्र का वार्ता तदपेक्षाया इत्युक्तं मायानपेक्षत्वमत एवोपपादयेदिति॥

तस्मादनुग्रहे कर्तव्ये परमेश्वरस्यैव अनन्यापेक्षं युक्तं कर्तृत्वमित्याह

तेन शुद्धः स्वप्रकाशः
शिव एवात्र कारणम्॥११६॥

ननु यद्येवमनन्यापेक्ष एव अनुग्रहं परमेश्वरः कुर्यात्, तत्तस्य तरतमभावः कुतस्त्य इत्याशंक्याह

स च स्वाच्छन्द्यमात्रेण
तारतम्यप्रकाशकः।

ननु स्वाच्छन्द्यमात्रेण इत्यसिद्धं, यल्लोकधर्मिण इव कस्यचित्कर्माद्यपेक्ष्यापि पारमेश्वर्यनुग्रहशक्तिर्निपतेदित्याशंक्याह

कुलजातिवपुष्कर्म-
वयोनुष्ठानसंपदः ॥११७॥
अनपेक्ष्य शिवे भक्तिः
शक्तिपातोऽफलार्थिनाम् ।
या फलार्थितया भक्तिः
सा कर्माद्यमपेक्षते ॥११८॥
ततोऽत्र स्यात्फले भेदो
नापवर्गे त्वसौ तथा ।

शिवे भक्तिरेव शक्तिपात इति लिङ्गलिङ्गि-नोरभेदोपचारात् । भक्तिर्हि नाम अस्य प्राथमिकं चिह्नम् । यदुक्तम्

'तत्रैतत्प्रथमं चिह्नं रुद्रे भक्तिः सुनिश्चला ।'(मा०वि० १४।८)

इति । अफलार्थिनामिति मुमुक्षूणाम् । आद्यमिति प्राक्तनम् । अपेक्ष्यमाणं च कर्म विचित्रं, तत् तत्फलेऽपि वैचित्र्यमित्युक्तं ततोऽत्र स्यात्फले भेद इति । कर्मानपेक्षत्वादपवर्गे पुनरयं भेदो नास्ति इत्याह नापवर्गे त्वसौ तथेति ॥

ननु यस्य एकैव अविभक्ता भुक्तिमुक्तिविषया भक्तिस्तस्य कथमसौ एकत्र कर्मापेक्षतेऽपरत्र न इति संगच्छतां नाम इत्याशंक्याह

भोगापवर्गद्वितया-
भिसंधातुरपि स्फुटम् ॥ ११९ ॥
प्राग्भागेऽपेक्षते कर्म
चित्रत्वान्नोत्तरे पुनः ।

चित्रत्वादिति । यदुक्तम्

'कार्ये विशेषमाधित्सुर्विशिष्टं कारणं स्पृशेत् ।
सन्ति भोगे विशेषाश्च विचित्राः कर्मसंगताः ॥'

इति । उत्तर इति अपवर्गे । यदुक्तम्

'मुमुक्षोर्न विशेषाय नैःश्रेयसपथं प्रति ।
नहि ब्रह्मणि शंसन्ति..... ॥'

इति । एवमाद्यः परः शक्तिपातो, द्वितीयस्त्वपर इति सिद्धम् । यद्वक्ष्यति

'इदं सारमिह ज्ञेयं परिपूर्णचिदात्मनः ।
प्रकाशः परमः शक्तिपातोऽवच्छेदवर्जितः ॥
तथाविधोऽपि भोगांशावच्छेदेनोपलक्षितः ।
अपरः शक्तिपातोऽसौ पर्यन्ते शिवतामदः ॥'(१३।२५२)

इति ॥

ननु एवमीश्वरास्तिरोभावेऽपि किं सृष्ट्यादिवन्मलाद्यपेक्षते किमुत अनुग्रहवन्न इत्याशंक्य, गर्भीकृतमलादिनैरपेक्ष्यं तत्स्वरूपमेव तावदभिधत्ते

अनाभासितरूपोऽपि
तदाभासितयेव यत् ॥१२०॥
स्थित्वा मन्त्रादि संगृह्य
त्यजेत्सोऽस्य तिरोभवः ।

कश्चिद्धि वस्तुतोऽनुग्रहशक्तिपाताभावात् अनाभासितरूपोऽपि परमेश्वरेच्छयैव पराविप्रलम्भाय दाम्भिकतया भक्तिश्रद्धादिदर्शनेन आभासितरूपतयेव स्थित्वा शैवशास्त्रोक्तं मन्त्रादि सम्यग्दीक्षादिपूर्वं गृहीत्वा पश्चादादराभावात् यत्त्यजेत् सोऽस्य तिरोभवः । तिरोहितस्यापि स्वस्वरूपस्य गण्डोपरिपिटकोद्भेदन्यायेनाभिधानं येनास्य कदाचिदपि संसारान्निःसरणं न स्यात् । यदुक्तमनेनैवान्यत्र

'कश्चित्त्वीशेच्छया सम्यगनाश्वस्तेन चेतसा ।
निन्दन्नेव भजेच्चर्यां स तिरोहित उच्यते ॥
निन्द्यमानमहामन्त्रविद्याचर्यादिकोपजम् ।
पाप्म तं पातयेद्घोरे यातनाधाम्नि सर्वथा॥' (तं०व०धा० ३।७३)

इति ॥

इदानीम् 'आगममहौषधीं वच्मि' इत्युपक्रान्तं निर्वाहयितुमाह

श्रीसारशास्त्रे भगवा-
न्वस्त्वेतत्समभाषत ॥१२१॥

एतद्वस्तु इति अस्मदभिमतशक्तिपातविधिलक्षणम् ॥ १२१ ॥

तदेवाह

धर्माधर्मात्मकैर्भावै-
रनेकैर्वेष्टयेत्स्वयम् ।
असन्देहं स्वमात्मान-
मवीच्यादिशिवान्तके ॥१२२॥
तद्वच्छक्तिसमूहेन
स एव तु विवेष्टयेत् ।
स्वयं बध्नाति देवेशः
स्वयं चैव विमुञ्चति ॥१२३॥
स्वयं भोक्ता स्वयं ज्ञाता
स्वयं चैवोपलक्षयेत् ।
स्वयं भुक्तिश्च मुक्तिश्च
स्वयं देवी स्वयं प्रभुः ॥१२४
स्वयमेकाक्षरा चैव
यथोष्मा कृष्णवर्त्मनः ।

अनेकैर्धर्माधर्मात्मकैर्भावैरिति मुख्यतया संसारकारणेन विचित्रेण कार्मेण मलेन इत्यर्थः। तद्वदिति स्वयमेव स्वमात्मानं, शक्तिसमूहेन इति वामाज्येष्टादिरूपेण, विवेष्टयेदिति अधितिष्ठेत्। अत एवोक्तं स्वयमेव बध्नाति इति स्वयमेव विमुंचति इति। अत एवोक्तं भोक्तेति ज्ञातेति च यद्भोग एव बन्धो ज्ञातृत्वमेव च मोक्ष इति । न चास्य तावतिरिक्तावित्युक्तं स्वयं भुक्तिश्च मुक्तिश्चेति। अत एव सर्वमिदं विश्वं स्वात्ममयतयैव पश्येदित्याह स्वयमेव उपसमीपे लक्षयेदिति। देवीति शक्तिः। एकाक्षरेति पराभट्टारिका। एतदेव व्यनक्ति यथोष्मा कृष्णवर्त्मन इति । यथोच्यते

'वह्नेरूष्मेव विज्ञेया.....।' (ने०त०१।२६)

इति ॥

एतदेव तात्पर्यतो व्याचष्टे

वस्तूक्तमत्र स्वातन्त्र्या-
त्स्वात्मरूपप्रकाशनम् ॥ १२५

अत्र स्वात्मन एव स्वातन्त्र्याद्बद्धतयेव मुक्ततयापि प्रकाशनं नाम वस्तूक्तम्। अयमेव तात्त्विकोऽर्थः प्रतिपादित इत्यर्थः ॥ १२५ ॥

न केवलमेतदत्रैवोक्तं यावदन्यत्रापीत्याह

श्रीमन्निशाकुलेऽप्युक्तं
मिथ्याभावितचेतसः ।
मलमायाविचारेण
क्लिश्यन्ते स्वल्पबुद्धयः॥१२६॥
स्फटिकोपलगो रेणुः
किं तस्य कुरुतां प्रिये ।
व्योम्नीव नीलं हि मलं
मलशंकां ततस्त्यजेत् ॥१२७॥

क्लिश्यन्त इति वृथा क्लेशमनुभवन्ति इत्यर्थः। यथा स्फटिकोपलगतो रेणुर्व्योमगतो वा नीलिमा तयोर्न किंचिदपि वस्तुतो मलिनत्वादि कर्तुं शक्नुतामेवं शुद्धबुद्धस्वभावस्य आत्मनः स्वेच्छामात्रपरिकल्पिते मलकर्मणी इति तच्छंकां त्यजेत् वस्तुतः किंचिदेतन्नास्ति इत्यर्थः । यदुक्तं तत्र

'न मलो मलिनः कश्चिद्विद्यते वस्तुतः प्रिये ।
स्वमनोमलिनत्वेन मलमात्मनि कथ्यते ॥
मलमायाविचारेण क्लिश्यन्ते स्वल्पबुद्धयः ।

स्फटिकोपलगो रेणुः किं तस्य कुरुतां प्रिये ॥
अज्ञानमात्रं तु मलं ज्ञानं शुद्धं स्वभावतः ।
शुद्धस्वभावबोधस्य न बन्धः स्यात्कदाचन ॥
आकाशे नीलिमा यद्वन्मलमेवं चिदात्मनः ।'

इति ॥१२७॥

पूर्वाचार्यैरपि एतदेवोक्तमित्याह

श्रीमान्विद्यागुरुश्चाह
प्रमाणस्तुतिदर्शने ।

तदेवाह

धर्माधर्मव्याप्तिविनाशान्तरकाले
शक्तेः पातो गाहनिकैर्यः प्रतिपन्नः ।
तं स्वेच्छातः संगिरमाणाः स्तवकाद्याः
स्वातन्त्र्यं तत्त्वव्यनपेक्षं कथयेयुः ॥

इह गाहनिकैर्गहनं मायामेव विश्वकारणत्वेन अभिदधद्भिर्भेदवादिभिर्धर्माधर्मयोः कर्मणोर्या व्याप्तिः कार्यजन्मने प्रसरणं तस्या विनाशः प्रतिबन्धस्तदात्मन्यन्तरे साम्यलक्षणे काले तदपेक्षो यः शक्तिपातः प्रतिपन्नस्तमेव स्तवकाद्याः स्तोत्रकारादयः स्वेच्छामात्रेणैव प्रतिजानानास्त्वद्विषयमनन्यापेक्षं तत्स्वातन्त्र्यमावेदयन्ति इत्यर्थः ॥१२८॥

एवमियता मतादीनां तत्त्वं विवेचितम्, इदानीं पुनः शक्तिपातविचित्रतामभिधातुमाह

तारतम्यप्रकाशो य-
स्तीव्रमध्यममन्दताः ॥१२९॥
ता एव शक्तिपातस्य
प्रत्येकं त्रैधमास्थिताः ।

यो नाम शक्तिपातस्य तारतम्यप्रकाश उक्तस्ता एव तीव्रमध्यमन्दताः प्रत्येकं त्रैधमास्थिताः। तीव्रतीव्रादिरूपतया अस्य नव प्रकारा इत्यर्थः ॥

एतदेव फलतो दर्शयति

तीव्रतीव्रः शक्तिपातो
देहपातवशात्स्वयम् ॥ १३०॥
मोक्षप्रदस्तदैवान्य-
काले वा तारतम्यतः ।
मध्यतीव्रात्पुनः सर्व-
मज्ञानं विनिवर्तते ॥१३१॥
स्वयमेव यतो वेत्ति
बन्धमोक्षतयात्मताम् ।

तत्प्रातिभं महाज्ञानं
शास्त्राचार्यानपेक्षि यत्॥१३२

स्वयमिति प्रसिद्धदेहपातनिमित्तमन्तरेणेत्यर्थः । अन्यकाल इति आसन्ने विप्रकृष्टे वा । अनेन च अस्य तरतमभावेन त्रैविध्यसूचनादपि प्रत्येकं तथात्वे सप्तविंशतिर्भेदा भवन्ति इति कटाक्षितम् । पुनःशब्दो व्यतिरेके । तेनात्र पूर्ववन्न देहस्य निवृत्तिः किंतु अज्ञानस्य । स्वयमेव इति नतु गुरुतः शास्त्रतो वा । यतोऽस्य स्वप्रतिभात एव एवं ज्ञानमुदियादत एव अस्य महत्त्वे शास्त्राचार्यानपेक्षित्वं हेतुः॥१३२॥

ननु आत्मानं प्रत्येव किं बन्धमोक्षतयात्मतामसौ वेत्ति उत परं प्रत्यपि इत्याशंक्याह

प्रतिभाचन्द्रिकाशान्त-
ध्वान्तश्चाचार्यचन्द्रमाः ।
तमस्तापौ हन्ति दृशं
विस्फार्यानन्दनिर्भराम्॥१३३

तमस्तापाविति शैष्यौ ॥ १३३ ॥

ननु एवंविधप्रतिभाभाजनभूतोऽपि को नामासाविति निरूप्यम् । न तावच्छासिता व्यु-

त्पत्त्यासादनसमये तत्त्वाभावात्। आसादितव्युत्पत्तिर्हि परान्व्युत्पादयन् कामं शासितेत्युच्येत। नापि शिष्यस्तस्य पराधेयव्युत्पत्तिकत्वात्। तत्कतरस्तावदयमिति न जानीम इत्याशंक्याह

स शिष्टः कर्मकर्तृत्वा-
च्छिष्योऽन्यः कर्मभावतः।

शिष्यत इति स्वप्रतिभाधेयव्युत्पत्तिकत्वेन स्वप्रतिभां प्रति कर्मणोऽपि परं प्रति शास्यत्वाभावेन स्वातन्त्र्यविवक्षया कर्तृत्वात् 'लूयते केदारः' इतिवत् कर्मवद्भावात् कर्मणि क्त शिष्ट इति। अन्य इत्येवंप्रतिभाभाजः॥

स चायं सर्वशास्त्रेषु स्वयं गुर्वाद्युपदेशनैरपेक्ष्येण भवनात् स्वयंभूरित्याह

शिष्टः सर्वत्र च स्मार्त-
पदकालकुलादिषु॥१३४॥
उक्तः स्वयंभूः शास्त्रार्थ-
प्रतिभापरिनिष्ठितः।

तदुक्तं प्राक्

'स तावत्कस्यचित्तर्कः स्वयमेव प्रवर्तते।
स च सांसिद्धिकः शास्त्रे प्रोक्तः स्वप्रत्ययात्मकः।' (४।४०)

इति ॥

ननु स्वयमेव चेत्प्रतिभायाः समुल्लासस्तत्कस्यचिदेव इति कुतस्त्योऽयं नियमः। बाढं, न नियम इत्याह

यन्मूलं शासनं तेन
न रिक्तः कोऽपि जन्तुकः १३५

व्युत्पत्तेर्हि प्रतिभात्मकमेव वस्तु मूलम्। न च तेन प्रतिभात्मना वस्तुना तिर्यक्प्रायोऽपि कश्चिज्जन्तुः स्वोचितव्यापारनैपुण्यान्यथानुपपत्त्या रिक्तः। अत एव

'व्यवहाराः प्रतायन्ते तिरश्चामपि यद्वशात्।'

इत्युक्तम् ॥ १३५ ॥

ननु यद्येवं, तत्कस्मादविशिष्टैव सर्वेषां प्रतिभा नोल्लसेदित्याशंक्याह

तत्रापि तारतम्योत्थ-
मानन्त्यं दार्ढ्यकम्प्रते।

एवं प्रतिभाया अविशेषेण संभवेऽपि तारतम्येन समुल्लासादनन्तप्रकारत्वं यतः सा दार्ढ्यकम्प्रते अपेक्षते, प्रथमतो दृढा कम्पमाना वा स्यादित्यर्थः ॥

कम्पमाना च सा युक्त्याद्यपेक्षते यतोऽस्या दार्ढ्यमुदियादित्याह

युक्तिः शास्त्रं गुरुर्वादोऽभ्यास इत्याद्यपेक्षते ॥१३६॥

वादो वीतरागकथा ॥१३६॥

ननु आमुखे कम्पमानमपि ज्ञानं स्वयमेव क्वचिद्यथायथं दार्ढ्यं गच्छत् दृष्टं, तत्किं युक्त्याद्यपेक्षणेन इत्याशंक्याह

कम्पमानं हि विज्ञानं
स्वयमेव पुनर्व्रजेत् ।
कस्यापि दार्ढ्यमन्यस्य
युक्त्याद्यैः केवलेतरैः ॥१३७॥

युक्त्याद्यैरिति सुसंवादायापेक्ष्यमाणैः । केवलेतरैरिति व्यस्तसमस्तैः । यस्य पुनः स्वयमेव कम्पमानं विज्ञानं दार्ढ्यं गच्छेत् स निर्भित्तिरिति प्रागुक्तः । यस्य तु युक्त्याद्यैः स सभित्तिक इति ॥१३७॥

ननु एवमत्र फले कश्चिद्विशेषोऽस्ति न वा इत्याशंक्याह

यथा यथा परापेक्षा-
तानवं प्रातिभे भवेत् ।
तथा तथा गुरुरसौ
श्रेष्ठो विज्ञानपारगः ॥१३८॥

न केवलं प्रातिभस्यैव गुरोः परानपेक्षत्वे श्रेष्ठत्वं यावत्कल्पितस्यापि, शास्त्रीये क्वचिदंशे येन कल्पितोऽप्यसौ अकल्पित इत्युच्यते । तस्मात्प्रातिभत्वमेव सर्वात्मना ज्याय इत्याह

अन्यतः शिक्षितानन्त-
ज्ञानोऽपि प्रतिभाबलात् ।
यद्वेत्ति तत्र तत्रास्य
शिवता ज्यायसी च सा १३९

यदुक्तं प्राक्

'येन केनाभ्युपायेन गुरुमाराध्य भक्तितः ।
तद्दीक्षाक्रमयोगेन शास्त्रार्थं वेत्स्यसौ ततः ॥
अभिषेकं समासाद्य यो भवेत्स तु कल्पितः ।
सन्नप्यशेषपाशौघविनिवर्तनकोविदः ॥
यो यथाक्रमयोगेन कस्मिंश्चिच्छास्त्रवस्तुनि ।
आकस्मिकं व्रजेद्बोधं कल्पिताकल्पितो हि सः ॥
तस्य योऽकल्पितो भागः स तु श्रेष्ठतमः स्मृतः ।'(४।७३)

इति ॥१३९॥

एवमकल्पितत्वादेव प्रातिभस्य गुरोर्न बाह्यं किंचिदपेक्षणीयमित्याह

न चास्य समयित्वादि-
क्रमो नाप्यभिषेचनम् ।
न सन्तानादि नो विद्या-
व्रतं प्रातिभवर्त्मनः ॥१४०॥
आदिविद्वान्महादेव-
स्तेनैषोऽधिष्ठितो यतः ।
संस्कारास्तदधिष्ठान-
सिद्ध्यै तत्तस्य तु स्वतः १४१

न हि नामास्य प्रातिभवर्त्मनो गुरोर्दीक्षाभिषेकादिः संस्कारः कश्चिदुपयुक्तो, यतोऽयमादिगुरुणा महादेवेन स्वयमेव अधिष्ठितः। तदधिष्ठानसिद्ध्यर्थं ह्येव संस्काराः प्रणीताः । तदेव पुनरस्य स्वतः सिद्धमिति किमेभिर्व्यर्थैः परिकल्पितैर्भवेत् ॥१४१॥

ननु एवमपि वृत्तदीक्षोऽयमिति न भवितुमर्हतीत्याशङ्क्याह

देवीभिर्दीक्षितस्तेन
सभक्तिः शिवशासने ।

तेन स्वतस्तदधिष्ठानेन हेतुना शिवशासने शक्तिपातप्रथमचिह्नभूतया भक्त्या युक्तः सन् देवीभिः दीक्षितः ताभ्य एव अधिगताधिकार इत्यर्थः ॥

एवमकल्पितत्वेऽपि अस्य क्वचिदंशे कल्पितत्वमपि भवेदित्याशङ्क्याह

दृढताकम्प्रताभेदैः
सोऽपि स्वयमथ व्रतात् १४२
तपोजपादेर्गुरुतः
स्वसंस्कारं प्रकल्पयेत् ।

सोऽपि प्रातिभो गुरुर्दृढताकम्प्रतामूलैस्तीव्रमध्यमन्दादिभेदैरुपलक्षितः सन् क्रमेण स्वयमात्मभावनातो व्रतादेर्गुरुतो वा स्वस्य आत्मनो दीक्षादिलक्षणं संस्कारं प्रकल्पयेत् येनायमकल्पितकल्पकः प्रागुक्तः । तथाच

'यस्तु तद्रूपभागात्मभावनातः परं विना ।
शास्त्रवित्स गुरुः शास्त्रे प्रोक्तोऽकल्पितकल्पकः ॥

तस्यापि भेदा उत्कृष्टमध्यमन्द्राद्युपायतः ।
भावनातोऽथवा ध्यानाज्जपात्स्वप्नाद्गुरोः ॥
प्राप्नोत्यकल्पितोदारमभिषेकं महामतिः ॥ ' (४।५३)

इति ॥१४२॥

ननु किमत्र प्रमाणमित्याशङ्क्याह

यतो वाजसिनेयाख्य
उक्तं सिञ्चेत्स्वयं तनुम् १४३
इत्याद्युपक्रमं याव-
दन्ते तत्परिनिष्ठितम् ।
अभिषिक्तो भवेदेवं
न बाह्यकलशाम्बुभिः॥१४४॥

यदुक्तं तत्र

'व्रतादौ च जपादौ च तयोरन्ते तथैव च ।
यागं कृत्वाथ विधिवत्स्वेन स्वमभिषेचयेत् ॥
यदि संपत्त्यभावः स्यान्मनसैवं प्रकल्पयेत् ।
यस्मादिदं जगत्सर्वं मनस्यन्तः प्रतिष्ठितम् ॥'

इत्यादि

' ततः पीयूषकलशं कलाकमलमण्डितम् ।
ध्यात्वा शिरसि तेनैव प्लावितं भावयेद्बुधः ॥
अभिषिक्तो भवेदेवं न बाह्यकलशाम्बुभिः ।
य एवमभिषिक्तः सन् सोऽधिकारी जपादिके ॥ '

इत्यन्तम् ॥१४४॥

एतच्च न केवलमत्रैवोक्तं यावदन्यत्रापीत्याह

श्रीसर्ववीरश्रीब्रह्म-
यामलादौ च तत्तथा ।
निरूपितं महेशेन
कियद्वा लिख्यतामिदम् १४५
इत्थं प्रातिभविज्ञानं
किं किं कस्य न साधयेत् ।
यत्प्रातिभाद्वा सर्वं चे-
त्यूचे शेषमहामुनिः ॥१४६॥

अत्रैव यदित्यादिप्रमाणनिर्देशः। ऊचे इति पातंजलसूत्रेषु ॥१४६॥

केचिच्चात्र विवदन्ते यन्नायं सर्वसंपत्तिहेतुरितीत्याह

अन्ये त्वाहुरकामस्य
प्रातिभो गुरुरीदृशः ।
सामग्रीजन्यता काम्ये
तेनास्मिन्संस्कृतो गुरुः १४७

नियतेर्महिमा नैव
फले साध्ये निवर्तते ।
अभिषिक्तश्चीर्णविद्या-
व्रतस्तेन फलप्रदः ॥१४८॥

अकामस्येति मुमुक्षोः । काम्ये हि सर्वांगोपसंहारेण यथाशक्तिप्रयोगोपगमात्सामग्रीजन्यतेति तत्र गुरुतः प्राप्तदीक्षाभिषेकादिः स्वयं च चीर्णविद्याव्रतो गुरुः फलप्रदो न पुनस्तथाभूतोऽयं प्रातिभः। अयं हि नियतेर्महिमा यन्नियतादेव कारणान्नियतमेव फलं स्यादिति तन्नियतिदशाधिशायिनः साधकस्य कथमेवमन्यथाभावो भवेदिति भावः ॥१४८॥

अस्मद्गुरवस्तु एतन्न मन्यन्त इत्याह

असदेतदिति प्राहु-
र्गुरवस्तत्त्वदर्शिनः ।
श्रीसोमानन्दकल्याण-
भवभूतिपुरोगमाः ॥१४९॥
तथाहि त्रीशिकाशास्त्र-
विवृतौ तेऽभ्यधुर्बुधाः ।

तदभिहितमेव पठति

सांसिद्धिकं यद्विज्ञानं
तच्चिन्तारत्नमुच्यते ॥१५०॥
तदभावे तदर्थं त-
दाहृतं ज्ञानमादृतम् ।

यद्धि प्रातिभं नाम विज्ञानं, तत्सर्वशास्त्रेषु चिन्तामणिप्रायमुच्यते यदस्मात्काम्यादिसर्वफलसंपत्तिः स्यादिति । तस्य सांसिद्धिकस्य ज्ञानस्य अभावे पुनस्तद्भवदभिमतमाहृतं गुर्वाद्याधेयत्वात् कृत्रिमं ज्ञानमाणवादेः शाम्भव एव द्वारद्वारिभावेन विश्रान्त्युपगमात् तदर्थं सांसिद्धिकज्ञानाभिव्यक्तिनिमित्तमेव आदृतम् । येन तदेव विश्रान्तिधामतया सर्वत्र प्रधानतया उद्घोष्यते ॥१५०॥

यदागम इत्याह

एवं यो वेद तत्त्वेन
तस्य निर्वाणगामिनी॥१५१॥
दीक्षा भवत्यसन्दिग्धा
तिलाज्याहुतिवर्जिता ।

अदृष्टमण्डलोऽप्येवं
यः कश्चिद्वेत्ति तत्त्वतः १५२
स सिद्धिभाग्भवेन्नित्यं
स योगी स च दीक्षितः ।
अविधिज्ञो विधानज्ञो
जायते यजनं प्रति ॥१५३॥
इत्यादिभिस्त्रीशिकोक्तै-
र्वाक्यैर्माहेश्वरैः स्फुटम् ।
ज्ञानं दीक्षादिसंस्कार-
सतत्त्वमिति वर्णितम्॥ १५४॥

इह यः कश्चित्सांसिद्धिकं ज्ञानं तत्त्वतो वेत्ति, तस्य बाह्यक्रियां विना निःसन्देहा निर्वाणगामिनी दीक्षा स्वत एव भवति । अत एवासौ दीक्षितः सन् नित्यं सिद्धिभाग्योगी चेति बाह्यक्रियामजानानो जानानो वा यजनं प्रति जायते काम्यादिविषयायां यजिक्रियायां कर्ता भवेत् । एवमाद्यैर्माहेश्वरैर्वाक्यैर्दीक्षादिसंस्कार-सतत्त्वमेव सांसिद्धिकं ज्ञानमुक्तम् ॥१५४॥

यत्पुनर्दीक्षादिनिमित्तकं ज्ञानं तज्ज्ञानहीनानामित्याह

ज्ञानोपायस्तु दीक्षादि-
क्रिया ज्ञानवियोगिनाम् ।
इत्येतदधुनैवास्तां
स्वप्रस्तावे भविष्यति॥ १९५॥

अधुनास्तामेवेति शक्तिपातविचित्रतानिरूपणावसरे तत्प्रसंगाभावात्। अत एवोक्तं स्वप्रस्तावे भविष्यति इति। स्वप्रस्ताव इति दीक्षाप्रकरणे ॥१९५॥

ननु एवं तात्त्विकस्य ज्ञानस्य प्रतिभावद्गुरुशास्त्रादिलक्षणमपि प्रमाणमभिव्यक्तिनिमित्तमस्ति इति किं प्रतिभायामेवैवं भर इत्याशङ्क्याह

गुरुशास्त्रप्रमाणादे-
रप्युपायत्वमंजसा ।
प्रतिभा परमेवैषा
सर्वकामदुघा यतः ॥१९६॥

गुर्वादेः प्रमाणस्यापि परमेव यौक्तिकमुपायत्वं सैवास्य विश्रान्तिस्थानमित्यर्थः। यत इयमेव परतत्त्वैक्यापादनेन सर्वाभीष्टसंपत्तिहेतुरित्युक्तं सर्वकामदुघेति। आणवादेरुपायस्य हि द्वारद्वारिभावेन शाम्भवे प्रतिभात्मनि अविकल्प एव ज्ञाने विश्रान्तिरिति असकृदुक्तम् ॥१५६॥

अत एवाह

उपाययोगक्रमतो
निरुपायमथाक्रमम्।
यद्रूपं तत्परं तत्त्वं
तत्र तत्र सुनिश्चितम्॥१५७॥

उपायानामाणवादीनां योगे परस्परस्य संबन्धे य आणवः शाक्ते, शाक्तः शांभव इत्यादिरूपः क्रमः तमवलम्ब्य निरुपायमत एव अक्रमं यत्प्रतिभात्मकं रूपमुदेति, तदेव परं तत्त्वं तत्र तत्र सर्वशास्त्रेषु सुनिश्चितम्। नात्र कस्यचिद्विमतिरित्यर्थः ॥१५७॥

ननु यद्येवं, तत्प्रातिभस्य गुरोरन्यतः स्वात्मनि संस्कारपरिकल्पनेन कोऽर्थ इत्याशङ्क्याह

यस्तु प्रातिभवाह्यात्म-
संस्कारद्वयसुन्दरः ।
उक्तोऽनन्योपकार्यत्वा-
त्स साक्षाद्धरदो गुरुः ॥१५८॥

यदुक्तं

' यस्त्वकल्पितरूपोऽपि संवादद्दढताकृते ।
अन्यतो लब्धसंस्कारः स साक्षाद्धेरवायते ॥ ' (४।७७)

इति ॥१५८॥

एवं च प्रतिभापि शक्तिपातस्य वाह्यानामुपायानां वैचित्र्यात्तरतमभावेनोदियात्, येन मध्यतीव्रस्यापि शक्तिपातस्य तीव्रादिभेदभिन्नत्वं स्यादित्याह

स्वमुक्तिमात्रे कस्यापि
यावद्विश्वविमोचने ।
प्रतिभोदेति खद्योत-
रत्नतारेन्दुसूर्यवत् ॥१५९॥

अत्र च दृष्टान्तसामर्थ्यादन्तरा यथोत्तरं कतिचिज्जनमोचनेऽपि इति लभ्यते ॥१५९॥

ननु इह प्रतिभायाः साक्षान्मध्यतीव्रः शक्ति-

पातः पारिपूर्ण्ये निमित्तमिति नास्ति विमतिः, तदितरद्ग्राह्यं पुनः कियदनुशीलनादपि प्रातिभत्वं भजेदित्याशंक्याह

ततः प्रातिभसंवित्त्यै
शास्त्रमस्मत्कृतं त्विदम् ।
योऽभ्यस्येत्स गुरुर्नैव
वस्त्वर्था हि विडम्बकाः १६०

ततस्तरतमभावेन प्रतिभोदयाद्धेतोर्यः पुनरिदं श्रीतन्त्रालोकसंज्ञमस्मत्कृतं शास्त्रं प्रातिभत्वं संवेदयितुमभ्यस्येत्स समनन्तरमेव संपूर्णबोधत्वात् प्रातिभो गुरुर्भवेत् यद्दृक्पातमात्रात्सर्वोऽप्ययं लोकस्ताद्रूप्यमियात् । यदुक्तं प्राक्

'इति सप्ताधिकामेनां त्रिंशतं यः सदा बुधः ।
आह्निकानां समभ्यस्येत्स साक्षाद्भैरवो भवेत् ॥
सप्तत्रिंशत्सुसंपूर्णबोधो यद्भैरवो भवेत् ।
किं चित्रमणवोऽप्यस्य दृशा भैरवतामियुः ॥' (१।२८६)

इति । ननु महतीयं विडम्बना यत्स्वयमेव स्वकृतिं प्रत्येवं प्रशंसा नाम इत्याशङ्क्योक्तं नैव वस्त्वर्था हि विडम्बका इति ॥१६०॥

ननु इदानीमेवोक्तं न कश्चिदपि जन्तुः

प्रतिभया रिक्त इति, तत्किं तदुदये परकीय-शास्त्राद्यपेक्षणेन इत्याशङ्क्याह

परोपजीवितावुद्ध्या
सर्व इत्थं न भासते ।
तदुक्त्या न विना वेत्ति
शक्तिपातस्य मान्द्यतः १६१

यतः खलु परमेव उपजीवितुं प्रवृत्तः सर्व एवोपजीवनान्यथानुपपत्त्या इत्थमुक्तेन प्रकारेण प्रतिभानवान् तथा न प्रकाशते, यतः शक्तिपातस्य मान्द्यात् परोक्तिमन्तरेण न किंचिद्वेत्ति, सर्वत्रैवास्य गुरुशास्त्रापेक्षेत्यर्थः ॥१६१॥

न चैतत्स्वोपज्ञमेव अस्माभिरुक्तमित्याह

स्फुटमेतच्च शास्त्रेषु
तेषु तेषु निरूप्यते ।

तेषु तेषु इत्यनेन सर्वशास्त्राविगीतत्वमस्यार्थस्य उक्तम् ॥

एतदेव दर्शयति

किरणायां तथोक्तं च
गुरुतः शास्त्रतः स्वतः १६२

ज्ञानयोग्यास्तथा केचि-
च्चर्यायोग्यास्तथापरे ।

तथाशब्देन च केचिद्योगयोग्याः क्रिया-योग्याश्च इत्याक्षिप्तम् । अनेन चैषां नियतविष-यत्वेनापि शास्त्राद्यपेक्षेति कटाक्षितम् ॥१६२॥

ननु इदं सिद्धसाधनं यद्गुरुशास्त्रापेक्षं ज्ञान-मुदियादिति । एतद्धि लोकत एव सिद्धं, किमत्र प्रमाणोपन्यासेन । स्वत एव केषांचिदेतदुदेति इत्यत्र पुनः किं प्रमाणमित्याशङ्क्याह

श्रीमन्नन्दिशिखातन्त्रे
वितत्यैतन्निरूपितम् ॥१६३॥
प्रश्नोत्तरमुखेनेति
तदभग्नं निरूप्यते ।

अभग्नमिति अखण्डम् ॥१६३॥

तदेवाह

अनिर्देश्यः शिवस्तत्र
कोऽभ्युपायो निरूप्यताम्१६४
इति प्रश्ने कृते देव्या
श्रीमाञ्छंभुर्न्यरूपयत् ।

कोऽभ्युपाय इति अर्थात्साधकस्य, येनानिर्देश्येऽपि शिवे ज्ञानमुदियात् । तदुक्तं तत्र

'अनिर्देश्यः शिवो ह्येवं कथितः परमेश्वरः ।
उपायः कथ्यतां देव भक्तानुग्रहकाम्यया ॥'

इति ॥१६४॥

किं न्यरूपयदित्याह

उपायोऽत्र विवेकैकः
स हि हेयं विहापयन्॥१६५॥
ददात्यस्य च सुश्रोणि
प्रातिभं ज्ञानमुत्तमम् ।

विवेकैक इति विवेक एव एकः प्रधानं स्वपरामर्शात्मा विवेक इत्यर्थः । हेयमिति मायीयभावादि । अस्येति साधकस्य ॥१६५॥

ततोऽपि किमित्याह

यदा प्रतिभया युक्त-
स्तदा मुक्तश्च मोचयेत् १६६
परशक्तिनिपातेन
ध्वस्तमायामलः पुमान् ।

तदुक्तं तत्र

'उपायो देवदेवेशि विवेकस्तत्र वै परः ।
हेयतां चैव संसारे ज्ञात्वा जन्तुर्विमोचयेत् ॥
अनित्येऽस्मिञ्छिवो ह्येकः शिवः सर्वगतः प्रभुः ।
मायीयान्युज्झच भावानि यदा भावेन भावयेत् ॥
ददात्यस्य च सुश्रोणि प्रातिभं ज्ञानमुत्तमम् ।
यदा प्रातिभसंयुक्तो मुच्यते मोचयेत्तदा ॥
परशक्तिनिपातेन ध्वस्तमायामलः पुमान् ।
परं याति पदं यत्र गत्वा भूयो न जायते ॥

इति ॥१६६॥

ननु समनन्तरमेव

'दीक्षयोन्मोच्य देवेशि अध्ववन्धात्सुदारुणात् ।
सर्वज्ञादिगुणांश्चैव शिशोरापादयेद्गुरुः ॥'

इत्यादिना दीक्षया मोक्ष इत्युक्तम् । इदानीं तु प्रातिभान्मुच्यते इति किमेतदुक्तमित्याह

ननु प्राग्दीक्षया मोक्षोऽ-
धुना तु प्रातिभात्कथम् १६७

कथमिति उभयोर्मध्यात्कतरत्प्रमाणमित्यर्थः।

तदुक्तं तत्र

'दीक्षया पूर्वमेवोक्तः पुद्गलस्य भवार्णवात् ।
मोक्षोऽधुना वदस्येवं प्रातिभस्येव तत्कथम् ॥
प्रमाणमत्र देवेश प्रातिभं वाथ दीक्षणम् ।
एतन्मे वद कामारे स्फुटार्थेन महेश्वर ॥

इति ॥१६७॥

एतदप्युत्तरयति परमेश्वर इत्याह

इति देव्या कृते प्रश्ने
प्रावर्तत विभोर्वचः ।
दीक्षया मुच्यते जन्तुः
प्रातिभेन तथा प्रिये॥१६८॥

इयान्पुनरनयोर्विशेष इत्याह

गुर्वायत्ता तु सा दीक्षा
बध्यबन्धनमोक्षणे ।
प्रातिभोऽस्य स्वभावस्तु
केवलीभावसिद्धिदः ॥१६९॥

बध्यबन्धनमोक्षणनिमित्तं परापेक्षेत्यर्थः १६९

ननु किं नामास्य केवलीभावसिद्ध्या स्यादित्याह

केवलस्य ध्रुवं मुक्तिः
परतत्त्वेन सा ननु ।
नृशक्तिशिवमुक्तं हि
तत्त्वत्रयमिदं त्वया ॥१७०॥

ना बध्यो बन्धने शक्तिः
करणं कर्तृतां स्पृशत् ।
शिवः कर्तेति तत्प्रोक्तं
सर्वं गुर्वागमादणोः ॥१७१॥
पुनर्विवेकादुक्तं त-
दुत्तरोत्तरमुच्यताम् ।
कथं विवेकः किं वास्य
देवदेव विविच्यते ॥१७२॥

परतत्त्वेन केवलस्येति केवलपरतत्त्वात्मा मुक्त एव भवेदित्यर्थः । एवमपि देवी पुनः प्रश्नयति ननु इत्यादि । इह तावन्नरशक्तिशिवात्मकं विश्वमिति सर्वशास्त्रेषु उक्तम् । तत्र बन्धनक्रियायां ना नरो बध्यः, कर्मकर्त्रावेशमयी शक्तिश्च कर्तृतां स्पृशत्करणं, शिवश्च कर्ता इत्येतत्सर्वमणोर्गुरुतश्च शास्त्रतश्चोपदेश्यतयोक्तम् । येनास्य बध्यबन्धबन्धयितृविभागावभासपुरःसरं महाज्ञानमुदियात् । भूयश्च तदेवोत्तरादागमादप्युत्तरमनुत्तरं विवेकादुक्तम् । तदस्य साधकस्य कथं विवेकस्तदुत्पादकः प्रकारः, किंवा

विवेच्यमित्युच्यतां संशयविपर्ययादिव्युदसनेन निर्णीयतामित्यर्थः । तदुक्तं

'तत्त्वं त्रिविधमाख्यातं नरशक्तिशिवात्मकम् ।
शिवात्मकं सर्वगतं निष्प्रपञ्चमलेपकम् ॥
तद्धर्मधर्मिणी शक्तिस्त्वयाख्याता महेश्वर ।
बध्यबन्धनभावेन नरतत्त्वमुदाहृतम् ॥
कर्तृत्वे करणत्वे च शक्तितत्त्वं त्वयोदितम् ।
तच्च गुर्वागमात्साध्यमणुभिश्चोदितं स्फुटम् ॥
विवेकात्तत्कथं लभ्यं भूय एवोच्यते त्वया ।
प्रातिभस्य च ज्ञानस्य गुर्वाम्नायागतस्य च ॥
द्वैधं किमेतदुद्दिष्टं मोहनाय ममाधुना ।
उत्तरोत्तरमस्मात्तु स्फुटमाख्याहि शंकर ॥
येन निःसंशया सिद्धिर्मुक्तिरन्ते भवत्यणोः ॥
कथं विवेकः किं वास्य देवदेव विविच्यते ॥

इति । नृशक्तिशिवमिति गुर्वागमादिति च समाहारे द्वन्द्वः ॥१७२॥

एतच्च निर्णेतुं परमेश्वरः प्रत्युवाच इत्याह

इत्युक्ते परमेशान्या
जगादादिगुरुः शिवः ।

तदेवाह

शिवादितत्त्वत्रितयं
तदागमवशाद्गुरोः ॥१७३॥

अधरोत्तरगैर्वाक्यैः
सिद्धं प्रातिभतां व्रजेत् ।

यन्नाम हि नरशक्तिशिवात्मकं तत्त्वत्रयं तद्गुरोरागमाच्च प्रश्नप्रतिवचनरूपैर्वाक्यैः सिद्धं यथायथं तात्त्विकेन रूपेण प्ररोहमुपगतं, प्रातिभतां व्रजेत् प्रातिभं ज्ञानमस्य जायत इत्यर्थः ॥

ननु प्रातिभत्वं वस्तुसदिति असकृदुक्तं, तत्कथमिह शिवादितत्त्वत्रयमेव गुर्वादिमाहात्म्यात्प्रातिभतां व्रजेदित्युक्तमित्याशङ्क्याह

दीक्षासिच्छिन्नपाशत्वा-
द्भावनाभावितस्य हि ॥ १७४ ॥
विकासं तत्त्वमायाति
प्रातिभं तदुदाहृतम् ।

यन्नाम हि गुरुतो दीक्षासिच्छिन्नपाशस्य, आगमतश्च भावनाभावितस्य साधकस्य वस्तुसदेव प्रतिभातत्त्वं विकस्वरतां यायात्, तदेवोच्यते प्रातिभं ज्ञानमिति । तदुक्तं

'तदागमवशात्साध्यं गुरुवक्त्रान्महाधिपे ।
शिवशक्तिकरावेशाद्गुरुः शिष्यप्रबोधकः ॥

अधरोत्तरगैर्वाक्यैः प्रभुशक्त्युपबृंहितः ।
तच्छक्त्या सुप्रबुद्धस्य ध्वस्तमायामलस्य च ॥
दीक्षासिच्छिन्नपाशस्य भावनाभावितस्य च ।
विकासं तत्त्वमायाति यत्तज्ज्ञानमिदं प्रिये ॥
प्रातिभं तत्समाख्यातं तत्त्वज्ञानस्य भावनात् ।
इति ॥१७४॥

एतदेव दृष्टान्तोपदर्शनेन हृदयङ्गमयति

भस्मच्छन्नाग्निवत्स्फौट्यं
प्रातिभे गौरवागमात्॥ १७५॥
बीजं कालोप्तसंसिक्तं
यथा वर्धेत तत्तथा ।
योगयागजपैरुक्तै-
र्गुरुणा प्रातिभं स्फुटेत् १७६

यथा हि भस्मच्छन्नोऽग्निर्मुखमारुतादिना स्फुटतां यायात्, यथा वा स्वकाल एवोप्तं संसिक्तं च बीजमङ्कुरपल्लवादिरूपतयाभिव्यक्तिमियात्, तथा प्रातिभमपि ज्ञानं गुरूपदिष्टैर्यागयोगादिभिरिति । तदुक्तं

'यथाग्निर्भस्मना च्छन्नस्तदपास्येन्धनेधितः ।
समीरणबलाविष्टो भूरितेजा वरानने ॥
प्रभविष्णुः प्रकाशार्चिरेवमेतद्भवेत्स्फुटम् ।'

इति ।

'यथोप्तं कालतो बीजं तत्सुसिक्तमथ क्रमात् ।
अङ्कुरैः पल्लवैराढ्यं तत्पुष्पादिफलान्वितम् ॥
व्यापकं विटपं तद्वदुरुतः प्रातिभं प्रिये ।'

इति च ॥१७६॥

एवं गुर्वाम्नायगतं प्रातिभं ज्ञानं निरूप्य, पात्रोपकृतं तदेव स्वाभाविकं निरूपयितुं, प्रथमं तावद्विवेकस्यैव स्वरूपं निरूपयति

विवेकोऽतीन्द्रियस्त्वेष
यदायाति विवेचनम् ।
पशुपाशपतिज्ञानं
स्वयं निर्भासते तदा ॥१७७॥
प्रातिभे तु समायाते
ज्ञानमन्यत्तु सेन्द्रियम् ।
वागक्षिश्रुतिगम्यं चा-
प्यन्यापेक्षं वरानने ॥१७८॥
तत्त्यजेद्बुद्धिमास्थाय
प्रदीपं तु यथा दिवा ।

यः पुनरतीन्द्रियः प्रमाणागोचर एष संविल्ल-

क्षणोऽर्थो विचारपदवीमभ्युपेयात् स स्वपरामर्शात्मा विवेको नाम, यत्तस्मिन्सति स्वयमन्यापेक्षमेव वध्यवन्धवन्धयितृविषयं प्रातिभं ज्ञानं परिस्फुरेत्, यस्मिन्नभ्युदिते दिनकृत्स्थानीयां बुद्धिं सम्यग्ज्ञानमास्थाय प्रदीपमिव दिने तदन्यत्संकुचितं ज्ञानं वागुपलक्षितैः कर्मेन्द्रियैरक्षिश्रुत्युपलक्षितैर्बुद्धीन्द्रियैश्च गम्यं सेन्द्रियमन्तःकरणैर्गम्यं च, अत एवान्यापेक्षं त्यजेत्। एतदवधीरणेन महाप्रकाश एव विश्रान्तो भवेदित्यर्थः।

तदुक्तं

'विवेकोऽतीन्द्रिये भावे यदायाति विवेचनम्।
पशुपाशपतिज्ञानं स्वयमेति विचारताम्॥
प्रातिभे तु समायाते ज्ञानमन्यत्तु सेन्द्रियम्।
वागक्षिश्रुतिगम्यं तु अन्यापेक्षं वरानने॥
तत्त्यज्येद्बुद्धिमास्थाय प्रदीपं तु यथा दिवा।

इति॥

अत एवास्यार्वाग्दर्शिवैलक्षण्यमपि जायत इत्याह

प्रादुर्भूतविवेकस्य
स्याच्चिदिन्द्रियगोचरे॥१७९॥

दूराच्छ्रुत्यादिवेधादि-
वृद्धिक्रीडाविचित्रिता ।

प्रादुर्भूतविवेकस्य हि साधकस्य शब्दादाविन्द्रियार्थे विषये दूराच्छ्रुत्यादिविचित्रिता चित् स्यात् देशकालाकारविप्रकृष्टादिविषया संवित्तिरस्य जायते इत्यर्थः । तदुक्तं

'प्रादुर्भूतविवेकस्य लक्षणं यत्प्रवर्तते ।
तथा ते कथयिष्यामि येन येनेन्द्रियेण तु ॥
साध्यं यत्तस्य तस्यैवं पाटवं जायते भृशम् ।
दूराच्छ्रवणविज्ञानं मननं चावलोकनम् ॥'

इति ॥

'क्रीडाकर्माण्यथोक्तानि सर्वतंत्रोदितानि तु ।
क्षणेनानुभवेत्तानि शक्तिज्ञानोपबृंहितः ॥
षट्चक्रं षोडशाधारं कुलं जानाति सुव्रते ।
मन्त्रवेधादि कुरुते स्वस्थावेशादिकानि तु ॥
क्षणादन्यानि विशते पुराणि नगनन्दिनि ॥

इति च ॥

प्ररूढविवेकस्यास्य पुनरेवं सिद्धिषु वैमुख्यात्परसंविद्विश्रान्तिरेव भवेदित्याह

सर्वभावविवेकात्तु
सर्वभावपराङ्मुखः ॥१८०॥

क्रीडासु सुविरक्तात्मा
शिवभावैकभावितः ।
माहात्म्यमेतत्सुश्रोणि
प्रातिभस्य विधीयते॥१८१॥
स्वच्छायादर्शवत्पश्ये-
द्बहिरन्तर्गतं शिवम् ।

इह खलु सर्वेषां भावानां संविदेव सतत्त्वं, नतु बाह्यं किंचिन्नीलादिरूपत्वमित्येवमात्मकाद्विवेकात्तद्वैवश्यहीनोऽत एव परपुरप्रवेशादिप्रायासु क्रीडासु विरक्तात्मत्वात्परप्रकाशमय्यां शिवसत्तायामेव प्राधान्येन विश्रान्तो येन दर्पण इव बिम्बप्रतिबिम्बोदयात्मना स्वं सर्वत्र शिवमेव बहिरन्तर्गतं पश्येत्तदेकघनाकारतया विश्वं साक्षात्कुर्यादित्यर्थः । ननु कथमेकदैवायं बहिरन्तश्च शिवं द्रष्टुं शक्नुयादित्याशङ्क्योक्तं 'प्रातिभस्यैतन्माहात्म्यं विधीयते' इति ॥

एवं चास्य हेयमुपादेयं वा किंचिन्नास्ति इत्ययमकिंचित्करीषु परिमितासु सिद्धिषु निब-

न्धनभूतं प्रतिनियतं ध्यानाद्यपहाय परामेव संविदं परं परामृशेदित्याह

हेयोपादेयतत्त्वज्ञ-
स्तदा ध्यायेन्निजां चितिम् १८२

तदेति प्रातिभस्यैवं माहात्म्ये सतीत्यर्थः ।

तदुक्तं

'सर्वभावविवेकेन सर्वभावपराङ्मुखः ।
विवेकी सुविरक्तात्मा शिवभावैकतत्परः ॥
प्राकाम्यमेतत्सुश्रोणि प्रातिभस्य विधीयते ।

इति ।

'यथादर्शगतां च्छायां पश्यति स्वां तथा प्रिये ।
बहिरन्तःस्थितं देवं शिवं सर्वगतं विभुम् ॥'

इति ।

'स्वप्नेन्द्रजालवत्सर्वं सिद्धियोगं विभावयेत् ।
दृष्ट्वैवं लक्षणं भद्रे प्रातिभस्य तु साधकः ॥
हेयोपादेयतत्त्वज्ञस्तदा ध्यायेच्छिवं विभुम् ।'

इति च ॥

ननु अकिंचित्कर्यश्चेत्सिद्धयस्तत्किमर्थमुक्ता इत्याशङ्क्याह

सिद्धिजालं हि कथितं
परप्रत्ययकारणम् ।

इहैव सिद्धाः कायान्ते
मुच्येरन्निति भावनात्॥ १८३॥

सिद्धिर्हि नाम परेषां प्रत्ययमात्रम्, अन्यथा देहान्ते मुक्तिरिति कस्य समाश्वासः स्यात्॥

यस्य पुनः परप्रत्ययानपेक्षत्वेन परतत्त्व एव भावनादाढर्यं स जीवन्नेव मुक्त इत्याह

परभावनदार्ढ्यात्तु
जीवन्मुक्तो निगद्यते।

एतदेवोपसंहरति

एतत्ते प्रातिभे भेदे
लक्षणं समुदाहृतम्॥ १८४॥

अत्र च न केवलमेतदेव लक्षणं यावदन्यदपीत्याह

शापानुग्रहकार्येषु
तथाभ्यासेन शक्तता।

शक्ततेत्यर्थात्प्रादुर्भूतविवेकस्य। प्ररूढविवेको हि क्रीडाप्रायासु सिद्धिषु अनासङ्गान्माध्यस्थ्यमवलम्बमानः परतत्त्व एव विश्रान्तो, येनासौ स्वयं मुक्तः सन् परानपि मोचयेत्॥

तदाह

तेषूदासीनतायां तु
मुच्यते मोचयेत्परान्॥ १८५॥

नन्वात्मा स्वत एव शुद्धबोधस्वभाव इति किं नामास्यावशिष्यते यत्प्रतिभा कुर्यादिति किं तयास्य इत्याशंक्याह

भूतेन्द्रियादियोगेन
बद्धोऽणुः संसरेद्ध्रुवम्।
स एव प्रतिभायुक्तः
शक्तितत्त्वं निगद्यते॥ १८६॥
तत्पातावेशतो मुक्तः
शिव एव भवार्णवात्।

स एव भूतेन्द्रियादियुक्तो बद्धोऽणुः प्रतिभया युक्तः प्रादुर्भूतविवेकश्चेत् तच्छक्तितत्त्वं निगद्यते शुद्धविद्यादशाधिशायी भवेत् येन तदनुग्रहनिग्रहाद्यनेककार्यकरणप्रवणतामियात्। तत्रैव लब्धप्ररोहः पुनरसौ भवार्णवान्मुक्तः शिव एव तथाणुरूपतावधीरणेन शक्तिनिःश्रेणिकाक्रमणक्रमेण परधाराधिरोहितया पर-

स्यामेव संविदि विश्रान्तो भवेदित्यर्थः । एतेन चोद्यसमाधानाभ्यामुपक्रान्तं नरशक्ति-शिवात्मकं तत्त्वत्रयमेव प्रातिभविज्ञानात्मकतां यायादिति निर्वाहितम् । तदुक्तं

'यदा देवि महान्स्थूलो गुणत्रयसमन्वितः ।
भूतेन्द्रियादियोगेन बध्यते चाप्यणुस्तदा ॥
संसारे संसरेत्तेन बद्धोऽणुर्वरवर्णिनि ।
स एव प्रतिभायुक्तः शक्तितत्त्वं निगद्यते ॥
तत्पातावेशतो जन्तुर्मुच्यते तु भवार्णवात् ।
हित्वा कारणषट्कं तु शिवतत्त्वे लयं व्रजेत् ॥
इति ते सर्वमाख्यातं यथाभेदद्वयं प्रिये ।'

इति ॥

एवमुपपादितेऽपि प्रातिभस्य द्वैधे देवी पुनः प्रश्नयति

नन्वाचार्यात्सेन्द्रियं त-
ज्ज्ञानमुक्तमतीन्द्रियम् १८७
विवेकजं च तद्बुद्ध्या
तत्कथं स्यान्निरिन्द्रियम् ।

इह तावद्यौरवं ज्ञानं बुद्ध्यान्तःकरणनिर्वर्त्य-त्वात्सेन्द्रियमुक्तं, विवेकजं च तन्निरिन्द्रियम् ।

तत्र तद्विवेकजं ज्ञानं 'बुद्धिमास्थाय' इत्याद्युक्त्या बुद्ध्योपलक्षितमपि कथं निरिन्द्रियं स्यात् शश-विषाणवदत्यन्तमसदेवेत्यर्थः । तदुक्तं

'सेन्द्रियं चैव गुरुतो ज्ञानमुक्तमतीन्द्रियम् ।
विवेकजन्म नो बुद्ध्या विना देव प्रवर्तते ॥
निरिन्द्रियत्वं तु कथं प्रोच्यते तस्य शङ्कर ।
एतच्छशविषाणेन प्रतिभाति समं मम ॥'

इति ॥

एवमुक्तश्च भगवान् प्रत्युवाचेत्याह

इति पृष्टोऽभ्यधात्स्वान्त-
धियोर्जाड्यैकवासनात् १८८
अक्षत्वं प्रविवेकेन
तच्छित्तौ भासकः शिवः ।

इह मनोबुद्ध्योर्जाडयैकलक्षणात्संस्कारादुल्लसता परस्परस्य संकल्प्याद्ध्यवसेयाच्च विषयात्प्रकृष्टेन भेदेन अक्षत्वमिन्द्रियत्वं यतोऽनयोर्बन्धकत्वम् । तस्य च जाड्यसंस्कारकारणस्य भेदस्यावृत्या यथोक्तस्वरूपतया प्रकृष्टेन विवेकेन च्छित्तौ निवृत्तौ शिव एव भासको निरि-

न्द्रिया संविदेव सर्वतः समुज्जृम्भत इति सिद्धं विवेकजस्य ज्ञानस्यातीन्द्रियत्वम् ॥

ननु जाड्यात्मैव संस्कारो भेदनिबन्धनमिति केनोक्तमित्याशंक्याह

संस्कारः सर्वभावानां
परता परिकीर्तिता ॥१८९॥

परतेति भिन्नतेत्यर्थः। परिकीर्तितेति सर्वैः। यदभिप्रायेणैव प्राक्

'परिच्छिन्नप्रकाशत्वं जडस्य किल लक्षणम्।' (३।१०१)

इत्याद्युक्तम्। तदुक्तं

'इन्द्रियत्वं मनोबुद्ध्योर्वासनातः सुरेश्वरि।
जडत्वात्तेषु तद्भावादिन्द्रियत्वं तु बन्धकम् ॥
विवेकयुक्त्या तच्छेदः शिवतत्त्वप्रकाशकः।
संस्कारः सर्वभावानां परता परिकीर्तिता ॥'

इति ॥ १८९ ॥

सा चेह नास्तीत्याह

मनोबुद्धी न भिन्ने तु
कस्मिंश्चित्कारणान्तरे।
विवेके कारणे ह्येते
प्रभुशक्त्युपबृंहिते ॥१९०॥

इह हि मनोबुद्धी मूलकारणे विवेके समुल्लसति कस्मिंश्चिच्छुद्धविद्यात्मनि कारणान्तरे स्वस्वरूपतिरस्कारात्तद्रूपताजन्मने न भिन्ने भवतो यत एते प्रभुशक्त्युपबृंहिते तदैकात्म्यमापन्ने इत्यर्थः ॥ १९० ॥

ननु यद्येवं, तन्मनोबुद्धी विना ज्ञानस्योत्पत्तिरेव न स्यादिति कृतं निरिन्द्रियत्वादिविचारेण इत्याशङ्क्याह

न मनोबुद्धिहीनस्तु
ज्ञानस्याधिगमः प्रिये ।
परभावात्तु तत्सूक्ष्मं
शक्तितत्त्वं निगद्यते ॥१९१॥

न हि मनो बुद्धिं वा विहाय ज्ञानस्याधिगमोऽवभासो भवेत्, किंतु ते एव मनोबुद्धी प्रोक्तयुक्त्या स्वस्वरूपनिमज्जनेन सूक्ष्मं शाक्तं रूपमधिकृत्य एतज्ज्ञानं जनयत इत्युक्तं

'परभावात्तु तत्सूक्ष्मं शक्तितत्त्वं निगद्यते ।'

इति ॥ १९१ ॥

ननु यद्येवं, तद्विवेकस्याप्यत्र कस्मात्कारणत्वमुक्तमित्याशङ्क्याह

विवेकः सर्वभावानां
शुद्धभावान्महाशयः ।

महाशय इति सर्वभावक्रोडीकरणसहिष्णुरित्यर्थः ॥

ननु बुद्धिरपि उभयतो दर्पणप्रख्या भोक्तृभोग्यात्मसर्वभावपरिस्फुरणसहिष्णुरित्युक्तं, तत्कथं तामपहाय विवेकस्य एवंरूपत्वमुच्यत इत्याह

बुद्धितत्त्वं तु त्रिगुण-
मुत्तमाधममध्यमम् ॥१९२॥
अणिमादिगतं चापि
बन्धकं जडमिन्द्रियम् ।

त्रिगुणत्वादेव च उत्तमाधममध्यमामित्युक्तम्, अणिमादिगतत्वादेव भोगजालासक्तिकारितया बन्धकम् । तदुक्तं

' बुद्धितत्त्वं महादेवि प्रधानाशयगोचरम् ।
तमो रजस्तथा सत्त्वमुत्तमाधममध्यमम् ॥
अणिमादिविभेदेन भोगजालसमावृतम् । '

इति ॥

इह

' अके चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् । '

इति भङ्ग्या प्रातिभादेव चेन्मुक्तिस्तत्किमने-कायाससाध्यया दीक्षया इति पुनर्देवी प्रश्नयति

ननु प्रातिभतो मुक्तौ
दीक्षया किं शिवाध्वरे ॥१९३॥

तदुक्तं

' प्रातिभेन महेशान मुच्यते यदि पुद्गलः ।
तत्किमर्थं शिशोर्दीक्षा क्रियते तु शिवाध्वरे ॥

इति ॥ १९३ ॥

एतदपि परमेश्वरः प्रत्युक्तवानित्याह

ऊचेऽज्ञाना हि दीक्षायां
बालवालिशयोषितः ।
पाशच्छेदाद्विमुच्यन्ते
प्रबुद्ध्यन्ते शिवाध्वरे ॥१९४॥
तस्माद्दीक्षा भवत्येषु
कारणत्वेन सुन्दरि ।

दीक्षया पाशमोक्षे तु
शुद्धभावाद्विवेकजम् ॥१९५॥

एष्विति बालादिष्वज्ञानेषु, अतश्चाज्ञविषया दीक्षा इति विशेषः। कारणत्वेनेति मुक्तेः प्रबोधस्य च। अत एव तेषां दीक्षया पाशमोक्षे कृते शुद्धभावात् विवेकजं प्रातिभं ज्ञानं समुदियात्॥

ननु एतन्न्यायमुखेनैव कस्मान्नोपपादितं, किं प्रतिपदं तद्ग्रन्थपाठेनेत्याशंक्याह

इत्येष पठितो ग्रन्थः
स्वयं ये बोद्धुमक्षमाः।
तेषां शिवोक्तिसंवादा-
द्बोधो दार्ढ्यं व्रजेदिति ॥१९६॥

एतच्च न केवलमत्रैवोक्तं, यावदन्यत्रापीत्याह

श्रीमन्निशाटने चात्म-
गुरुशास्त्रवशात्त्रिधा।
ज्ञानं मुख्यं स्वोपलब्धि
विकल्पार्णवतारणम् ॥ १९७ ॥

मन्त्रात्मभूतद्रव्याश-
दिव्यतत्त्वादिगोचरा ।
शंका विकल्पमूला हि
शाम्येत्स्वप्रत्ययादिति ॥१९८॥

यद्यप्यत्र गुरुतः शास्त्रतः स्वतश्चेति त्रिधा ज्ञानमुक्तं, तथापि विकल्पार्णवतारकत्वात्स्वोपलब्धि स्वत उद्भूतं ज्ञानं मुख्यं यतस्तीव्रमध्यशक्तिपातवतः स्वप्रत्ययादेव प्राधान्येन विकल्पमूला मन्त्रादिविषया षोढा शङ्का शाम्येदविकल्पस्वात्मसंविद्विश्रान्तो भवेदित्यर्थः । अंशेति सिद्धाद्या मन्त्रांशकास्तत्प्रकारत्वान्मन्त्रशङ्कायामेवान्तर्भूताः । आदिशब्दः प्रकारे । तेन द्रव्यशङ्काप्रकारभूताया जातिशङ्काया अपि ग्रहणम् । तदुक्तं तत्र

' त्रिप्रत्ययमिदं ज्ञानमात्मा शास्त्रं गुरोर्मुखम् ।
प्राधान्यात्स्वोपलब्धिः स्याद्विकल्पार्णवतारिणी ॥
विकल्पाज्जायते शङ्का सा शङ्का बन्धरूपिणी ।
बन्धोऽन्यो न हि विद्येत ऋते शङ्कां विकल्पजाम् ॥
विकल्पायासयुक्तस्य न हि स्याच्छ्रेयसी गतिः ।
मन्त्रशङ्कात्मशङ्का च द्रव्यशङ्का तथा पुनः ॥

भूतशङ्का तथा दिव्यकर्मशङ्का परा मता ।
पञ्चधा तु स्मृता शङ्का तत्त्वशङ्का परा स्मृता ॥
षाड्विधां कथयिष्यामि यथा मोक्षमवाप्स्यसि ।'

इत्याद्युपक्रम्य

' तस्मात्सर्वप्रयत्नेन स्वात्मप्रत्ययकारणम् ।
स्वसंवित्तिकरं नृणां नरशक्तिशिवात्मकम् ॥
बोद्धव्यं लयभेदेन यथाप्रत्ययमात्मनि ।
विकल्पक्षीणचित्तस्तु परमाद्वैतभावितः ॥
मुच्यते नात्र सन्देह इति सत्यं ब्रवीमि ते ॥ '

इति ॥ १९८ ॥

ननु श्रीपूर्वशास्त्रमधिकृत्येदमुच्यते इत्युपक्रान्तं, तत्किमिह श्रीमन्नन्दिशिखाद्यवान्तरग्रन्थार्थकथनेनेत्याशङ्क्याह

एनमेवार्थमन्तःस्थं
गृहीत्वा मालिनीमते ।

मालिनीमते निरूपितमिति प्राच्येन संबन्धः।

तदेव पठति

एवमस्यात्मनः काले
कस्मिंश्चिद्योग्यतावशात् ॥१९९॥
शैवी संबध्यते शक्तिः
शान्ता मुक्तिफलप्रदा ।

तत्संबन्धात्ततः कश्चि-
त्तत्क्षणादपवृज्यते ॥ २०० ॥
इत्युक्त्वा तीव्रतीव्राख्य-
विषयं भाषते पुनः ।
अज्ञानेन सहैकत्वं
कस्यचिद्विनिवर्तते ॥ २०१॥
रुद्रशक्तिसमाविष्टः
स यियासुः शिवेच्छया ।
भुक्तिमुक्तिप्रसिद्ध्यर्थं
नीयते सद्गुरुं प्रति ॥ २०२ ॥
तमाराध्य ततस्तुष्टा-
द्दीक्षामासाद्य शाङ्करीम् ।
तत्क्षणाद्वोपभोगाद्वा
देहपाताच्छिवं व्रजेत॥२०३॥

एतच्च स्वयमेव व्याचष्टे

अस्यार्थ आत्मनः काचि-
त्कलनामर्शनात्मिका ।

स्वं रूपं प्रति या सैव
कोऽपि काल इहोदितः ॥२०४॥
योग्यता शिवतादात्म्य-
योगार्हत्वमिहोच्यते ।

अस्य श्लोकचतुष्टयस्यायमर्थः । यदात्मनो या काचिद्बहिर्मुखताविलक्षणा स्वात्मप्रत्यवमर्शनात्मिका कलना, सैवेह कोऽपि कर्मसाम्यादिविलक्षणान्तःस्पर्शात्मा कालो, यदुक्तं कस्मिंश्चित्काल इति । शिवतादात्म्यलक्षणं योगमर्हति इति योग्यस्तस्य भावो योग्यता तादूप्यग्रहणसहिष्णुत्वमित्युक्तं योग्यतावशादिति ॥

ननु स्वात्मप्रत्यवमर्शे व्यतिरिक्तं तावन्निमित्तं किंचिन्नापेक्षणीयं तत्पूर्वमपि सोऽस्तु, यद्वा इदानीमपि माभूदित्याशङ्क्याह

पूर्वं किं न तथा कस्मा-
त्तदैवेति न संगतम् ॥ २०५ ॥
तथाभासनमुज्झित्वा
न हि कालोऽस्ति कश्चन ।

यदि नाम हि परस्य प्रकाशस्य तथास्वरूप-परामर्शात्मकतयावभासनमपहाय तन्निरपेक्षः स्वतन्त्रः कश्चित्कालः स्यात्, तत् तदधिकारेण चोद्येतापि यदिदानीमिव पूर्वमपि कस्मान्नैत-दिति। स एव पुनः प्रकाश्यदशामधिशयानः प्रकाश्यत्वादेव प्रकाशैकात्म्यापत्तेस्तदतिरेकेण नास्तीत्यसंगतमेवैतत् ॥

ननु यद्येवं, तत्कथमेतदतीतवर्तमानाद्याभा-ससंभिन्नतया भावजातं भायादित्याशङ्क्याह

स्वातन्त्र्यात्तु तथाभासे
कालशक्तिर्विजृम्भताम्॥२०६
नतु पर्यनुयुक्त्यै सा
शिवे तन्महिमोदिता ।

मायापदे पुनस्तत्स्वातन्त्र्यादतीतवर्तमानाद्या-भासनिमित्तं विजृम्भतां नाम कालशक्तिः, पर-स्मिन्प्रकाशे पुनस्तदभेदमाधातुं न समर्था यत-स्तत्स्फारमात्रमेवासाविति युक्तं प्राग्बहुशः। एव-मात्मनः स्वस्वरूपामर्शने सति शिवतादात्म्या-र्हतया तच्छक्तिः संबध्यत इति प्रथमश्लोकार्थः॥

ननु

' अवस्थात्रितयेऽप्यस्मिंस्तिरोभावनशीलया ।
शिवशक्त्या समाक्रान्ताः प्रकुर्वन्ति विचेष्टितम् ॥
(मा० वि० ५।३६)

इत्याद्युक्त्या सदैवैषां शिवशक्तिसंबन्धोऽस्ति, तत्कस्मिंश्चित्काले सा संबध्यते इत्येतत्कस्मादुक्तमित्याशङ्कां प्रदर्श्य प्रतिक्षिपति

ननु शैवी महाशक्तिः
संबद्धैवात्मभिः स्थिता
सत्यं साच्छादनात्मा तु ।
शान्ता त्वेषा स्वरूपदृक् ॥२०७॥

आच्छादनात्मेति प्रकाशात्मस्वरूपावरणात्, स्वरूपदृगिति तत्तदावरणविगमनेन परिपूर्णस्वस्वरूपप्रकाशिकेत्यर्थः । यदुक्तं

' वामा संसारवमना स्वरूपावरणात्मिका । '

इति । तथा

' क्रमेण सर्वभोगाप्तसंस्कारार्थपरम्पराम् ।
संजिहीर्षुर्महापूर्णा ज्येष्ठा मोक्षैकपद्धतिः ॥ '

इति ॥ २०७ ॥

नन्वस्य स्वरूपावरणदर्शनाद्यनेककार्यकरणप्रवणतया विमर्शमयी स्वातन्त्र्यशक्तिरेकैव सर्वतः समुज्जृम्भते, तत् आच्छादनात्मा वामेति

शान्ता च ज्येष्ठा इत्येतत्कथमुक्तमित्याशङ्क्याह

क्षोभो हि भेद एवैक्यं
प्रशमस्तन्मयी ततः॥२०८॥

भेदो हि क्षोभ एव नतु शान्तत्वम्। ऐक्यमभेदश्च प्रशम एव नतु क्षोभः। ततो हतोरेषा शक्तिस्तन्मयी क्षोभमयी प्रशममयी च भवेत्, येनोक्तमियमाच्छादनात्मा शान्ता चेति॥

ननु भवत्वेवं, शान्ता पुनः किं समनन्तरमेव स्वरूपं दर्शयेदुत केनचित्क्रमेणेत्याशङ्क्याह

तया शान्त्या तु संबद्धः
स्थितः शक्तिस्वरूपभाक्।
त्यक्ताणुभावो भवति
शिवस्तच्छक्तिदार्ढ्यतः॥२०९॥

तया शान्त्या शान्तया शक्त्या पुनः संबद्धः स्थितः सन् आत्मा शक्तिस्वरूपभाक् साक्षाच्छुद्धविद्यादशाधिशायी भवेत्, अत एव त्यक्ताणुभावः संस्तस्यामेव शक्तौ दार्ढ्यं तदावेशवैवश्यमाश्रित्य शिवो भवति तत्तदावरणातिरस्करिणीतिरस्कारादभिव्यक्तपूर्णकर्तृत्वसतत्त्व—

संविदेकरूपः स्यादित्यर्थः। यदुक्तं समनन्तरमेव

' स एव प्रतिभायुक्तः शक्तितत्त्वं निगद्यते ।
तत्पातावेशतो मुक्तः पशुरेव भवार्णवात् ॥ '

इति ॥ २०९ ॥

नन्वेवमस्य स्वरूपलाभः किं सत्येव देहे भवेत्, उतासतीत्याशङ्क्याह

तत्रापि तारतम्यादि-
वशाच्छीघ्रचिरादितः ।
देहपातो भवेदस्य
यद्वा काष्ठादितुल्यता॥२१०॥

ननु अहंचमत्कारसारपरसंविदद्वयमयेऽपि अस्मद्दर्शने यदि जीवतोऽपि काष्ठादितुल्यता नाम मुक्तिस्तत्सर्वगुणच्छेदादेवंप्रायां मुक्तिमभिदधतामाक्षपादानां क इव उपहासावसर इत्याशङ्क्याह

समस्तव्यवहारेषु
पराचीनितचेतनः ।
तीव्रतीव्रमहाशक्ति-
समाविष्टः स सिध्यति॥२११॥

स तीव्रतीव्रशक्तिभाक् समस्तेषु बाह्यव्यवहारेषु पराचीनितं पराचि भवं संपादितं चेतनं येन स पराङ्मुखीकृतानुसंधानः सिद्ध्यति परसंविच्चमत्कारानुभवलाभभाजनं भवतीत्यर्थः ॥

एवमेतदुपसंहरन्नन्यदुपक्षिपति

एवं प्राग्विषयो ग्रन्थ
इयानन्यत्र तु स्फुटम् ।
ग्रन्थान्तरं मध्यतीव्र-
शक्तिपाताशसूचकम्॥ २१२॥

प्राग्विषय इति तीव्रतीव्रशक्तिपातविषयः । इयानिति सार्धश्लोकरूपः । अन्यत्रेति मध्यतीव्रमन्दतीव्राख्ये शक्तिपातद्वये । मध्यतीव्राख्यस्य द्वितीयस्य शक्तिपातस्य प्राथमिकेनांशेन भागेन सूचकमर्थाद्वितीयेनांशेन, तच्च मन्दतीव्राख्यस्य तृतीयस्यास्य सूचकम् । यद्वक्ष्यति

'स इत्यन्तो ग्रन्थ एष द्वितीयविषयः स्फुटः ।
अन्यस्तु मन्दतीव्राख्यशक्तिपातविधिं प्रति' ॥ २१७ ॥

इति ॥ २११ ॥

तदेव व्याचष्टे

अज्ञानरूपता पुंसि
बोधः संकोचिते हृदि ।
संकोचे विनिवृत्ते तु
स्वस्वभावः प्रकाशते॥२१३॥

इह हृदि सारभूते विमर्शात्मनि रूपे, संकोचिते गुणीभावमापादिते, यः पुंसि परिमितात्मनि अपूर्णख्यातिरूपो बोधः सैवाज्ञानरूपता तेन सहैकत्वमित्यर्थः । स एव संकोचहेतुकश्चेत्कस्यचिन्निवृत्तः, तदास्य स्व एवानन्यसाधारणः, स्वभावः प्रकाशते पूर्णज्ञानक्रियो भवेदित्यर्थः । तन्निवृत्तौ च पारमेश्वरः शक्तिपात एव निमित्तम् । तदुदये च तानि तानि चिह्नानि जायन्ते । येनास्य शक्तिपातो वृत्त इति सर्वं उपलक्षयेत् ॥ २१३ ॥

तदाह

रुद्रशक्तिसमाविष्ट
इत्यनेनास्य वर्ण्यते ।
चिह्नवर्गो य उक्तोऽत्र
रुद्रे भक्तिः सुनिश्चला॥२१४॥

मन्त्रसिद्धिः सर्वतत्त्व-
वशित्वं कृत्यसंपदः ।
कवित्वं सर्वशास्त्रार्थ-
बोद्धृत्वमिति तत्क्रमात् ॥२१५॥
स्वतारतम्ययोगात्स्या-
देषां व्यस्तसमस्तता ।
तत्रापि भुक्तौ मुक्तौ च
प्राधान्यं चर्चयेद्बुधः ॥२१६॥

उक्त इति श्रीपूर्वशास्त्रे । तदुक्तं तत्र

'रुद्रशक्तिसमावेशस्तत्र नित्यं प्रतिष्ठितः ।
सति तस्मिंश्च चिह्नानि तस्यैतानि विलक्षयेत् ॥
तत्रैतत्प्रथमं चिह्नं रुद्रे भक्तिः सुनिश्चला ।
द्वितीयं मन्त्रसिद्धिः स्यात्सद्यःप्रत्ययकारिका ॥
सर्वतत्त्ववशित्वं च तृतीयं लक्षणं स्मृतम् ।
प्रारब्धकार्यनिष्पत्तिश्चिह्नमाहुश्चतुर्थकम् ॥
कवित्वं पञ्चमं ज्ञेयं सालङ्कारं मनोहरम् ।
सर्वशास्त्रार्थवेत्तृत्वमकस्माच्चास्य जायते ॥' (८।१३)

इति । कृत्यसंपद इति कृत्यानां प्रारब्धानां कार्याणां निष्पत्तय इत्यर्थः । तत्क्रमादिति तस्या रुद्रशक्तेः क्रमाद्यथायथमतिशयादित्यर्थः।

अत एवाह स्वेत्यादि । स्वतारतम्येत्यर्थाद्रुद्र-शक्तेः। तत्रापीति, एवं व्यस्तसमस्ततायामपी-त्यर्थः । तथाहि

'भक्तिरेव परां काष्ठां प्राप्ता मोक्षोऽभिधीयते ।'

इत्युक्त्या भक्त्यादीनां मुक्तौ, मन्त्रसिद्ध्यादीनां च भुक्तौ प्राधान्यमन्यत्र चानुषङ्ग इति । समस्तं चेदं चिह्नजातमस्मिन्नेव ग्रन्थकारे प्रा-दुरभूदिति प्रसिद्धिः । यद्गुरवः

'अकस्मात्सर्वशास्त्रार्थज्ञत्वाद्यं लक्ष्मपञ्चकम् ।
यस्मिञ्छ्रीपूर्वशास्त्रोक्तमदृश्यत जनैः स्फुटम् ॥'

इति ॥ २१६ ॥

एतदुपसंहरन्मन्दतीव्रग्रन्थं विभजति

स इत्यन्तो ग्रन्थ एष
द्वितीयविषयः स्फुटः ।
अन्यस्तु मन्दतीव्राख्य-
शक्तिपातविधिं प्रति॥२१७॥

एतदेव व्याचष्टे

मन्दतीव्राच्छक्तिबलाद्-
यियासास्योपजायते ।

शिवेच्छावशयोगेन
सद्गुरुं प्रति सोऽपि च॥२१८॥
अत्रैव लक्षितः शास्त्रे
यदुक्तं परमेष्ठिना ।

शिवेच्छावशयोगेनेति शिवेच्छाया वशात्स्वातन्त्र्याद्योगेन शैवी शक्तिरनन्यापेक्षतयैवास्य संबध्यत इत्यर्थः। तद्योगश्चानेकविध इति विभक्तं मन्दतीव्राच्छक्तिबलादिति । सोऽपीति सद्गुरुः। अत्रैव शास्त्रे इति प्रक्रान्ते श्रीपूर्वसंज्ञके॥

तदेव पठति

यः पुनः सर्वतत्त्वानि
वेत्त्येतानि यथार्थतः॥२१९॥
स गुरुर्मत्समः प्रोक्तो
मन्त्रवीर्यप्रकाशकः ।
दृष्टाः संभावितास्तेन
स्पृष्टाश्च प्रीतचेतसा॥२२०॥
नराः पापैः प्रमुच्यन्ते
सप्तजन्मकृतैरपि ।

ये पुनर्दीक्षितास्तेन
प्राणिनः शिवचोदिताः॥२२१॥
ते यथेष्टं फलं प्राप्य
पदं गच्छन्त्यनामयम्।

यथार्थत इति पाञ्चदश्यादिरूपतया सर्व-सर्वात्मकत्वेनेत्यर्थः। मत्सम इति श्रीश्रीकण्ठ-नाथोक्तिः। एतदेव मन्त्रवीर्यप्रकाशक इत्यादिना प्रकाशितम्। संभाविता इति निर्ध्याताः। प्रमु-च्यन्त इति ज्ञानाग्निदग्धत्वात्। शिवचोदिता इति आयातशक्तिपाताः। यथेष्टं फलमिति भुक्तिमुक्तिलक्षणम्॥

ननु शिवेच्छयास्य सद्गुरुं प्रति धियासा जायते इत्यत्र किं लिङ्गमित्याशङ्क्याह

किं तत्त्वं तत्त्ववेदी क
इत्यामर्शनयोगतः॥२२२॥
प्रतिभानात्सुहृत्सङ्ग-
द्गुरौ जिगमिषुर्भवेत्।
एवं जिगमिषायोगा-
दाचार्यःप्राप्यते स च॥२२३॥

तारतम्यादियोगेन
संसिद्धः संस्कृतोऽपि च ।

अस्य हि शिवशक्तिपातवशादेवमामर्शयोगिनी प्रतिभा जायते कल्याणमित्रपरिचयो वा। यस्य हि स्वयमेवं प्रतिभा नोदियात्, तस्य तदासङ्गादिति उभयथाप्येवं प्रतिभायामुदितायां सद्गुरुं प्रति जिगमिषुर्भवेत्। अतो जिगमिषायोगाद्गतौ सत्यामाचार्यस्तेन प्राप्यते। स चाचार्यः शक्तिपातस्य तीव्रत्वात् प्रागुक्तलक्षणः सांसिद्धिकः, इतरथा तु संस्कृतः ॥

एवं चास्य उपलक्षणपरतया अवान्तरमपि तरतमभावं विभजति

प्राग्भेदभागी झटिति
क्रमात्सामस्त्यतोंशतः॥२२४॥
इत्यादिभेदभिन्नो हि
गुरोर्लाभ इहोदितः ।
तस्माद्दीक्षां स लभते
सद्य एव शिवप्रदाम्॥२२५॥

ज्ञानरूपां यथा वेत्ति
सर्वमेव यथार्थतः ।
जीवन्मुक्तः शिवीभूत-
स्तदैवासौ निगद्यते॥२२६॥

तत्र प्राग्भेदभागी संसिद्धविषयो यो लाभः प्राप्तिः, स शाक्तिपातस्य तारतम्ययोगात् गुरोः सामस्त्यतः सामस्त्येन अंशतः अंशेन प्रागुक्त-नीत्या सर्वगस्यांशगतस्य चाक्रमेण क्रमेण वा इत्यादिभेदभिन्नो भवेत्, एवं संस्कृतविषयोऽपि-कल्पितस्याकल्पितस्य वा इत्याद्यनुसर्तव्यम् । स चैवंविधात्तस्मादाचार्यादेवं दीक्षां लभते यथासौ तदैव शिवीभूतः सन् सर्वमेव यथार्थतो वेत्ति च जीवन्मुक्तश्च निगद्यते । यदुक्तं

'.....तत्क्षणाद्वा शिवं व्रजेत् ।'

इति ॥ २२६ ॥

ननु देहसंबन्धेऽप्यस्य कथमेवंरूपत्वं स्या-दित्याशङ्क्याह

देहसंबन्धिताप्यस्य
शिवतायै यतः स्फुटा ।

नहि तदानीमस्य देहादावात्माभिमानो भवेदिति भावः ॥

सा चेयमनेकप्रकारा दीक्षेत्याह

अस्यां भेदो हि कथना-
त्सङ्गमादवलोकनात् ॥२२७॥
शास्त्रात्संक्रमणात्साम्य-
चर्यासंदर्शनाच्चरोः ।
मन्त्रमुद्रादिमाहात्म्या-
त्समस्तव्यस्तभेदतः ॥२२८॥
क्रियया वान्तराकार-
रूपप्राणप्रवेशतः ।

कथनादिति तत्त्वस्य। संगमादिति संघटना-मात्रात्। शास्त्रादिति व्याख्यानात्। साम्यचर्या-संदर्शनादिति साम्येन जात्यादिभेदतिरस्कारेण, बाह्यचर्यायाः संदर्शनात् विमर्शनादनुष्ठानादिति यावत्। चरोरिति कुण्डगोलकादेः। क्रिययेति होमादिरूपया। वा शब्दः समुच्चये। आन्तराकाररूपप्राणप्रवेशत इति बाह्यदेहापे-

क्षयाभ्यन्तराकारप्राणप्रवेशाद्योगक्रमेणेत्यर्थः । एतच्च शक्तिपातस्य तारतम्यात् व्यस्तं समस्तं वा भवेदित्युक्तं समस्तव्यस्तभेदत इति ॥

एवंविधया चानया 'कथनादुभयसामरस्यम्' इत्याद्युक्तनीत्या सत्यपि देहे परसंविद्विश्रान्तिर्जायते, येनायं जीवन्मुक्त इति व्यपदेशपात्रतामियात् । तदाह

तदा च देहसंस्थोऽपि
स मुक्त इति भण्यते॥२२९॥

किमत्र प्रमाणमित्याशङ्क्याह

उक्तं च शास्त्रयोः श्रीम-
द्वत्तमालागमाख्ययोः ।

तदेव पठति

यस्मिन्काले तु गुरुणा
निर्विकल्पं प्रकाशितम्॥२३०॥
तदैव किल मुक्तोऽसौ
यत्रं तिष्ठति केवलम् ।

यत्रमिति अकिंचित्करत्वात् ॥

ननु यदि तदानीं देहादेर्यत्रप्रायता, तत्कथं सुखदुःखे स्यातां, स्यातां चेन्न मुक्तत्वमित्याशङ्क्याह

प्रारब्धकर्मसंबन्धा-
देहस्य सुखिदुःखिते ॥२३१॥
न विशङ्केत तच्च श्री-
गमशास्त्रे निरूपितम् ।

देहस्य देहबुद्ध्यादेरनात्मनः। न विशङ्केतेति सुखदुःखानुभवान्नास्मि मुक्त इति । ननु नेयं निर्मूला शङ्का, तत्कथमेवमुक्तमित्याशङ्क्याह 'तच्च श्रीगमशास्त्रे निरूपितम्' इति। चो ह्यर्थे॥

तदेव पठति

अविद्योपासितो देहो
ह्यन्यजन्मसमुद्भवा ॥२३२॥
कर्मणा तेन बाध्यन्ते
ज्ञानिनोऽपि कलेवरे ।

ननु देहप्रारब्धृणि त्रीणि जात्यायुर्भोगदानि कर्माणि संभवन्ति इति कथं कर्मणा इत्येकवचनेन निर्देशः, तच्छब्दस्य च यच्छब्दनिर्दे-

श्यपरामृश्यार्थानुपलक्षणात् कथमुपपत्तिरित्या-
शङ्क्याद्वयं गर्भीकृत्याह

जात्यायुर्भोगदस्यैक-
प्रघट्टकतया स्थितिः ॥२३३॥
उक्तैकवचनाद्धिश्च
यतस्तेनेतिसंगतिः ।

एकवचनादिति कर्मणेति। यतस्तेनेतिसंगति-
रिति यतस्तेनेत्येवंरूपा हेतुहेतुमद्भावलक्षणा
संगतिर्यस्यासौ एवंविधो हिरिति हिशब्दार्थ
एवं तच्छब्देन परामृश्यत इत्यर्थः। तेन जन्मा-
न्तरोपार्जितेन जात्यायुर्भोगदत्वात् त्रिविधेन
एकप्रघट्टकतयोक्तेन कर्मणा यतो मायाधिष्ठितो
देहो भवति, तेन कलेवरे सति ज्ञानिनोऽपि
बाध्यन्ते सुखदुःखानुभवाद्बद्धा इव लक्ष्यन्ते इति
श्रीगमग्रन्थार्थः। अनेन च उपभोगाद्वा शिवं
व्रजेदिति विवृतम् ॥

इदानीं तु देहपाताच्छिवं व्रजेदिति विवृणोति

अभ्यासयुक्तिसंक्रान्ति-
वेधघट्टनरोधतः ॥२३४॥

हृतेर्वा मन्त्रसामर्थ्या-
त्पाशच्छेदप्रयोगतः ।
सद्योनिर्वाणदां कुर्या-
त्सद्यःप्राणवियोजिकाम् २३५

अभ्यासः पौनःपुन्येन प्राणचारामर्शनम् । युक्तिर्वक्ष्यमाणजालप्रयोगादिरूपा । संक्रान्तिः परपुरप्रवेशादिः । वेधो मन्त्रादिरूपतया वक्ष्यमाणः । घट्टनं प्राणविक्षेपः । रोधः प्राणस्य गतागतपरिहारेण मध्यधामनि अवस्थापनम् । मन्त्रस्येति कालरात्र्यादेः । सद्य इति दीक्षासमकालम् ॥

न चेयं सर्वथा कार्येत्याह

तत्र त्वेषोऽस्ति नियम
आसन्ने मरणक्षणे ।
तां कुर्यान्नान्यथारब्धृ
कर्म यस्मान्न शुद्ध्यति २३६
उक्तं च पूर्वमेवैत-
न्मंत्रसामर्थ्ययोगतः ।
प्राणैर्वियोजितोऽप्येष
भुङ्क्ते शेषफलं यतः ॥२३७॥

तज्जन्मशेषं विविध-
मतिवाह्य ततः स्फुटम् ।
कर्मान्तरनिरोधेन
शीघ्रमेवापवृज्यते ॥२३८॥

अन्यथेति अनासन्ने मरणे । यदुक्तं

'दृष्ट्वा शिष्यं जराग्रस्तं व्याधिभिः परिपीडितम् ।
उत्क्रमय्य ततस्त्वेनं परतत्त्वे नियोजयेत् ॥'

इति । ननु अनासन्नमरणस्यापीयमस्तु को नियमः, अस्यां हि कृतायां तदैव मुक्तिः स्यादिति किं मरणासन्नक्षणापेक्षादिविलम्बनेनेत्याशङ्क्योक्तमारब्धृ कर्म यस्मान्न शुद्ध्यतीति । ननु इयं चेत्कर्मणः शोधिका तद्भविष्यत इवास्याप्यस्तु, न चेदस्येव तस्यापि मा भूदित्याशङ्क्योक्तमुक्तं च पूर्वमेवैतदिति । पूर्वमिति नवमाह्निके । यदुक्तं तत्र

'आरब्धकार्यं देहेऽस्मिन्यत्पुनः कर्म तत्कथम् ।
उच्छिद्यतामन्त्यदशं निरोद्धुं न हि शक्यते ॥' (१३१)

इत्यादि । ननु अनया मन्त्रसामर्थ्यात्प्राणवियोग एव चेत्कृतस्तद्भोक्तुरेवाभावात् कस्य नामैतत्कर्मफलेदिति किं तच्छुद्ध्यशुद्धिविचारेणेत्याशङ्क्याह

मन्त्रेत्यादि । शेषस्य शोधितादवशिष्टस्य देहारम्भकस्य कर्मण इत्यर्थः । यतस्तस्मात् प्राक्तनाज्जन्मनः शेषं प्रारब्धृकर्मकार्यं विचित्रमायुर्भोगादि ततो भोगादतिवाह्य परिसमाप्य कर्मान्तरस्य भविष्यदादेरपि विलम्बकारिणोऽप्यन्यस्य कस्यचिदभावादपवृज्यते मुच्यत इत्यर्थः। तद्युक्तमुक्तमासन्न एव मरणक्षणे तां कुर्यादिति ॥ २३८ ॥

अत आह

तस्मात्प्राणहरीं दीक्षां
नाज्ञात्वा मरणक्षणम् ।
विदध्यात्परमेशाज्ञा-
लङ्घनैकफला हि सा ॥२३९॥

एवं हि परमेश्वराज्ञोल्लङ्घनादन्यत्किंचिन्न सिद्ध्यति इत्यावेदितं स्यात् ॥ २३९ ॥

एवं प्रकृतमुपसंहरन्नन्यदवतारयति

एकस्त्रिकोऽयं निर्णीतः
शक्तिपातेऽप्यथापरः ।

एकस्त्रिक इति तीव्राख्यः ॥

तदेवाह

तीव्रमध्ये तु दीक्षायां
कृतायां न तथा दृढाम् २४०
स्वात्मनो वेत्ति शिवतां
देहान्ते तु शिवो भवेत् ।

न तथा दृढामिति अविकल्पस्वभावस्वात्मज्ञानसाक्षात्काराभावात् ॥

किमत्र प्रमाणमित्याशङ्क्याह

उक्तं च निशिसंचार-
योगसंचारशास्त्रयोः ॥२४१॥

तदेवार्थद्वारेण पठति

विकल्पात्तु तनौ स्थित्वा
देहान्ते शिवतां व्रजेत् ।

यदुक्तं तत्र

'विकल्पयुक्तचित्तस्तु पिण्डपाताच्छिवं व्रजेत् ।'

इति ॥

मध्यमध्ये शक्तिपाते
शिवलाभोत्सुकोऽपि सन् २४२

बुभुक्षुर्यत्र युक्तस्त-
द्भुक्त्वा देहक्षये शिवः ।
मन्दमध्ये तु तत्रैव
तत्त्वे क्वापि नियोजितः २४३
देहान्ते तत्त्वगं भोगं
भुक्त्वा पश्चाच्छिवं व्रजेत् ।

यत्रेति अभिमते तत्त्वादौ । तदिति तत्रत्यमेव योगाभ्यासादिलब्धं भोगजालम् । भुक्त्वा इत्यर्थादनेनैव देहेन । अत एवोक्तं देहक्षये शिव इति । तत्रैवेति प्रक्रान्ते शक्तिपाते । क्वापि यथाभिमते । नियोजित इत्यर्थाच्छिवलाभोत्सुकोऽपि सन्निति । भुक्त्वेत्यर्थादेहान्तरेण । अत एवोक्तं देहान्ते तत्त्वगं भोगं भुक्त्वेति । यदुक्तमनेनैवान्यत्र

'मध्यमध्याच्छिवतोत्सुकोऽपि भोगमेष्यभुर्भवतीति तथैव दीक्षायां ज्ञानभाजनम् । स च योगाभ्यासलब्धमनेनैव देहेन भोगं भुक्त्वा देहान्ते शिव एव । निकृष्टमध्यात्तु देहान्तरेण भोगं भुक्त्वा शिवत्वमेति॥'(तं० सा० ११ आ०)

इति ॥

एवमप्यत्र तरतमभावः कश्चित्संभवति, येन विशेषान्तरमप्युदियादित्याह

तत्रापि तारतम्यस्य
संभवाच्चिरशीघ्रता ॥२४४॥
बह्वल्पभोगयोगश्च
देहभूमाल्पताक्रमः।

तत्र प्रथमः प्रकारः पुत्रकविषयः। शिष्टं तु प्रकारद्वयं शिवधर्मिसाधकविषयमिति निरूपितम् ॥

इदानीं तु लोकधर्मिविषयमवशिष्टं शक्तिपातं निरूपयति

तीव्रमन्दे मध्यमन्दे
मन्दमन्दे बुभुक्षुता ॥२४५॥
क्रमान्मुख्यातिमात्रेण
विधिनैत्यन्ततः शिवम्।

अत्रैवंप्रकारे मन्दाख्ये शक्तिपाते बुभुक्षुता अर्थाल्लोकधर्मिणः साधकस्य क्रमादतिमात्रेण मुख्या यथायथं प्रधानभूतेत्यर्थः। एवमप्यसौ

लोकधर्मी पर्यन्ते विधिना स्वोचितेन दीक्षा-प्रकारेण शिवमेति अपवृज्यत एवेत्यर्थः । यदुक्तमनेनैव

'भोगोत्सुकता यदा प्रधानभूता तदा मन्दत्वं
पारमेश्वरमन्त्रयोगोपायतया यतस्तत्रौत्सुक्यम् ।
पारमेशमन्त्रयोगादेश्च यतो मोक्षपर्यन्तत्वमतः
शक्तिपातरूपता । तत्रापि तारतम्यात्त्रैविध्यम् ॥'

इति । अयं चात्राशयः—यः कश्चित्तीव्रमन्दशक्तिपातवांल्लोकधर्मी, स दीक्षाबलात् देहान्ते क्वचन यथाभिमते भुवनादौ भोगान्भुक्त्वा शिवतां यायात् । यदुक्तं

'लोकधर्मिणमारोप्य मते भुवनभर्तरि ।
तद्धर्मापादनं कुर्याच्छिवे वा मुक्तिकांक्षिणम् ॥' (मृगेन्द्रत०)

इति । वक्ष्यति च

'प्रारब्धदेहभेदे तु भुङ्क्तेऽसावणिमादिकम् ।
भुक्त्वोर्ध्वं याति यत्रैष युक्तोऽथ सकलेऽकले ॥'(१५।३१)

इति । कश्चिच्च मध्यमन्दशक्तिपातवान् क्वचन भुवनादौ कंचित्कालं भोगान्भुक्त्वा, तदीश्वरदीक्षितः पर्यन्ते शिवतां गच्छेत् । मन्दमन्दशक्तिपातवान् पुनस्तत्रैव सालोक्यसामीप्यसायुज्या-

सादनक्रमेण चिरतरं कालं भोगान्भुक्त्वा, तत एव दीक्षामासाद्य शिवतामियात् ॥

श्रीपूर्वशास्त्रीयमेव ग्रन्थं मतान्तरेण व्याचष्टे

अन्ये यियासुरित्यादि-
ग्रन्थं प्राग्ग्रन्थसंगतम्॥२४६॥
कुर्वन्ति मध्यतीव्राख्य-
शक्तिसंपातगोचरम् ।

प्राग्ग्रन्थसंगतमिति प्राग्ग्रन्थेन 'अज्ञानेन सह' इत्यादिना संगतं संबद्धमित्यर्थः । अत्रैव विशेषणद्वारेण हेतुर्मध्यतीव्राख्यशक्तिसंपातगोचरमिति ॥

तदेवाह

यदा प्रतिभयाविष्टोऽ-
प्येष संवादयोजनाम्॥२४७॥
इच्छन्यियासुर्भवति
तदा नीयेत सद्गुरुम् ।

यदा हि रुद्रशक्तिसमावेशादज्ञानविनिवृत्त्या प्रोदितप्रातिभज्ञानोऽप्येष मध्यतीव्रशक्तिपातवान् संवादयोजनामिच्छन् प्रागुक्तयुक्त्या संवा-

ददाढर्यमुत्पादयितुं यियासुर्गुरुकुलं जिगमिषुर्भवति, तदा पारमेश्वर्या शक्त्या सद्गुरुं प्रति नीयेत तदाभिमुख्येनास्य प्रवृत्तिरुत्पाद्यत इत्यर्थः ॥

नचैतदविशेषेणैव भवेदित्याह

न सर्वः प्रतिभाविष्टः
शक्त्या नीयेत सद्गुरुम्॥२४८॥
इति ब्रूते यियासुत्वं
वक्तव्यं नान्यथा ध्रुवम् ।

यियासुत्वमिति प्रागेवोक्तं ब्रूत इति संबन्धः। अन्यथेति सर्वस्यैव शक्तिकर्तृके सद्गुरुप्रापणे। न वक्तव्यमिति यियासुत्वम्। यदि नाम हि सर्वोऽपि प्रातिभज्ञानभागाचार्यः सद्गुरुं प्रति अविशेषेण शक्त्या नीयेत, तद्यियासुशब्दस्य प्रयोगं विना

'रुद्रशक्तिसमाविष्टः स शिवेच्छया ।
भुक्तिमुक्तिप्रसिद्ध्यर्थं नीयते सद्गुरुं प्रति ॥'

इत्येतावदभिधानीयम् ॥

तदाह

रुद्रशक्तिसमाविष्टो
नीयते सद्गुरुं प्रति ॥२४९॥

एवं हि प्रातिभस्याचार्यस्य सभित्तिनिर्भित्त्यादिभेदभिन्नत्वं न भवेदिति भावः ॥ २४९॥

तस्मात्प्रातिभज्ञानवत्त्वेऽपि संवाददार्ढ्यमनुपेक्षमाण एव यियासुर्भवति, नान्य इत्याह

तेन प्राप्तविवेकोत्थ-
ज्ञानसंपूर्णमानसः ।
दार्ढ्यसंवादरूढ्यादे-
र्यियासुर्भवति स्फुटम्॥२५०॥

नचैतन्निर्मूलं व्याख्यानमित्याह

उक्तं नन्दिशिखातन्त्रे
प्राच्यषट्के महेशिना ।
अभिलाषः शिवे देवे
पशूना भवते तदा ॥२५१॥
यदा शैवाभिमानेन
युक्ता वै परमाणवः ।
तदैव ते विमुक्तास्तु
दीक्षिता गुरुणा यतः॥२५२॥
प्राप्तिमात्राच्च ते सिद्ध-
साध्या इति हि गम्यते ।

यद्यपि यदैव परमा अत्यन्तं बद्धा अणवः प्रातिभज्ञानात्मना शैवेनाभिमानेन युक्तास्तदैव विमुक्ताः, तथापि तदा तेषां प्रागवस्थापेक्षया पशूनां संवाददार्ढ्याय शिवे

'शिव आचार्यरूपेण लोकानुग्रहकारकः ।'

इत्याद्युक्त्या गुरावभिलाषो यियासा भवति, यतो गुरुणा दीक्षिताः कृतसंस्कारा भवन्तीत्यर्थः । ततश्च

'यस्त्वकल्पितरूपोऽपि संवाददृढताकृते ।
अन्यतो लब्धसंस्कारः स साक्षाद्भैरवो गुरुः ॥'

तंत्रालो० (४।७७)

इत्याद्युक्त्था गुर्वादेरन्यतः संस्कारस्य दृढताकृते प्राप्तिमात्रादेव ते सिद्धसाध्या निकृत्तभवबन्धना भवन्ति इति गम्यते तात्पर्येणावबुध्यत इत्यर्थः । यदुक्तं तत्र सार्धश्लोकानन्तरं

'समाधाय यदा शक्त्या गुरुमूर्तिं तदा विभुः ।
आविश्य दीक्षयाणूनां स्वशक्त्या शक्तिमान्पतिः ॥
कृन्तते बन्धजालं तु कृत्यन्ते बन्धसंचयाः ।
तेन बन्धनिकृन्ती सा कथिता तु शिवाध्वरे ॥'

इति ॥

नन्वेवं यियासुरित्यादिग्रन्थश्चेन्मध्यतीव्रस्य

शक्तिपातस्य विषयस्तन्मन्दतीव्रस्य कः स्यादित्याशङ्क्याह

तमाराध्येति तु ग्रन्थो
मन्दतीव्रैकगोचरः ॥२५३॥

तीव्रतीव्रविषयस्तु ग्रन्थः प्राग्वदेवेत्यर्थसिद्धम् ॥

तदेवोपसंहरति

नवधा शक्तिपातोऽयं
शंभुनाथेन वर्णितः ।

अमुमेवार्थं तात्पर्यगत्या निरूपयति

इदं सारमिह ज्ञेयं
परिपूर्णचिदात्मनः ॥२५४॥
प्रकाशः परमः शक्ति-
पातोऽवच्छेदवर्जितः ।
तथाविधोऽपि भोगांशा-
वच्छेदेनोपलक्षितः ॥२५५॥
अपरः शक्तिपातोऽसौ
पर्यन्ते शिवताप्रदः ।

इदम् इहास्मिन् नवविधेऽपि शक्तिपाते सारं

ज्ञेयं यत्परिमितेऽप्यात्मनि परिपूर्णचिदात्मतया यः परमः प्रकाशः, स परमः शक्तिपात उच्यते यतोऽवच्छेदवर्जितस्तत्तदुपाधिविगलनादनवच्छिन्नसंविदेकस्वभाव इत्यर्थः। असौ पुनरपरः शक्तिपातो, यः परिपूर्णचिदात्मतया प्रकाशमानत्वेऽपि भोगांशावच्छिन्नः। अत एवोक्तं पर्यन्ते शिवताप्रद इति ॥

नन्वेवंविधस्यास्य शक्तिपातस्य को हेतुः, किं कर्म किमुतान्यत्किंचिदित्याशङ्क्याह

उभयत्रापि कर्मादे-
र्मायान्तर्वर्तिनो यतः ॥२९६॥
नास्ति व्यापार इत्येवं
निरपेक्षः स सर्वतः ।

नास्ति व्यापार इति नैतत्कृतः शक्तिपात इत्यर्थः। अत्र विशेषणद्वारेण हेतुर्मायान्तर्वर्तिन इति। यदेव हि कर्मादि अणोर्मायान्तर्वर्तितायां निमित्तं, तत्कथं तदुत्तीर्णतायां निमित्ततां यायादित्याशयः। यथोक्तं प्राक्

'तत्रास्य नाणुगे तावदपेक्ष्ये मलकर्मणी ।
अणुस्वरूपताहानौ तद्गतं हेतुतां कथम् ॥

व्रजेन्मायानपेक्षत्वमत एवोपपादयेत् ।' (११५)

इति । अनेन च शक्तिपातविचित्रतानन्तर्येणानुजोद्देशोद्दिष्टमायानिरपेक्षत्वसिद्धेरवकाशो दत्तः॥

अतश्च शुद्धात्मनां कर्मादिनैरपेक्ष्येणैव भैरवीभावो भवेदित्याह

तेन मायान्तराले ये
रुद्रा ये च तदूर्ध्वतः ॥२५७॥
स्वाधिकारक्षये तैस्तै-
र्भैरवीभूयते हठात् ।
ये मायया ह्यनाक्रान्ता-
स्ते कर्माद्यनपेक्षिणः ॥२५८॥
शक्तिपातवशादेव
तां तां सिद्धिमुपाश्रिताः ।

हठादिति कर्मादिनिरपेक्षपरमेश्वरशक्तिपातबलादित्यर्थः । ननु मायोर्ध्वं कर्मादेरसंभवादस्तु नाम तन्नैरपेक्ष्यं, मायान्तस्तु तत्संभवात्कथमेतत्संगच्छताम् । तथात्वे वा कस्मात्तत्तत्सिद्ध्युदय इत्याशङ्क्याह ये माययेत्यादि । तां तां सिद्धिं भुक्तिमुक्तिलक्षणाम् ॥

नन्वेते पूजाजपादिकर्मणैव तां तां सिद्धिमुपाश्रिता इति कथंकारमुक्तकर्माद्यनपेक्षिण इत्याह

ननु पूजाजपध्यान-
शंकरासेवनादिभिः ॥ २५९॥
ते मन्त्रादित्वमापन्नाः
कथं कर्मानपेक्षिणः ।

एतदेव परिहरति

मैवं तथाविधोत्तीर्ण-
शिवध्यानजपादिषु ॥२६०॥
प्रवृत्तिरेव प्रथम-
मेषां कस्माद्विविच्यताम् ।

इह तावदिदमेव चिन्त्यतां—यदेषां शुद्धात्मनां प्रथममेव तथाविधान्मायान्तश्चारिणः कर्मादेरुत्तीर्णस्तदपरामृष्टो योऽयं शिवस्तद्विषयेषु ध्यानजपादिषु कस्मात्प्रवृत्तिः किं तत्र निमित्तमित्यर्थः ॥

ननूक्तमेवात्र कर्मतत्साम्यादि निमित्तमित्याशङ्क्याह

कर्मतत्साम्यवैराग्य-
मलपाकादि दूषितम् ॥२६१॥
ईश्वरेच्छा निमित्तं चे-
च्छक्तिपातैकहेतुता ।

दूषितमिति समनन्तरमेव । ईश्वरेच्छा चेन्नि-मित्तं, तर्ह्यस्मत्पक्षमेवागतोऽसि यच्छुद्धात्मनां तत्र तत्र कर्मादिनिरपेक्षः पारमेश्वरः शक्ति-पात एवैको हेतुरिति ॥

नचैवं जपादेः कर्मता न्याय्येत्याह

जपादिका क्रियाशक्ति-
रेवेत्थं नतु कर्म तत् ॥२६२॥
कर्म तल्लोकरूढं हि
यद्भोगमवरं ददत् ।
तिरोधत्ते भोक्तृरूपं
संज्ञायां तु न नो भरः ॥२६३

इत्थं शक्तिपातैकहेतुकत्वे जपादिलक्षणा क्रिया पारमेश्वरी स्वरूपविकासिका क्रियाश-क्तिरेव, नतु तत्कर्म । तद्धि कर्म लोके रूढं, यद-वरं परिमितं भोगं ददद्भोक्तुः पूर्णं रूपं तिरो-

धत्ते तथातथासंकोचनादावृणुयादित्यर्थः । अथ जपाद्यपि लोके कर्मतया प्रसिद्धमित्युच्यते, तत्को नाम नाग्नि विवादं विद्वान्विदध्यादित्याह संज्ञायां तु न नो भर इति ॥ २६३ ॥

ननु यद्येते मायया कर्मणा वाप्यनाक्रान्तास्तदेषां पूर्णत्वात् तस्यां तस्यां सिद्धावभिलाष एव कथं भवेदित्याशङ्कां प्रदर्श्य प्रतिक्षिपति

तेषां भोगोत्कता कस्मा-
दिति चेदुक्तमुत्तरम् ।
चित्राकारप्रकाशोऽयं
स्वतन्त्रः परमेश्वरः ॥२६४॥
स्वातन्त्र्यात्तु तिरोभाव-
बन्धो भोगेऽस्य भोक्तृताम् ।
पुष्णन्स्वं रूपमेव स्या-
न्मलकर्मादिवर्जितम् ॥२६५॥

दत्तमिति प्राक्स्वमतप्रदर्शनोपक्रमे । तदेव संक्षेपेण व्यनक्ति चित्रेत्यादिना। अयं तावदेक एव चिद्रूपः परमेश्वरः स्वस्वातन्त्र्याच्चित्रेण तत्तत्प्रमातृप्रमेयाद्यात्मकेनानेकेनाकारेण प्रकाशत

इति स्थितम् । तत्तस्मादेकत्वेऽप्यानैक्यावभासनाद्धेतोरस्य स्वस्वातन्त्र्यमाहात्म्यात्तिरोभावः स्वरूपगोपना तदात्मा बन्धो भोगे भोक्तृतां पुष्णन्संकोचाभासनपुरःसरं जात्यायुर्भोगप्रदत्वेन विकल्पितात्मभिः स्वयंकल्पितैः कर्मभिरात्मानं बध्नन्, पुनरपि उद्वेष्टनक्रमेणागन्तुकमलकर्मादिरूपतातिरस्कारेण स्वं परिशुद्धं रूपमेव स्यात् पूर्णदृक्क्रियात्मा स्वतन्त्रः परमेश्वर एवावशिष्येतेत्यर्थः । यदुक्तं प्राक्

'देवः स्वतन्त्रश्चिद्रूपः प्रकाशात्मा स्वभावतः ।
रूपप्रच्छादनक्रीडायोगादणुरनेककः ॥
स स्वयंकल्पिताकारविकल्पात्मककर्मभिः ।
बध्नात्यात्मानमेवेह स्वातन्त्र्यादिति वर्णितम् ॥
स्वातन्त्र्यमहिमैवायं देवस्य यदसौ पुनः ।
स्वं रूपं परिशुद्धं सत्स्पृशत्यप्यणुतामयः॥'(१३।१०९)

इति ॥२६५॥

ननु

'शक्तयोऽस्य जगत्कृत्स्नं.....।'

इत्याद्युक्त्या पारमेश्वरशक्तिस्फारसारमेव सर्वमिदं विश्वं, तद्भूतभाववल्लौकिकं शुभाशुभं कर्मापि तथेति कथं जपादिका क्रियैव तच्छ-

क्तिरित्युक्तं नतु कर्मापि,—इत्याशङ्कां गर्भीकृत्य, शक्तिरूपत्वाविशेषेऽप्येषां विशेषोऽस्तीति संवादपुरःसरं विभजति

उक्तं सेयं क्रियाशक्तिः
शिवस्य पशुवर्तिनी ।
बन्धयित्रीति तत्कर्म
कथ्यते रूपलोपकृत् ॥२६६॥
ज्ञाता सा च क्रियाशक्तिः
सद्यःसिद्ध्युपपादिका ।

सेयं पारमेश्वरी क्रियाशक्तिरिदमहं करोमि इत्यादिभेदावग्रहशालिनि पशौ वर्तमाना हानादानादिक्षोभमयत्वात् बन्धमेवाधत्त इति तत् स्वरूपलोपकारित्वात् सुखदुःखादिप्रदं कर्म उच्यते, येनोक्तं

'कर्म तल्लोकरूढं हि यद्भोगमवरं ददत् ।
तिरोधत्ते भोक्तृरूपं.....॥'

इति । सैव पुनः 'संविदेवेदं सर्वम्' इति शिवशक्त्यात्मकं स्वं मार्गमधितिष्ठन्ती ज्ञाता सद्य एव तां तां सिद्धिमुपपादयेत् येनोक्तं जपा-

दिका क्रिया पारमेश्वरी शक्तिर्नतु कर्मेति । तदुक्तं श्रीस्पन्दे

'सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी ।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका ॥'(४।१८)

इति ॥

ननु का नामात्र सिद्धिर्विवक्षितेत्याशङ्क्याह

अविच्छिन्नस्वात्मसंवि-
त्प्रथा सिद्धिरिहोच्यते॥२६७॥
सा भोगमोक्षस्वातन्त्र्य-
महालक्ष्मीरिहाक्षया ।

सा चेह सत्यपि देहे भवेदित्युक्तमक्षया भोगमोक्षमहालक्ष्मीरिति ॥

ननु विष्ण्वादिप्रसादोपनतापि सा सा सिद्धिर्भवन्ती लोके दृश्यत एव, तच्छिवशक्तिपातादेवैवं भवेदिति कस्मादुक्तमित्याशङ्क्याह

विष्ण्वादिरूपता देवे
या काचित्सा निजात्मना२६८
भेदयोगवशान्माया-
पदमध्यव्यवस्थिता ।

तेन तद्रूपतायोगा-
च्छक्तिपातः स्थितोऽपि सन् २६९
तावन्तं भोगमाधत्ते
पर्यन्ते शिवतां नतु ।

इह या नाम काचन परमेश्वरे विष्ण्वादि-रूपता, सा स्वयमुल्लसिताद्भेदयोगवशान्माया-पदमध्यमध्यास्त इति विष्ण्वादिरूपतामवल-म्ब्य स्थितोऽपि सन् शक्तिपातस्तावन्तं तदधि-कारोचितमेव भोगमादध्यात्, नतु अन्ते शिवता-मपि, येनास्य पारमेश्वराच्छक्तिपातादवरत्वम् ॥

ननु मायाध्वमध्यवर्तिनो विष्णुविरिञ्चादेः कथङ्कारमवरे भोगादिमयेऽप्यनुग्रहे सामर्थ्य-मित्याशङ्क्यं दृष्टान्तप्रदर्शनेन शिथिलयति

यथा स्वातन्त्र्यतो राजा-
प्यनुगृह्णाति कंचन ॥२७०॥
ईशशक्तिसमावेशा-
त्तथा विष्ण्वादयोऽप्यलम् ।

इह यथा

'अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेच्छभ्रं वा स्वर्गमेव वा ॥'

इत्यादिदृशा ईश्वरप्रेरणया मायान्तश्चार्यपि राजादिः स्वेच्छया कंचन स्वसंविभागेनानुगृह्णाति, तथा विष्ण्वाद्योऽपि भोगाधानेन कंचनानुग्रहीतुमलं समर्था इत्यर्थः ॥

ततश्च किमित्याशङ्क्याह

मायागर्भाधिकारीय-
शक्तिपातवशात्ततः ॥२७१॥
कोऽपि प्रधानपुरुष-
विवेकी प्रकृतेर्गतः ।
उत्कृष्टात्तत एवाशु
कोऽपि बुद्ध्वा विवेकिताम्२७२
क्षणात्पुंसः कलायाश्च
पुंमायान्तरवेदकः ।

ततस्तेषामेवंसामर्थ्यादेव मायागर्भाधिवासमधिकृत्य, प्रवृत्तात्तदीयान्मन्दाच्छक्तिपातात्कोऽपि कापिलादिः प्रकृतिपुरुषयोर्विवेकं जानानः प्रकृतेर्गतः प्राकृताद्बन्धान्मुक्तः कोऽपिच तत एव मायागर्भाधिकारीयात् तीव्राच्छक्तिपातादाशु पुंसः कलायाश्च विवेकं ज्ञात्वा, क्षणादेव पुंमायान्तरवेदको मायातः समुत्तीर्ण इत्यर्थः॥

नन्वेवमप्यस्य कोऽर्थ इत्याशङ्क्याह

कलाश्रयस्याप्यत्यन्तं
कर्मणो विनिवर्तनात् ॥२७३॥
ज्ञानाकलः प्राक्तनस्तु
कर्मी तस्याश्रयस्थितेः ।

तदुक्तं प्राक्

'तदा मायापुंविवेकः सर्वकर्मक्षयाद्भवेत् ।
विज्ञानाकलता मायाधस्तान्नो यात्यतः पुमान् ॥' (९।१८५)

इति । नन्वेवं प्रकृतिपुरुषविवेकिनोऽपि किमत्यन्तं कर्म निवर्तते नवेत्याशङ्क्याह प्राक्तनस्त्वित्यादि । आश्रयः कलादिः ॥

नन्वेवं तर्हि अस्मद्बद्ध एवासाविति किं प्रकृतिपुरुषज्ञानेनेत्याशङ्क्याह

स परं प्रकृतेर्बुध्ने
सृष्टिं नायाति जातुचित् २७४
मायाधरे तु सृज्येता-
नन्तेशेन प्रचोदनात् ।

सृज्येतेति त्रिमलबद्धत्वात् । तदुक्तं प्राक्

'धीपुंविवेके विज्ञाते प्रधानपुरुषान्तरे ।
अपि न क्षीणकर्मा स्यात्कलायां तद्धि संभवेत् ॥
अतः सांख्यदृशा सिद्धः प्रधानाधो न संसरेत् । (९।१८७)

इति ॥

ननु भवतु नामैतत्, मायापुंविवेकज्ञस्य तु ज्ञानाकलतैव किं भवेदुत ततोऽपि विशेष इत्याशङ्क्याह

विज्ञानाकलतां प्राप्तः
केवलादधिकारतः ॥२७५॥
मलान्मन्त्रव्रतदीशादि-
भावमेति सदा शिवात् ।

अधिकारत इति अधिकारमात्रावशेषादित्यर्थः । सदेति कदाचिदपि अन्यथा न भवेदिति भावः । शिवादिति नत्वनन्तेशचोदनया । यदुक्तं प्राक्

'स पुनः शांभवेच्छातः शिवाभेदं परामृशन् ।
क्रमान्मन्त्रेशतन्नेतृरूपो याति शिवात्मताम् ॥' (९।९३)

इति ॥

ननु भवत्वेवं, पारमेश्वराच्छक्तिपातात्पुनः किं स्यादित्याशङ्क्याह

पत्युः परस्माद्यस्त्वेष
शक्तिपातः स वै मलात् २७६

अज्ञानाख्याद्वियोक्तेति
शिवभावप्रकाशकः ।

यः पुनरयं परस्मात् नत्वपरस्माद्विष्णवादेः पत्युः सकाशाच्छक्तेः पातः, स एव शिवभावावभासनेन मोक्षप्रदो यस्मादज्ञानाख्यात् न तु द्रव्यरूपान्मलाद्वियोक्ता वियोजक इत्यर्थः । यदुक्तं प्राक्

'मलाद्विविक्तमात्मानं पश्यंस्तु शिवतां व्रजेत् ।' (९।१८८)

इति ॥

ननु स एवैवं कस्मादित्याशङ्क्याह

नान्येन शिवभावो हि
केनचित्संप्रकाशते ॥२७७॥

अन्येनेति विष्णवादिसंबन्धिना, ते ह्यत्र भ्रान्ता एवेत्यभिप्रायः ॥ २७७ ॥

अत एवाह

स्वच्छन्दशास्त्रे तेनोक्तं
वादिनां तु शतत्रयम् ।
त्रिषष्ट्यभ्यधिकं भ्रान्तं
वैष्णवाद्यं निशान्तरे ॥२७८॥

शिवज्ञानं केवलं च
शिवतापत्तिदायकम् ।

चोऽवधारणे, तेन केवलं शिवज्ञानमेव शिवतापत्तिदायकमित्यर्थः। एतच्च संवादितं प्राग्बहुशः॥

एवं च यदेव पारमेश्वर्याः शक्तेरधिष्ठानं शिवतापत्तिं दद्यात्, तदेव शक्तिपातशब्दव्यपदेश्यं न त्वेवमेव, न ह्येवंविधं किंचिज्जगत्यस्मिन्समस्ति यत्पारमेश्वर्या शक्त्या नाधिष्ठितम् । तदाह

शिवतापत्तिपर्यन्तः
शक्तिपातश्च चर्च्यते ॥ २७९ ॥
अन्यथा किं हि तत्स्याद्य-
च्छैव्या शक्त्यानधिष्ठितम् ।

अत एवोक्तयुक्त्या तांस्तानप्यधितिष्ठन्ती विष्णवादिशक्तिर्न मोक्षप्रदेति नेहास्याः शक्तिपाततया परिगणनम् । तदुक्तमनेनैवान्यत्र

'वैष्णवादीनां तु राजानुग्रहवन्न मोक्षान्ततेति नेह तद्विवेचनं, शिवशक्त्यधिष्ठानं तु सर्वत्रेत्युक्तम् । सा परं ज्येष्ठा न भवति अपि तु घोरा घोरतरा वा ॥' (तं०सा० ११ आ०)

इति ॥

अतश्च

' विषयेष्वेव संलीनानधोऽधः पातयन्त्यणून् ।
रुद्राणून्याः समालिङ्ग्य घोरतर्योऽपराः स्मृताः ॥'

इत्याद्युक्तशक्त्यधिष्ठितानां भेदावष्टम्भभाजां वैष्णवादीनामस्मिन्संविदद्वैतात्मनि शिवज्ञानेऽधिकारो नास्तीत्याह

तेनेह वैष्णवादीनां
नाधिकारः कथंचन ॥२८०॥
ते हि भेदैकवृत्तित्वा-
दभेदे दूरवर्जिताः ।

' नन्वेषामपि कदाचिदनुग्राहिका शैवी शक्तिश्चेत्संबध्यते, तदा किं कर्तव्यमित्याशङ्क्याह

स्वातन्त्र्यात्तु महेशस्य
तेऽपि चेच्छिवतोन्मुखाः २८१
द्विगुणा संस्क्रियास्त्येषां
लिङ्गोद्धृत्याथ दीक्षया ।

लिङ्गोद्धृत्येत्युपवासादिक्रमेण वक्ष्यमाणरूपया ॥ २८१ ॥

ननु पारमेश्वर्या शक्त्या चेदयमधिष्ठितस्तदन्यवदेक एवास्य दीक्षादिः संस्कारोऽस्तु, द्विगु-

णेनानेन कोऽर्थ इत्याशङ्कां दृष्टान्तप्रदर्शनेन प्रशमयति

दुष्टाधिवासविगमे
पुष्पैः कुम्भोऽधिवास्यते २८२
द्विगुणोऽस्य स संस्कारो
नेत्थं शुद्धे घटे विधिः ।

एतदेवोपसंहरति

इत्थं श्रीशक्तिपातोऽयं
निरपेक्ष इहोदितः ॥२८३॥

नन्वेवमागमान्तरविरोधो भवेद्यत्र तु कर्म-साम्यादिसापेक्षत्वमस्योक्तं यन्मतङ्गे

'समत्वधर्मव्यापारः कष्टोऽयं स्यात्सुदुष्करः ।'

इति, किरणेऽपि

'समे कर्मणि संजाते तत्कालं योग्यतावशात् ।
तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यदा ॥
सर्वज्ञः स शिवो यद्वत्किंचिज्ज्ञत्वविवर्जितः ।'

इति, तत्किमेतदुक्तमित्याशङ्क्याह

अनयैव दिशा नेयं
मतङ्गकिरणादिकम्
ग्रन्थगौरवभीत्या तु
तल्लिखित्वा न योजितम् २८४

नेयमिति पूर्वपक्षयोजनादिक्रमेण व्याख्येयमित्यर्थः ॥

न केवलमेतदस्मदागम एवोक्तं, यावच्छुत्यर्थोपजीविनि पुराणादावपीत्याह

पुराणेऽपि च तस्यैव
प्रसादाद्भक्तिरिष्यते ।
यया यान्ति परां सिद्धिं
तद्भावगतमानसाः ॥२८५॥

'तस्यैव तु प्रसादेन भक्तिरुत्पद्यते नृणाम् ।'
इत्यस्य प्रथममर्धम् ॥ २८५ ॥

एतदेव व्याचष्टे

एवकारेण कर्मादि-
सापेक्षत्वं निषिध्यते ।
प्रसादो निर्मलीभाव-
स्तेन संपूर्णरूपता ॥ २८६ ॥
आत्मना तेन हि शिवः
स्वयं पूर्णः प्रकाशते ।

इह तावदीश्वरः स्वस्वातन्त्र्यात् संकोचावभासनेनाणुतां परिग्रहन् प्रत्यावृत्य निर्मलं पूर्ण-

मपि रूपमादर्शयति, इत्युक्तम्, तत्तस्य प्रसादः प्रसन्नत्वं मलापगमः, तेन च निर्मलीभावेन संपूर्णरूपता यतः स्वयमेव शिवः परमेश्वरः तेनात्मना तत्तत्संकुचितात्मावच्छेदं परिगृह्यापि पूर्णः प्रकाशते प्रत्यावृत्तपूर्णट्टक्रियास्वभावो भवेत्। यदुक्तं 'परां सिद्धिं यान्ति'इति॥२८६॥

एतदेव व्यतिरेकद्वारेण निदर्शयति

शिवीभावमहासिद्धि-
स्पर्शवन्ध्ये तु कुत्रचित् २८७
वैष्णवादौ हि या भक्ति-
र्नासौ केवलतः शिवात्।

या पुनः कस्मिंश्चिदेवमुक्तयुक्त्या शिवीभावापत्तिविरहिणि वैष्णवादौ भक्तिः, नासौ केवलतः शिवात् कर्माद्यनपेक्षिणः परमेश्वरान्न भवेदित्यर्थः ॥२८७॥

ननु समनन्तरमेवेदमुक्तं यच्छैव्या शक्त्यानाधिष्ठितं न किंचिदपि स्यादिति, तदिदानीं वैष्णवादौ भक्तिः शिवान्नेति कथमिवाभिधीयते इत्याशङ्क्याह

शिवो भवति तत्रैष
कारणं न तु केवलः ॥२८८॥
निर्मलश्चापि तु प्राप्ता-
वच्छित्कर्माद्यपेक्षकः ।

तत्रेति विष्ण्वादिविषयायां भक्तौ केवलत्वं निर्मलत्वं च व्यतिरेचयितुमपित्वित्याद्युक्तम् । प्राप्तावच्छिदिति विष्ण्वादिरूपोपग्रहावच्छिन्नतया परिगृहीतसंकोचकलङ्क इत्यर्थः ॥२८८॥

ननु कस्यायमर्थ इत्याशङ्क्याह

यया यान्ति परां सिद्धि-
मित्यस्येदं तु जीवितम् ॥२८९॥

नहि तदेकरूपत्वाभावे भक्तेरुक्तरूपा परा सिद्धिर्भवेदिति भावः ॥ २८९ ॥

एतच्च न्यायागमकोविदैर्गुरुभिरप्यनुमतमित्याह

श्रीमानुत्पलदेवश्चा-
प्यस्माकं परमो गुरुः ।
शक्तिपातसमये विचारणं
प्राप्तमीश न करोषि कर्हिचित् २९०

अद्य मां प्रति किमागतं यतः
स्वप्रकाशनविधौ विलम्बसे ।
कर्हिचित्प्राप्तशब्दाभ्या-
मनपेक्षित्वमूचिवान् ॥२९१॥
दुर्लभत्वमरागित्वं
शक्तिपातविधौ विभोः ।

श्रीमानुत्पलदेवश्चापि विभोः शक्तिपातविधावनपेक्षित्वाद्यूचिवानिति संबन्धः। यत्तत्र योग्यायोग्यत्वलक्षणं विचारणं प्राप्तं न्यायोपनतमपि कर्हिचित्कदाचिदपि विस्मृत्यापि न करोषि यतः कर्मादिनिरपेक्षतया स्वेच्छामात्रमेवात्र भवतो निबन्धनम्। अत एवात्र दुर्लभत्वमपि। तद्धि लोके सुलभमुच्यते, यत्कंचिदुपायमपेक्ष्य भवति येन तत्संभरणेन नूनं तल्लाभो भवेत्। अत एवात्रारागित्वमपि। विष्ण्वादयो हि कृतमेव जनमनुगृह्णन्ति नाकृतमिति रागद्वेषविवशा इव लक्ष्यन्ते, भवान् पुनः सर्वनिरपेक्षमेवैतत्करुत इति। अत एव निरपेक्षस्वतन्त्रशक्तिपातक्रमानुरूपमीशेत्यामन्त्रणम् ॥

न केवलं कर्हिचित्प्रातशब्दाभ्यामेवैतदूचिवान्, यावदपरार्धेनापीत्याह

अपरार्धेन तस्यैव
शक्तिपातस्य चित्रताम् २९२
व्यवधानचिरक्षिप्र-
भेदाद्यैरुपवर्णितैः ।

उपवर्णितैरिति समनन्तरमेव, यतोऽत्र मां प्रति कस्माद्विलम्बसे व्यवधानादिना कालं क्षिपसि क्षिप्रमेव स्वप्रकाशं कुर्विति तात्पर्यम् ॥

न केवलमेतत्संविदद्वैतनिष्ठैरेव गुरुभिरुक्तं, यावच्छैवशास्त्रव्याख्यातृभिरपीत्याह

श्रीमताप्यनिरुद्धेन
शक्तिमुन्मीलिनीं विभोः २९३
व्याचक्षाणेन मातङ्गे
वर्णिता निरपेक्षता ।
स्थावरान्तेऽपि देवस्य
स्वरूपोन्मीलनात्मिका ॥ २९४

शक्तिः पतन्ती सापेक्षा
न क्वापीति सुविस्तरात् ।

श्रीमतानिरुद्धेनापि सुविस्तरान्निरपेक्षता वर्णितेति संबन्धः।शक्तिमुन्मीलिनीमिति। यदुक्तं तत्र

'यदास्योन्मीलिनी शक्तिः शिवरागेण रञ्जिता ।
निपतत्यतितेजस्का नित्यानुग्रहशालिनी ॥'(१।४।४२)

इति । स्थावरान्ते इत्यनेनात्यन्तमयोग्यानामपि स्वरूपमुन्मीलयतीति सूचितम् ॥

इहेदानीं शक्तिपातवैचित्र्यमूलमधिकारवैचित्र्यमप्यभिधातुमुपक्रमते

एवं विचित्रेऽप्येतस्मि-
ञ्छक्तिपाते स्थिते सति २९५
तारतम्यादिभिर्भेदैः
समय्यादिविचित्रता ।

तदेवाह

कश्चिद्रुद्राशतामात्रा-
पादनात्तत्प्रसादतः ॥२९६॥
शिवत्वं क्रमशो गच्छेत्
समयी यो निरूप्यते ।

कश्चिच्छुद्धाध्वबन्धः सन्
पुत्रकः शीघ्रमक्रमात् ॥२९७॥
भोगव्यवधिना कोऽपि
साधकश्चिरशीघ्रतः ।
कश्चित्संपूर्णकर्तव्यः
कृत्यपञ्चकभागिनि ॥२९८॥
रूपे स्थितो गुरुः सोऽपि
भोगमोक्षादिभेदभाक् ।
समय्यादिचतुष्कस्य
समासव्यासयोगतः ॥२९९॥
क्रमाक्रमादिभिर्भेदैः
शक्तिपातस्य चित्रता ।

क्रमश इति पुत्रकदीक्षानन्तरमत एवात्र मन्दः शक्तिपातः। शीघ्रमिति देहपातसामनन्तर्येण। अक्रमादिति सत्यपि देह इत्यर्थः। भोगव्यवधिश्च चिरं शीघ्रं वा भवेदित्युक्तं चिरशीघ्रत इति । भोगमोक्षादिभेदभागित्यर्थाच्छिष्यं प्रति, स्वयं हि तस्य संपूर्णकर्तव्यत्वमु-

क्तम्। तारतम्यादेव च तयोरपि तारतम्यमिति भेदशब्देनोक्तम् । समासव्यासयोगत इति क्रमाक्रमादिभिरिति च, तत्र क्रमादादौ समयी, ततः पुत्रकः, तत आचार्य इति सामस्त्यम्, अक्रमात्कश्चित्पुत्रक एव, नत्वादौ समय्यपि, कश्चिदाचार्य एव, नत्वादौ समयी पुत्रको वेति व्यस्तत्वम् ॥

न केवलमेवमेव शक्तिपातस्य क्रमाक्रमाभ्यां वैचित्र्यं, यावत्प्रकारान्तरेणापीत्याह

क्रमिकः शक्तिपातश्च
सिद्धान्ते वामके ततः॥३००॥
दक्षे मते कुले कौले
षडर्धे हृदये ततः ।
उल्लङ्घनवशाद्वापि
झटित्यक्रममेव वा ॥३०१॥

त्रिकार्थस्यैव परमुत्कृष्टत्वात् । षडर्धे हृदये इति सामानाधिकरण्येन योज्यम् । तदुक्तं

'वेदाच्छैवं ततो वामं ततो दक्षं ततो मतम् ।
ततः कुलं ततः कौलं त्रिकं सर्वोत्तमं परम् ॥'

इति । अतश्च सिद्धान्तात्प्रभृति षडर्धपर्यन्तं यथायथं तारतम्याच्छक्तिपातस्यापि तथाभावो भवेदिति भावः । उल्लङ्घनवशादिति सिद्धान्तानन्तरं दक्षे, ततः कुले, ततः षडर्धे चेति । झटित्यक्रममेवेति त्रिकार्थ एवेति ॥ ३०१ ॥

नचैतन्निर्मूलमेवोक्तमित्याह

उक्तं श्रीभैरवकुले
पञ्चदीक्षासुसंस्कृतः ।
गुरुरुल्लङ्घिताधःस्थ-
स्रोता वै त्रिकशास्त्रगः॥३०२॥

इह

'होत्री दीक्षा तु सिद्धान्ते तन्त्रे योजनिका स्मृता ।
त्रिके समावेशवती कुले स्तोभात्मिका मता ॥
सामरस्यमयी कौले दीक्षा पञ्चविधोदिता ।'

इत्याद्युक्तया पञ्चविधया दीक्षया सुष्ठु संस्कृतोऽपि त्रिकशास्त्रग एव गुरुरुल्लङ्घिताधरदशाधिशायिशैवादिशास्त्रप्रवाहः सर्वमूर्धाभिषिक्त इत्यर्थः । यदुक्तं

'वाममार्गाभिषिक्तोऽपि दैशिकः परतत्त्ववित् ।
संस्कार्यो भैरवे सोऽपि कुले कौले त्रिकेऽपि सः ॥'

इति ॥३०२॥

ननु इह सर्वशास्त्राणां

'यतः शिवोद्भवाः सर्वे शिवधामफलप्रदाः ।'

इत्याद्युक्त्या हेतुतः फलतो वा न कश्चिद्विशेषः, तत्कथमिदमुत्तरमिदं चाधरशास्त्रमित्युक्तमित्याशङ्क्याह

ज्ञानाचारादिभेदेन
ह्युत्तराधरतां विभुः ।
शास्त्रेष्वदीदृशच्छ्रीमत्-
सर्वाचारहृदादिषु ॥३०३॥

ज्ञानं द्वयाद्वयरूपं, क्रिया बाह्या आन्तरी वा । तन्निमित्तमेव चात्राधरोत्तर्यमित्युपपादितं बहुशः ॥ ३०३ ॥

तदेव पठति

वाममार्गाभिषिक्तस्तु
दैशिकः परतत्त्ववित् ।
तथापि भैरवे तन्त्रे
पुनः संस्कारमर्हति ॥३०४॥

ननु यदि नाम शैवादावयमभिषिक्तस्तावतैव च परं तत्त्वं वेत्ति, तदस्य भैरवतन्त्रादौ पुनः संस्कारेण कोऽर्थ इत्याशङ्क्याह

शैववैमलसिद्धान्ता
आर्हताः कारुकाश्च ये ।
सर्वे ते पशवो ज्ञेया
भैरवे मातृमण्डले ॥३०५॥

मातृमण्डलकुलकौलादौ च भैरवतन्त्रादि-संस्कृता अपि पशव एवेत्यर्थसिद्धम् ॥ ३०५ ॥

आदिशब्दाक्षिप्ते कुलकौलादावप्येतदुक्त-मित्याह

कुलकालीविधौ चोक्तं
वैष्णवानां विशेषतः ।
भस्मनिष्ठाप्रपन्नाना-
मित्यादौ नैव योग्यता॥ ३०६॥

भस्मनिष्ठाप्रपन्नानामिति शैवादीनाम् ॥३०६॥

न केवलमेतदत्रैवोक्तं, यावदन्यत्रापीत्याह

स्वच्छन्दशास्त्रे संक्षेपा-
दुक्तं च श्रीमहेशिना ।

तदेव पठति

अन्यशास्त्ररतो यस्तु
नासौ सिद्धिफलप्रदः॥ ३०७॥

एतदेवोपपादयति

समय्यादिक्रमाल्लब्धा-
भिषेको हि गुरुर्मतः ।
स च शक्तिवशादित्थं
वैष्णवादिषु कोऽन्वयः ॥३०८॥

इत्थमिति काकाक्षिवत्, तेन पारमेश्वराच्छक्तिपातादित्थं समय्यादिक्रमेण लब्धाभिषेक इत्यर्थः । इत्थमुक्तेन प्रकारेणान्यशास्त्ररतेषु वैष्णवादिषु इह गुरुत्वे को नामान्वयो न कश्चिदभिसंबन्धः, नहि तेषामुक्तयुक्त्या पारमेश्वरशक्तिपात एवास्ति,—इति का कथा समय्यादिक्रमेण शास्त्रश्रवणाभिषेकादावित्याशयः ॥

ननु किं नामायमत्र दाम्भिकतया कृत्रिमभक्त्यादिप्रदर्शनादासादितैवंरूपो गुरुः स्यादित्याशङ्क्याह

छद्मापश्रवणाद्यैस्तु
तज्ज्ञानं गृह्णतो भवेत् ।
प्रायश्चित्तमतस्तादृग-
धिकार्यत्र किं भवेत् ॥३०९॥

नन्वयमन्यशास्त्ररतो गुरुश्छद्मादिना वा शैवं शास्त्रं गृह्णातु, प्रायश्चित्ती वा भवतु, किमनया नश्चिन्तया, शिष्यं तावदनुगृह्णात्येवेत्याशङ्क्याह

फलाकाङ्क्षायुतः शिष्य-
स्तदेकायत्तसिद्धिकः ।
ध्रुवं पच्येत नरके
प्रायश्चित्त्युपसेवनात् ॥ ३१० ॥

शिष्यस्तावत्फलं किंचिदाकाङ्क्षते, तच्च गुर्वायत्तमित्यसद्गुरुप्राप्त्यास्य तत्सिद्धिर्मा भूत्प्रत्युत

‘ .....तत्संपर्की तु पञ्चमः । ’

इत्युक्त्या प्रायश्चित्तिगुरूपसेवनाद्ध्रुवमसौ नरके पच्यते महानस्यानर्थः स्यादित्यर्थः । तदुक्तं

‘ यदा जानन्ति नो तत्त्वं छद्माद्गृह्णन्ति कौलिकम् ।
महापातकिनो येन नरक गन्तुकामिनः ॥ ’

इत्युपक्रम्य

‘ महार्थं भैरवोक्तं वै ज्ञानविज्ञानभाण्डकम् ।
स्वयं गृहीत्वा त्वाचारं दीक्षानुग्रहकारिणः ॥
विक्रीणन्त्यात्मभोगार्थं पशूनामीदृशात्मनाम् ।
ते पतन्ति महाघोरे नरके तैः समं ततः ॥

सपुत्रमित्रभृत्याश्च यावत्सप्तकुलैः सह ।
न शक्नुवन्ति वै तेषां प्रायश्चित्तानि शुद्धये ॥'

इति ॥३१०॥

नन्वस्य गुरौ देवे च शक्तिपातलिङ्गं भक्तिर्दृश्यते इति शिवेनैवासौ तथा नियुक्तः, तदस्य को दोषो येनैवं स्यादित्याशङ्क्याह

तिरोभावप्रकारोऽयं
यत्तादृशि नियोजितः ।
गुरौ शिवेन तद्भक्तिः
शक्तिपातोऽस्य नोच्यते ३११

अनेन चानपेक्षत्वसिद्ध्यनन्तरमनुजोद्देशोद्दिष्टं तिरोभावविचित्रत्वमप्युपक्रान्तम् ॥ ३११ ॥

ननु भवत्वेवं, यस्मात्पुनरनेन च्छद्मापश्रवणादिना ज्ञानमाहृतं, तेन गुरुणा किं कार्यमित्याशङ्क्याह

यदातु वैचित्र्यवशा-
ज्ज्ञानीयात्तस्य तादृशम् ।
विपरीतप्रवृत्तत्वं
ज्ञानं तस्मादुपाहरेत् ॥३१२॥

तं च त्यजेत्पापवृत्तिं
भवेत्तु ज्ञानतत्परः ।

यदेति कालान्तरे, प्रथममेव हि तथात्वे ज्ञानदानमेव न भवेदिति भावः । वैचित्र्यं नानाप्रकारं व्यापारव्याहारादि । उपाहरेदिति ज्ञानाहृतिलक्षणया वक्ष्यमाणया युक्त्या। त्यजेदिति तत्सहवासादि न कुर्यादित्यर्थः, अत्र हेतुः पापवृत्तिमिति । एवमपि कृत्वा प्रायश्चित्तं विदध्यादित्युक्तं भवेत्तु ज्ञानतत्पर इति ॥

तदेव दृष्टान्तोपदर्शनेन हृदयङ्गमयति

यथा चौराद्गृहीत्वार्थं
तं निगृह्णाति भूपतिः ॥३१३॥
वैष्णवादेस्तथा शैवं
ज्ञानमाहृत्य सन्मतिः ।

निग्रहं कुर्यादिति शेषः। सचात्र त्यागाद्यात्मा इत्युक्तप्रायम् ॥

नन्वस्य प्रथमं निर्विकारमेव प्रसन्नचेतसा गुरुणा ज्ञानमुपदिष्टं, तावतैव चास्य

'यस्मिन्काले तु गुरुणा निर्विकल्पं प्रकाशितम् ।
तदैव किल मुक्तोऽसौ..... ॥'

इत्याद्युक्तया कृतकृत्यत्वमिति किमेवं पुनरायातमित्याशङ्क्याह

स हि भेदैकवृत्तित्वं
शिवज्ञाने श्रुतेऽप्यलम् ३१४
नोज्झतीति दृढं वामा-
धिष्ठितस्तत्पशूत्तमः ।
शिवेनैव तिरोभाव्य
स्थापितो नियतेर्बलात् ३१५
कथङ्कारं पतिपदं
प्रयातु परतन्त्रितः ।

नोज्झतीति तत्रानाश्वस्तत्वात् तदिदं दृढं वामाधिष्ठितत्वात् । परतन्त्रित इति नियतेर्बलात् । तदुक्तं

'वैष्णवा सौगताः श्रौतास्तथा श्रुत्यन्तवादिनः ।
इत्यादयो नाधिकृता जातुचित्पतिशासने ॥'

इति ॥

अत एवागमोऽप्येवमित्याह

स्वच्छन्दशास्त्रे प्रोक्तं च
वैष्णवादिषु ये रताः॥३१६॥

भ्रमयत्येव तान्माया
ह्यमोक्षे मोक्षलिप्सया ।

ननु भ्रमयतु नाम माया वैष्णवादीन्, यस्तु वैष्णवादिः सन्नपि शैवस्तस्य किमायातमित्याशङ्क्याह

वैष्णवादिः शैवशास्त्रं
मेलयन्निजशासने ॥३१७॥
ध्रुवं संशयमापन्न
उभयभ्रष्टतां व्रजेत् ।

मेलयन्निति उभयत्रापि अनाश्वासात् ॥

ननु एवमपि उभयभ्रष्टतायां को हेतुरित्याशङ्क्याह

स्वदृष्टौ परदृष्टौ च
समयोल्लङ्घनादसौ ॥३१८॥
प्रत्यवायं यतोऽभ्येति
चरेत्तन्नेदृशं क्रमम् ।

तदुक्तम्

'अथ वेदाश्रितः शैवं पुनरेव समीहते ।
वेदनष्टः शैवनष्टः पुनरेव भविष्यति ॥

सन्ध्यादिवन्दनं कार्यं यदि वैदिकदर्शने ।
लोपश्च शिवमन्त्राणां प्रायश्चित्तं विधीयते ॥
शिवधर्मो ह्यथादौ चेद्वेदधर्मो विलुप्यते ।
समेत्य वाप्यनुष्ठाने आदिमध्यान्तदूषणम् ॥
प्रतिपत्तिविरोधश्च विचित्तत्वं प्रपद्यते ।
कस्यारम्भः किमग्रेऽन्ते किं कृत्यं विचिकित्सया ॥
आदौ किंच करिष्यामि द्वाभ्यामादरशासनात् ।
श्रद्धानाशे भक्तिनाशः किं कथं च भविष्यति ।
क्रियाक्रमविरोधेऽपि प्रायश्चित्तं परस्परम् ॥'

इति ॥

न केवलमेतत्स्वच्छन्दशास्त्रे एवोक्तं, यावदन्यत्रापीत्याह

उक्तं श्रीमद्धरे च
परमेशेन तादृशम् ॥३१९॥

तदेव पठति

नान्यशास्त्राभियुक्तेषु
शिवज्ञानं प्रकाशते ।

न प्रकाशते इति तत्राधिकारिणस्ते न भवन्तीत्यर्थः ॥

तदेव विभज्य दर्शयति

तन्न सैद्धान्तिको वामे
नासौ दक्षे स नो मते ॥३२०॥
कुलकौले त्रिके नासौ
पूर्वः पूर्वः परत्र तु ।

अधिकारी न भवेदिति संबन्धः । अयं पुनरत्र विशेषो यत्पूर्वः पूर्वः परत्र सर्वत्राधिकारी भवेदित्युक्तं पूर्वः पूर्वः परत्र त्विति ॥

ननु समानेऽप्यन्यशास्त्राभियुक्तत्वे पूर्वः पूर्वः परत्र चेदधिकारी, तत्परः परः पूर्वत्र कस्मान्नेत्याशङ्क्याह

अवच्छिन्नोऽनवच्छेदं
नो वेत्त्यानन्त्यसंस्थितः॥३२१
सर्वंसहस्ततोऽधःस्थ
ऊर्ध्वस्थोऽधिकृतो गुरुः ।

इहोपाधीनां नानात्वादानन्त्यसंस्थितोऽवच्छिन्नः संकुचितः प्रमातानवच्छेदमविद्यमानावच्छेदमनवच्छिन्नं पूर्णं प्रमातारं नो वेत्ति तदात्मतया न भायात् । ततोऽनवच्छिन्नत्वात्सर्वंसह ऊर्ध्वस्थ एव गुरुरधःस्थे प्रतिनियते

वैष्णवादावधिकृतो, नत्वधःस्थ ऊर्ध्वस्थे। सहि संकुचितज्ञान इति कथं पूर्णज्ञानावगाहन-पात्रतामियात् ॥

नन्वेवमूर्ध्वस्थोऽपि पूर्णज्ञानो गुरुरधःस्थे वैष्णवादौ कथंकारमधिकारं कुर्यादित्याशङ्क्याह

स्वात्मीयाधरसंस्पर्शा-
त्प्राणयन्नधराः क्रियाः॥३२२॥
सफलीकुरुते यत्त-
दूर्ध्वस्थो गुरुरुत्तमः।

यदूर्ध्वस्थो गुरुः स्वात्मसाक्षात्कारात् संपूर्णाद्वयज्ञानपरामृतसंपातादधराः क्रियाः प्राणयंस्तदनुप्राणिताः संपादयन् परिपूर्णभुक्ति-मुक्तिप्रदतया सफलयति, तदसावुत्तमः सर्वातिशायीत्यर्थः ॥

नन्वेवंविधोऽप्यूर्ध्वस्थो गुरुरधःस्थे वैष्णवादौ किं कुर्यात्, नह्यसावेतदनुग्रहस्य पात्रमित्याशङ्क्याह

अधःस्थदृक्स्थोऽप्येतादृ-
ग्गुरुसेवी भवेत्स यः॥३२३॥

तादृक्शक्तिनिपातेच्छो
यो द्रागूर्ध्वमिमं नयेत् ।

यो ह्यधस्तनदर्शनस्थोऽपि वैष्णवादिः, स तादृशां मध्यात्तीव्रप्रायेण शक्तिपातेन इच्छः सन्नेतादृशमूर्ध्वस्थं गुरुं सेवमानो भवेत्, य इममधःस्थदृक्स्थमपि वैष्णवादिकं शीघ्रमेवोर्ध्वं नयेत् परसंविदैकात्म्येनावभासयेदित्यर्थः ॥

ननु यथा पूर्वः पूर्वः परत्र परत्राधिकारी, तथा परः परः पूर्वत्रापि कस्मान्नेत्याशङ्क्यां दृष्टान्तोपदर्शनेन प्रशमयति

तत्तद्गिरिनदीप्राया-
वच्छिन्ने क्षेत्रपीठके ॥३२४॥
उत्तरोत्तरविज्ञाने
नाधिकार्यधरोऽधरः ।

इह यथा तैस्तैर्गिरिनदीप्रायैर्निम्नोन्नतैर्भूमिभागैरवच्छेदमीयुष्यूर्ध्वोर्ध्वं कोट्टप्राये क्षेत्रसंस्थानादावधरोऽधरो निम्ननिम्नदेशस्थो नाधिकारी, तथाधोऽधःस्थितो वैष्णवादिरुत्तरोत्तरे शैवादौ विज्ञानेऽपीति वाक्यार्थः ॥

न केवलमेतत्परमेवोद्दिश्योक्तं, यावत्स्वमपीत्याह

उत्तरोत्तरमाचार्यं
विदन्नप्यधरोऽधरः ॥३२५॥
कुर्वन्नधिक्रियां शास्त्र-
लङ्घी निग्रहभाजनम् ।

शास्त्रलङ्घीति । तदुक्तं

'न कुर्यादधिकारं तु आचार्ये महति स्थिते ।
यस्तु मोहवशात्कुर्याच्छाकिन्यो वै शपन्ति तम् ॥'

नन्वेवमस्तु शैववैष्णवादीनामाधरोत्तर्यं, शैवादीनामेव पुनः समानेऽपि पारमेश्वरे शक्तिपाते परस्परस्य किंनिमित्तमित्याशङ्क्याह

शक्तिपातबलादेव
ज्ञानयोग्यविचित्रता ॥३२६॥

तद्वैचित्र्यमेव दर्शयति

श्रौतं चिन्तामयं द्यात्म
भावनामयमेव च ।
ज्ञानं तदुत्तरं ज्यायो
यतो मोक्षैककारणम्॥३२७॥

चिन्तामयं च ज्ञानं मन्दस्वभ्यस्तभेदभिन्नतया द्विरूपमित्याह द्व्यात्मेति । तदुक्तं

'ज्ञानं च त्रिविधं प्रोक्तं तत्राद्यं श्रुतमिष्यते ।
चिन्तामयमथान्यच्च भावनामयमेव च ॥
शास्त्रार्थस्य परिज्ञानं विक्षिप्तस्य श्रुतं मतम् ।
इदमत्रेदमत्रेति इदमत्रोपयुज्यते ॥
सर्वमालोच्य शास्त्रार्थमानुपूर्व्या व्यवस्थितिः ।
तच्च चिन्तामयं ज्ञानं द्विरूपमुपदिश्यते ॥
मन्दस्वभ्यस्तभेदेन तत्र स्वभ्यस्तमुत्तमम् ।
सुनिष्पन्ने ततस्तस्मिञ्जायते भावनामयम् ॥
यतो योगं समासाद्य योगी योगफलं लभेत् ।
एवं विज्ञानभेदेन ज्ञानी प्रोक्तश्चतुर्विधः ॥'

इति । तदुत्तरमिति तेषां श्रौतादीनां चतुर्णां ज्ञानानां मध्यादुत्तरं भावनामयमित्यर्थः ॥३२७॥

मोक्षैककारणत्वमेव विभज्य दर्शयति

तत्त्वेभ्य उद्धृतिं क्वापि
योजनं सकलेऽकले ।
कथं कुर्याद्विना ज्ञानं
भावनामयमुत्तमम् ॥३२८॥

तत्त्वेभ्य इत्यशुद्धेभ्यः, क्वापीति यथाभिमते,

ज्ञान्यपि हि गुरुरकृततत्तत्त्वसाक्षात्कारः कथमेवं कुर्यादित्याशयः ॥ ३२८ ॥

ननु

'द्वावेव मोक्षदौ प्रोक्तौ ज्ञानी योगी च शांकर ।'

इत्याद्युक्त्या योगिनोऽपि मोक्षकारणत्वमुक्तं, तत्कथमिह भावनामयस्यैव ज्ञानस्य तदेककारणत्वमुच्यत इत्याशङ्क्याह

योगी तु प्राप्ततत्त्व-
सिद्धिरप्युत्तमे पदे।
सदाशिवाद्ये स्वभ्यस्त-
ज्ञानित्वादेव योजकः॥३२९॥

ननु योगबलादेव योगिनस्तत्तत्त्वसिद्धिर्जायते इति तत एवासौ तेषु तेषु तत्त्वेषु शिष्यस्य योजनां विदध्यादिति किमस्यैवंविधेन ज्ञानेन प्रयोजनमित्याशङ्क्याह

अधरेषु च तत्त्वेषु
या सिद्धिर्योगजास्य सा ।
विमोचनायां नोपायः
स्थितापि धनदारवत्॥३३०॥

ननु केनैवमुक्तं यदस्योर्ध्वेषु सदाशिवादितत्त्वेषु योगजा सिद्धिर्न स्यात्, यद्वशात्सर्वमपीदं जगदुन्मोचयेदित्याशङ्क्याह

यस्तूत्पन्नसमस्ताध्व-
सिद्धिः सहि सदाशिवः ।
साक्षादेष कथं मर्त्या-
न्मोचयेद्भुरुतां व्रजन् ॥३३१॥

अयमत्र पिण्डार्थः—इह ज्ञानी तावच्चतुर्विधः। तस्य यथोत्तरं वैशिष्ट्यमित्युक्तप्रायम् । ततश्च योगिवदभ्यासरहितोऽपि ज्ञानी सर्वथा स्वभ्यस्तभावनामयविज्ञानप्रसादासादितभैरवीभावो दीक्षादिक्रमे प्रशस्यतर इत्येवमुक्तं भावनामयमेव ज्ञानं ज्याय इति । योगी चतुर्विधः संप्राप्तो घटमानः सिद्धयोगः सुसिद्धश्चेति । तत्र संप्राप्तः—प्राप्तयोगोपदेशमात्रो, घटमानश्च तदभ्यासमात्रनिष्ठ इत्येतौ स्वयमेव न तथा योगे वा ज्ञाने वा प्ररूढाविति परस्य किं कुरुतः । सिद्धयोगस्य पुनः स्वभ्यस्तज्ञानमप्यस्ति,—इति तत्प्रयोजकीकारेणैवायं मोचको, नान्यथेत्युक्तं 'योगी तु स्वभ्यस्तज्ञानित्वादेव

उत्तमे पदे योजकः' इति 'स्थितापि योगजास्य सिद्धिर्विमोचनायां नोपायः' इति च। उक्तं च

'उत्तरोत्तरवैशिष्ट्यमेतेषां समुदाहृतम्।
ज्ञानिनां योगिनां चैव सिद्धयोगविदुत्तमः॥
यतोऽस्य ज्ञानमप्यस्ति पूर्वो योगफलोज्झितः।' (मा०तं०)

इति। सुसिद्धस्तु—

'यः पुनर्यत्र तत्रैव संस्थितोऽपि यथा तथा।
भुञानस्तत्फलं तेन हीयते न कथंचन॥
सुसिद्धः स तु बोद्धव्यः सदाशिवसमः प्रिये।' (मा०तं०)

इत्याद्युक्त्या सदैवास्खलितस्वरूपः शिव एव इत्यसौ गुरुतां व्रजन् विद्येशानपास्य कथं साक्षान्मोचयेन्मर्त्यान्, पारम्पर्येण तु मोचयेदेवेति तदभिधानस्येह कोऽवसर इत्यर्थः। यदुक्तमनेनैवान्यत्र 'सुसिद्धस्तु शिव एवेति किं तत्रोच्यते' इति। ततश्चैवं ज्ञानयोगयोर्विभागं विचार्य स्वभ्यस्तज्ञानवानेव गुरुर्मोक्षप्रद इति सर्वत्रोक्तं येनास्माभिरप्येवमिहाभिहितम्॥

तदाह

तेनोक्तं मालिनीतन्त्रे
विचार्य ज्ञानयोगिते।

यतश्च मोक्षदः प्रोक्तः
स्वभ्यस्तज्ञानवान्बुधैः ॥३३२

चशब्दोऽवधारणे भिन्नक्रमः । तेन स्वभ्यस्तज्ञानवानेव गुरुर्मोक्षप्रदः प्रोक्त इति ॥

ततश्चेदं सिद्धमित्याह

तस्मात्स्वभ्यस्तविज्ञान-
तैवैकं गुरुलक्षणम् ।

एकमिति न द्वितीयं, योगित्वमपीत्यर्थः ॥

ननु योग्यपि गुरुरुक्तः, तत्कथमेवमभिधातुं युज्यते । सत्यं, किंत्वयमस्ति विभागो-यज्ज्ञानी तावद्योगिनो विशिष्यते इत्युक्तं, तत्रापिच कुत्र ज्ञानी योगी वा गुरुः कार्यः, कुत्र वा परिहार्य इति । सचेहास्माभिर्गुरुमुखाधिगतः प्रकाश्यते इत्याह

विभागस्त्वेष मे प्रोक्तः
शंभुनाथेन दर्श्यते ॥३३३॥

एष इति वक्ष्यमाणः ॥ ३३३ ॥

तदेवाह

मोक्षज्ञानपरः कुर्या-
द्गुरुं स्वभ्यस्तवेदनम् ।

अन्यं त्यजेत्प्राप्तमपि
तथाचोक्तं शिवेन तत् ॥३३४

अन्यमित्यस्वभ्यस्तज्ञानम् । ननु 'गुरुत्यागाद्भवेन्मृत्युः' इत्यादिना प्राप्तस्य गुरोस्त्यागे दोषोऽभिहितः-इति कथमेवमुक्तमित्याशङ्क्याह 'तथाचोक्तं शिवेन तत्' इति । नैतन्निष्प्रमाणकमित्यर्थः ॥ ३३४ ॥

तदेव पठति

आमोदार्थी यथा भृङ्गः
पुष्पात्पुष्पान्तरं व्रजेत् ।
विज्ञानार्थी तथा शिष्यो
गुरोर्गुर्वन्तरं व्रजेत् ॥३३५॥

ननु विज्ञानार्थी शिष्यः, तच्चानेन कथंचिदाद्यादेव प्राप्तमिति किमस्य गुर्वन्तरगमनेनेत्याशङ्क्याह

शक्तिहीनं गुरुं प्राप्य
मोक्षज्ञाने कथं श्रयेत् ।
नष्टमूले द्रुमे देवि
कुतः पुष्पफलादिकम् ॥३३६

शक्तिहीनमिति विज्ञानदानादावसामर्थ्यात्। सहि स्वयमज्ञ इति परस्यापि किं कुर्यादित्याशयः ॥ ३३६ ॥

नन्विह भावना नाम मुख्या, साचाज्ञेऽपि गुरौ क्रियमाणावश्यं फलेदिति किं तत्त्यागेनेत्याशङ्क्याह

उत्तरोत्तरमुत्कर्ष-
लक्ष्मीं पश्यन्नपि स्थितः ।
अधमे यः पदे तस्मा-
त्कोऽन्यः स्याद्देवदग्धकः ॥३३७॥

एवं भोगमोक्षाद्यभिवाञ्छतावश्यमुत्कृष्ट एव गुरुराश्रयणीयो, येनास्य तत्सिद्धिरयत्नमेव स्यादित्याह

यस्तु भोगं च मोक्षं च
वाञ्छेद्विज्ञानमेव च ।
स्वभ्यस्तज्ञानिनं योग-
सिद्धं स गुरुमाश्रयेत् ॥३३८

योगसिद्धमिति सिद्धयोगं तृतीयं योगिनमित्यर्थः, तस्य चावश्यभावि स्वभ्यस्तज्ञानमि-

त्युक्तं स्वभ्यस्तज्ञानिनमिति, यत्समनन्तरमेव संवादितं यतोऽस्य ज्ञानमप्यस्तीति ॥ ३३८ ॥

एवंविधश्चेद्गुरुर्न प्राप्यते, तदा किं कर्तव्यमित्याशङ्क्याह

तद्भावे तु विज्ञान-
मोक्षयोर्ज्ञानिनं श्रयेत् ।

विज्ञानमोक्षयोरिति तन्निमित्तमित्यर्थः ॥

एवमपि मुक्त्यर्थिना किं कार्यमित्याशङ्क्याह

भुक्त्यंशे योगिनं यस्त-
त्फलं दातुं भवेत्क्षमः॥ ३३९॥

श्रयेदित्यनुषज्यते । सचार्थाद्घटमानसिद्धयोगयोरन्तरालवर्ती मितः । तदिति भुक्तिलक्षणम् ॥ ३३९ ॥

यः पुनः संप्राप्तो घटमानो वा योगी भुक्तिमात्रमपि दातुं न समर्थः परं तदुपायोपदेशकुशलः, तमनादृत्यापि ज्ञानी गुरुः कार्यो यस्तदुपायमुपदिशन् क्रमेण मोचयेदपीत्याह

फलदानाक्षमे योगि-
न्युपायैकोपदेशिनि ।

वरं ज्ञानी योऽभ्युपायं
दिशेदपिच मोचयेत् ॥३४०॥

ननु यद्येवं मितोऽपि ज्ञानी गुरुः कार्यः, तद्विज्ञानार्थिनः शिष्यस्य तत्परिपूर्तिः कुतः स्यादित्याशङ्क्याह

ज्ञानी न पूर्ण एवैको
यदि ह्यंशांशिकाक्रमात् ।
ज्ञानान्यादाय विज्ञानं
कुर्वीताखण्डमण्डलम् ॥३४१॥
तेनासंख्यान्गुरून्कुर्या-
त्पूरणाय स्वसंविदः ।

यदि नाम हि एक एव न पूर्णज्ञानशाली गुरुः प्राप्यते, तदेकैकतः परिमितज्ञानाद्बुरोरंशांशिकाक्रमेणापि ज्ञानान्यादाय स्वात्मन्यखण्डमण्डलं पूर्णं ज्ञानं कुर्यात्, अतश्चैवंविधादेकस्मादेव गुरोस्तदलाभात्स्वसंवित्परिपूरणाय महतापि प्रयत्नेन निःसंख्याका गुरवः कार्याः, नैवं कश्चित्प्रत्यवाय इत्यर्थः ॥

तीव्रशक्तिपाताघ्रातः पुनः पूर्णज्ञानमेव गुरुमासादयेत् यत्प्रसादादनायासमेवास्य स्वात्मनो विज्ञानपारिपूर्ण्यं समुदियादित्याह

धन्यस्तु पूर्णविज्ञानं
ज्ञानार्थी लभते गुरुम्॥ ३४२॥

अत्र चाहमेवोदाहरणं यद्विज्ञानार्थिना मया लोकोत्तरे द्वयाद्वयात्मनि शैवशास्त्रादावभिख्यामात्रप्रख्यापितपरश्रेयःसंश्रयः श्रीमान् कल्याणः पूर्णविज्ञानवानेक एव गुरुर्लब्धः, पदवाक्यप्रमाणादौ लौकिके श्रीमान् सुगृहीतनामधेयः शङ्खधरश्चेति ॥ ३४२ ॥

ननु यदि नाम एकस्मादेव पूर्णविज्ञानशालिनो गुरोरनायासमेव पूर्णं ज्ञानं स्यात् तदस्तु, तदर्थं पुनर्नानागुर्वादिसंभरणात्मा प्रयत्नोऽपि कस्मात्क्रियते इत्याशङ्क्याह

नानागुर्वागमस्रोतः-
प्रतिभामात्रमिश्रितम् ।
कृत्वा ज्ञानार्णवं स्वाभि-
र्विप्रुड्भिः प्लावयेन्न किम्॥ ३४३

स्रोतः सन्ततिर्नदीप्रवाहश्च, प्रतिभा सांमुख्येन भानं, मिश्रितं पूरितं किं न प्लावयेदिति सर्वमेव ज्ञानसंविभागभाजनं कुर्यादित्यर्थः ॥

एतच्च गुरुभिरप्युक्तमित्याह

आ तपनान्मोटकान्तं
यस्य मेऽस्ति गुरुक्रमः ।
तस्य मे सर्वशिष्यस्य
नोपदेशदरिद्रता ॥ ३४४ ॥
श्रीमता कल्लटेनेत्थं
गुरुणा तु न्यरूप्यत ।

अनेनैवाशयेन मयापि नानागुरूपसेवनं कृतमित्याह

अहमप्यत एवाधः-
शास्त्रदृष्टिकुतूहलात् ॥३४५॥
तार्किकश्रौतबौद्धार्ह-
द्वैष्णवादीन्नसेविषि ।

कुतूहलादिति नत्वादरात्, तार्किका नैयायिकवैशेषिकादयः ॥

ननु यथा वैष्णवादिभ्यः शैवादीनां गुरूणामेवमुत्कर्षः, तथैषामधरशासनस्थानामपि परस्परं किमस्ति नवेत्याशङ्क्याह

लोकाध्यात्मातिमार्गादि-
कर्मयोगविधानतः ॥ ३४६ ॥
संबोधोत्कर्षबाहुल्या-
त्क्रमोत्कृष्टान्विभावयेत् ।

लोकः श्रुतिस्मृत्यादिः, अध्यात्मं वेदान्तादिः, अतिमार्गो लौकिकमार्गातीतं सांख्यपातञ्जलादि, एवमादावग्निष्टोमादेः कर्मणः, चित्तवृत्तिनिरोधाद्यात्मनश्च योगस्य विधानतो हेतोः सम्यग्बोधस्य यथायथमुत्कर्षतारतम्यात् क्रमोत्कृष्टान्वैदिकादीन् गुरून्विभावयेज्जानीयादित्यर्थः ॥

एवं वैष्णवादिक्रमेण यथायथं संबोधोत्कर्षभाजामेव मुनीनामस्मद्दर्शनं प्रत्यपि जिज्ञासा जातेत्याह

श्रीपूर्वशास्त्रे प्रष्टारो
मुनयो नारदादयः ॥३४७॥

प्राग्वैष्णवाः सौगताश्च
सिद्धान्तादिविदस्ततः ।
क्रमात्त्रिकार्थविज्ञान-
चन्द्रोत्सुकितदृष्टयः ॥३४८॥

एवं यथायथमूर्ध्वोर्ध्वक्रमेण गुरुशास्त्रपरिचयात् संबोधोत्कर्षो भवेदिति न गुरुभूयस्त्वे विचिकित्सितव्यमित्याह

तस्मान्न गुरुभूयस्त्वे
विशङ्केत कदाचन ।

ननु

'गुर्वन्तररते मूढे आगमान्तरसेवके ।
शक्तिहिंसाकरे द्विष्टे संपर्कं नैव कारयेत् ॥'

इत्याद्युक्त्या गुर्वन्तररतस्यास्पृश्यत्वमभिहितमिति गुर्वन्तरगमने विवेकिनः शङ्कावश्यमुदियादित्येवं कस्मादुक्तमित्याशङ्क्याह

गुर्वन्तररते मूढे
आगमान्तरसेवके ॥ ३४९ ॥
प्रत्यवायो य आम्नातः
स इत्थमिति गृह्यताम् ।

इत्थमिति वक्ष्यमाणप्रकारेण ॥

तदेवाह

यो यत्र शास्त्रेऽधिकृतः
स तत्र गुरुरुच्यते ॥ ३५० ॥
तत्रानधिकृतो यस्तु
तद्वुर्वन्तरमुच्यते ।

तत्रानधिकृत इति यथा वामे सैद्धान्तिकः ॥

एतदेव दृष्टान्तोपदर्शनेन हृदयङ्गमयति

यथा तन्मण्डलासीनो
मण्डलान्तरभूपतिम् ॥३५१॥
स्वमण्डलजिगीषुः स-
न्सेवमानो विनश्यति ।
तथोत्तरोत्तरज्ञान-
सिद्धिप्रेप्सुः समाश्रयन्॥३५२
अधराधरमाचार्यं
विनाशमधिगच्छति ।

इह यथा तस्मिन्नेव मण्डले स्थितः कश्चित्तदेव स्वमास्पदभूतं मण्डलमपहृतप्रायं जेतु-

मिच्छुस्तत्रानधिकारिणमपि मण्डलान्तरभूपतिं सेवमानो विनश्यति तज्जयोऽस्य माभूत् प्रत्युतानर्थान्तरं किंचिदुदियादित्यर्थः। एवमूर्ध्वोर्ध्व एव ज्ञाने स्थितस्तत्सिद्धिमेव च प्रातुमिच्छुस्तदनधिकृतमधराधरमाचार्यं समाश्रयन्विनाशमधिगच्छति तत्समुदितेऽमुष्य भुक्तिमुक्ती मा स्यातां प्रत्युत प्रत्यवायित्वं भवेदित्यर्थः ॥

न केवलमेतत्स्वदर्शनमेवाधिकृत्योक्तं, यावद्दर्शनान्तराण्यपीत्याह

एवमेवोर्ध्ववर्तिष्णो-
रागमात्सिद्धिवाञ्छकः॥३५३॥
मायीयशास्त्रनिरतो
विनाशं प्रतिपद्यते ।
उक्तं च श्रीमदानन्दे
कर्म संश्रित्य भावतः॥३५४॥
जुगुप्सते तत्तस्मिंश्च
विफलेऽन्यत्समाश्रयेत् ।
दिनाद्दिनं ह्रसंस्त्वेवं
पच्यते रौरवादिषु ॥ ३५५ ॥

नचैतन्न्यायमात्रसिद्धमेवेत्याह 'उक्तं च' इत्यादि । यः कश्चिदुत्तरोत्तरशास्त्रीयमपि कर्म संश्रित्य भावतो जुगुप्सते तत्र निष्ठां न यायादिति तस्मिन्निष्फलेऽन्यन्मार्गीयशास्त्रीयं कर्म सम्यगाहृदयादाश्रयेत् , स पुनरिह लोके दिनाद्दिनं ह्रसन् धनदारादिभिरपचीयमानः परत्र रौरवादिषु पच्यते पापफलभाग्भवेदित्यर्थः । एवंपाठश्च जरत्पुस्तकेषु शतशो दृष्टः ॥

ननु यद्येवमूर्ध्वशासनस्थोऽप्यधराधरे गुर्वादौ रज्यन् प्रत्यवेयात्, तदूर्ध्वोर्ध्वं मार्गं प्राप्तुमिच्छुरधरं गुर्वादि परिहरन् कीदृक् स्यादित्याशङ्क्याह

यस्तूर्ध्वोर्ध्वपथप्रेप्सु-
रधरं गुरुमागमम् ।
जिहासेच्छक्तिपातेन
स धन्यः प्रोन्मुखीकृतः॥ ३९६

एवमेवंविधानामेवानुग्राह्यतयास्मद्दर्शनसंस्कारविशेषोऽप्युक्त इत्याह

अत एवेह शास्त्रेषु
शैवेष्वेव निरूप्यते ।

शास्त्रान्तरार्थानाश्वस्ता-
न्प्रति संस्कारको विधिः॥ ३५७

नचैतदेवास्य दर्शनस्योत्तमत्वे निमित्तं, यावदन्यदपीत्याह

अतश्चाप्युत्तमं शैवं
योऽन्यत्र पतितः सहि ।
इहानुग्राह्य ऊर्ध्वोर्ध्वं
नेतस्तु पतितः क्वचित् ॥ ३५८

ऊर्ध्वोर्ध्वमिति यथा वैष्णवादिः शैवे, स वामे सच दक्षे इति । क्वचिदिति वैष्णवादौ ॥

एवं ह्यस्मद्दर्शन इव तत्रापि तं प्रति कश्चन लिङ्गोद्धारप्रायः संस्कारविशेषोऽभिहितः स्यात् । तदाह

अत एव हि सर्वज्ञै-
र्ब्रह्मविष्ण्वादिभिर्निजे ।
न शासने समाम्नातं
लिङ्गोद्धारादि किंचन ॥ ३५९

सर्वज्ञैरिति ते ह्येवं जानते यदूर्ध्वोर्ध्ववर्तिनां शैवादीनामस्मदादिदर्शनानुग्राह्यत्वं नास्तीति॥

ननु यद्येते सर्वज्ञाः, तदत्युत्कृष्टं शैवं ज्ञानमपहाय कस्मादेवमपकृष्टं ज्ञानमादिशन्नित्याशङ्क्याह

इत्थं विष्ण्वादयः शैव-
परमार्थैकवेदिनः ।
कांश्चित्प्रति तथादिक्षु-
स्ते मोहाद्विमतिं श्रिताः॥३६०

कांश्चिदिति तावदुपदेशयोग्यान् । तथेति अपकृष्टज्ञानात्मना प्रकारेणेत्यर्थः । तेषां च तावतैव मोहवशादिदमेव तत्त्वमिति विरुद्धो निश्चय इत्युक्तं ते मोहाद्विमतिं श्रिता इति ॥

तेषां च तत्रैवाभिनिवेशाद्ब्रह्माद्यैरपि तदेव दार्ढ्येनोपदिष्टमित्याह

तथाविधामेव मतिं
सत्यसंस्पर्शनाक्षमाम् ।
दृष्ट्वैषां ब्रह्मविष्ण्वाद्यै-
र्बुद्धैरपि तथोदितम् ॥३६१॥

तथाविधामिति विरुद्धाम्, अत एवोक्तं सत्यसंस्पर्शनाक्षमामिति। बुद्धैरपि शैवपरमार्थ-

तया प्रबुद्धैरपीत्यर्थः । तथेति तत्तदाशयोचि-
तेनापकृष्टज्ञानात्मना प्रकारेणेत्यर्थः ॥ ३६१ ॥

प्रतिज्ञातमेवाह्निकार्थं प्रथमार्धेनोपसंहरति

इत्येष युक्त्यागमतः
शक्तिपातो विवेचितः ।

विवेचित इति शिवम् ॥

परमेशशक्तिपात-
व्यक्तस्वात्मीयवीर्यवैभवतः ।
प्रभविष्णुराह्निकार्थं
त्रयोदशं जयरथः स्फुटं व्यवृणोत् ॥

इति श्रीमहामाहेश्वराचार्यवर्यश्रीमद-
भिनवगुप्ताचार्यविरचिते तन्त्रालोके
श्रीजयरथविरचितविवेकाभिख्यव्याख्योपेते शक्तिपातप्रदर्शनं
नाम त्रयोदशमाह्निकम् ॥ १३ ॥

अथ

श्रीतन्त्रालोके

श्रीमन्महामाहेश्वराचार्याभिनवगुप्तविरचिते
श्रीजयरथकृतविवेकोपेते

चतुर्दशमाह्निकम् ।

यौ योगिनीप्रियतया
तिरोहितिव्यपगतिक्रमं जगताम् ।
प्रबलीकरोति बलतो
बलाय तस्मै बलिं यामः ॥

इह तावत्परमेश्वरः पञ्चविधकृत्यकारीति सर्वत्रोक्तम् । तत्रास्य पूर्वं संहारचित्रतानिरूपणावसरे सृष्ट्यादित्रयं दर्शितं समनन्तराह्निके चानुग्रह इति संप्रत्यवशिष्टं तिरोभावाख्यं पञ्चमं कृत्यं द्वितीयार्धेन प्रतिपादयितुमाह

तिरोभावस्वरूपं तु
कथ्यमानं विविच्यताम् ।

इह दीक्षाया उपक्रमेऽपि एतन्निर्देशोऽयमाशयो यत्प्रथमं हेये प्रदर्शिते परमुपादेये विश्रान्तिर्भवेदिति ॥

तदेव अवतारयति

स्वभावात् परमेशानो
नियत्यनियतिक्रमम् ॥ १ ॥
स्पृशन्प्रकाशते येन
ततः स्वच्छन्द उच्यते ।

स्वभावादिति स्वो भाव इच्छा तत इत्यर्थः॥ तत्रास्य नियतिक्रमस्पर्शेन प्रकाशनं दर्शयति

नियतिं कर्मफलयो-
राश्रित्यैष महेश्वरः ॥ २ ॥
सृष्टिसंस्थितिसंहारा-
न्विधत्तेऽवान्तरस्थितीन् ।

अवान्तरस्थितीनिति शाक्तमहासृष्ट्याद्यपेक्षया। ते च पृथ्व्याद्यण्डत्रयविषयाः। यदुक्तं प्राक्

'कालाग्निर्भुवि संहर्ता मायान्ते कालतत्त्वराट् ।
श्रीकण्ठो मूल एकत्र सृष्टिसंहारकारकः ॥
तल्लयोऽवान्तरस्तस्मा.....।' (६।१७२)

इति ॥ २ ॥

अन्यत्र पुनरस्य नियतिस्पर्शो नास्तीत्याह

महासर्गे पुनः सृष्टि-
संहारानन्त्यशालिनि ॥ ३ ॥
एकः स देवो विश्वात्मा
नियतित्यागतः प्रभुः ।

महत्त्वमेवास्य दर्शयति सृष्टिसंहारानन्त्य-शालिनीति । यदुक्तं प्राक्

'श्रीमानघोरः शक्त्यन्ते संहर्ता सृष्टिकृच्च सः ।
तत्सृष्टौ सृष्टिसंहारा निःसंख्या जगतां यतः ॥
अन्तर्भूतास्ततः शक्ती महासृष्टिरुदाहृता ।' (६।१७३)

इति । नियतित्यागत इति नहि इयं कर्म-भूर्येनात्र तदपेक्षया नियतिपरिग्रहोऽपि स्यात् ॥

न केवलमत्रास्य नियतित्यागो, यावदवा-न्तरसर्गादावपीत्याह

अवान्तरे या च सृष्टिः
स्थितिश्चात्राप्ययन्त्रितम् ॥ ४ ॥
नोज्झत्येष वपुस्त्यक्त-
नियतिश्च स्थितोऽत्र तत् ।

नोज्झतीति तथात्वे ह्यस्य स्वातन्त्र्यखण्डना भवेदिति भावः ॥ ४ ॥

नियतित्यागात्यागयोः को विशेष इत्याशङ्क्याह

नियत्यैव यदा चैष
स्वरूपाच्छादनक्रमात् ॥५॥
भुङ्क्ते दुःखविमोहादि
तदा कर्मफलक्रमः ।
त्यक्त्वा तु नियमं कार्मं
दुःखमोहपरीतताम् ॥६॥
बिभासयिषुरास्तेऽयं
तिरोधानेऽनपेक्षकः ।

स्वरूपाच्छादनक्रमादिति तमवलम्ब्येत्यर्थः । कार्मनियमत्यागे हेतुरनपेक्षक इति । यदभिप्रायेणैव वक्ष्यति

'नचास्य कर्ममहिमा तादृग्येनेत्थमास्त सः । (१४)

इति ॥ ६ ॥

ननु तिरोधानमेव नाम किमुच्यते यत्रापि विभोः कर्मादिनैरपेक्ष्यमित्याशङ्कां गर्भीकृत्य कार्यद्वारेण दृष्टान्तोपदर्शनपुरःसरं तत्स्वरूपमेवाभिधत्ते

यथा प्रकाशस्वातन्त्र्यात्
प्रतिबुद्धोऽप्यबुद्धवत् ॥७॥
आस्ते तद्वदनुत्तीर्णोऽ-
प्युत्तीर्ण इव चेष्टते ।

इह यथा प्रकाश एव अहंपरामर्शोदयात् प्रबुद्धोऽपि अप्रबुद्धवदास्ते 'वीतरागा अपि सरागवत् व्यवहरन्ति' इति न्यायेन गोपित-स्वात्मवीर्यावष्टम्भोऽवतिष्ठते, तथा कश्चिदनुत्तीर्णोऽपि पारमेश्वरशक्तिपाताभावादनाभासितरूपोऽपि उत्तीर्ण इव आभासितरूप इव चेष्टते परविप्रलम्भाय दाम्भिकतया भक्तिश्रद्धादि विदध्यात्। वस्तुतस्तु पारमेश्वरमन्त्रतन्त्रादावस्य न कश्चिदादरप्रत्यय इत्येतत्तिरोधानं नाम इत्यर्थः। यदुक्तं प्राक्

'अनाभासितरूपोऽपि तदाभासितयेव यत् ।
स्थित्वा मन्त्रादि संगृह्य त्यजेत्सोऽस्य तिरोभवः ॥'
(१३।१२१)

इति ॥७॥

ननु इह तावत्

'शिवोऽहमद्वितीयोऽहं.....।'

इत्याद्युक्त्था शिवतामनापन्नोऽपि तादात्म्यप्रतिपत्तये तथा भावयेदित्याम्नातं, तदेवमेवास्य चेच्चेष्टा तदा को दोष इत्याशङ्क्याह

यथा च बुद्धस्तां मूढ-
चेष्टां कुर्वन्नपि द्विषन् ॥८॥
हृद्यास्ते मूढ एवं हि
प्रबुद्धानां विचेष्टितम् ।

कुर्वन्नपि हृदि द्विषन्नास्ते तत्राहृदयादस्य विश्रान्तिर्नास्तीत्यर्थः ॥ ८ ॥

नचैतदस्माभिरेवोक्तमित्याह

श्रीविद्याधिपतिश्चाह
मानस्तोत्रे तदीदृशम् ॥९॥

तदेव पठति

ये यौष्माके शासनमार्गे कृतदीक्षाः
संगच्छन्तो मोहवशाद्विप्रतिपत्तिम् ।
नून तेषां नास्ति भवद्भानुनियोगः
सङ्कोचः किं सूर्यकरैस्तामरसानाम् ॥१०॥
ज्ञातज्ञेया धातृपदस्था अपि सन्तो
ये त्वन्मार्गात्कापथगास्तेऽपि न सम्यक्।

प्रायस्तेषां लैङ्गिकबुद्ध्यादिसमुत्थो
मिथ्याबोधः सर्पवसादीपजकल्पः॥ ११॥
यस्माद्विद्धं सूतकमुख्येन नु ताम्रं
तद्यद्भूयः स्वां प्रकृतिं नो समुपेयात्।
नो तैः पीतं भूतलसंस्थैरमृतं त-
द्येषां तृट्क्षुद्दुःखविबाधाः पुनरस्मिन्॥ १२

भवद्दर्शनमनुप्रविश्यापि तत्र ये विप्रतिपन्नास्तेषां शक्तिपात एव नायातः, अतश्च भवद्दर्शनस्य उत्तानतया तत्त्वं जानाना अपि ततः सांख्यादिकुमार्गं गता इति ते सम्यक् विलयशक्त्याघाता एवेत्यर्थः। यतस्तेषां सर्पवसादीपादिवत् तद्दर्शनादुत्पन्नं मिथ्याज्ञानमस्ति, येनैतदन्यथा जानते। सर्पवसादीपे हि सति सर्वं सर्पमयमेव दृश्यते इति। अतश्च दर्शनान्तरान्यथानुपपत्त्या एतन्निश्चीयते—यत्त्वद्दर्शने तिरोहितत्वादेते न प्ररोहमुपगता इति। नहि पारतेन विद्धं ताम्रं पुनस्ताम्रतां यायात्, न वा पीतामृतानां पुनस्तृडादिबाधा स्यात्॥ १२॥

एवंच प्रबुद्धचेष्टैव तिरस्क्रियमाणत्वादेनं तिरोभावयेदित्याह

ततः प्रबुद्धचेष्टासौ
मन्त्रचर्यार्चनादिका ।
द्वेषेद्धान्तर्दहत्येनं
दाहः शङ्कैव सा यतः॥ १३॥

अन्तर्दाहे हेतुर्द्वेषेद्धेति द्वेषेणेद्धा द्विष्यमाणतयोत्तेजितेत्यर्थः । तद्द्वेषेणैव ह्यस्यैवंभाव इति भावः । तदुक्तं

' निन्द्यमानमहामन्त्रविद्याचर्यादिकोपजम् ।
पाप्मं तं पातयेद्घोरे यातनाधाम्नि सर्वथा ॥ '

इति । कश्चात्र दाहार्थ इत्याशङ्क्याह दाहः शङ्कैव सा यत इति । शङ्का हि विकल्पः, स एव च संसारनिमित्तम् । यदुक्तं

' सर्वो विकल्पः संसारः.....।

इति । तत्रैव चास्य दन्दह्यमानत्वं नाम तिरोभाव इत्येवमुक्तम् ॥ १३ ॥

नन्वत्र चास्य किं प्राक्तनकर्मविस्फूर्जितं निमित्तमुतान्यत्किंचिदित्याशंक्याह

न चास्य कर्ममहिमा
तादृग्येनेत्थमास्त सः ।
किं हि तत्कर्म कस्माद्वा
पूर्वेणात्र समो विधिः ॥१४॥

तादृक् तिरोधानहेतुः, इत्थमिति प्रवुद्धचेष्टादिद्वेषकारितया । नह्येवंविधं कर्म किंचिदस्ति यत्तिरोधानहेतुतां यायात्, तद्धि जात्यायुर्भोगप्रदम्, नचैतन्मध्यात्तिरोधानं किञ्चिदित्युक्तं किं हि तत्कर्मेति । नचैवंविधः कश्चन कर्माशयोऽप्यस्ति* योऽस्य हेतुतां यायादित्याह कस्माद्वेति । एवं च यथा कर्मादिनैरपेक्ष्येण परमेश्वरेच्छयैव अनुग्रहः स्यादिति पूर्वमुक्तं तथा तिरोधानमपीत्युक्तं पूर्वेणात्र समं विधिरिति । विधिरिति चोद्यप्रतिसमाधानप्रकारः ॥ १४ ॥

अत एवाह

तस्मात्सा परमेशेच्छा
ययायं मोहितस्तथा ।

अनन्तकालसंवेद्य-
दुःखपात्रत्वमीहते ॥१५॥

ननु पारमेश्वरमिच्छामात्रमेव चेदत्र निमित्तं, तत्कुतस्त्यमिदमेषां दुःखवैचित्र्यमित्याशङ्क्याह

तत्रापि चेच्छावैचित्र्या-
दिहामुत्रोभयात्मकः ।
दुःखस्यापि विभेदोऽस्ति
चिरशैघ्र्यकृतस्तथा ॥१६॥

एतदेव दर्शयति

कालकामान्धकादीनां
पौलस्त्यपुरवासिनाम् ।
तथान्येषां तिरोभाव-
स्तावद्दुःखो ह्यमुत्र च॥१७॥

पुरवासिनस्त्रिपुराः, अन्येषामिति चित्रसेनादीनाम्। चशब्दादिहापि, तेन कालादीनामिहैव दाहाद्यनन्तरमनुग्रहस्य वृत्तत्वात्, पौलस्त्यादीनामुभयत्रापि अनुग्रहासंपत्तेः ॥

न केवलमस्य पारमेश्वरमिच्छामात्रमेव निमित्तं, यावदन्यदपीत्याह

अन्योऽपि च तिरोभावः
समयोल्लङ्घनात्मकः ।

समयोल्लङ्घनात्मक इति कार्यकारणयोरभेदोपचारात् ॥

किमत्र प्रमाणमित्याशङ्क्याह

यदुक्तं परमेशेन
श्रीमदानन्दगह्वरे ॥१८॥
समयोल्लङ्घनाद्देवि
क्रव्यादत्वं शतं समाः ।

नचात्र शतं समा एव इति नियमो विवक्षित इत्याह

तत्रापि मन्दतीव्रादि-
भेदाद्बहुविधः क्रमः ॥१९॥

एवं तिरोभावस्य स्वरूपमभिधाय, तद्व्यपगममप्यासूत्रयति

स्वातन्त्र्याच्च महेशस्य
तिरोभूतोऽप्यसौ स्वयम् ।

परद्वारेण वाभ्येति
भूयोऽनुग्रहमप्यलम् ॥२०॥

अत्र स्वयं तावदनुग्रहाभिमुख्येनागमनमाह

भूयोऽनुग्रहतः प्राय-
श्चित्ताद्याचरणे सति ।
अनुसारेण दीक्षादौ
कृते स्याच्छिवतामयः॥२१॥

प्रायश्चित्ताचरणं हि स्वयमेव भवेदिति भावः। अनुसारेणेति शक्तिपातस्य तीव्रमन्दादिरूपतया स्वयोग्यतायाः ॥ २१ ॥

परद्वारेणाप्याह

तिरोभूतः परेतासु-
रपि बन्धुसुहृद्गुरून् ।
आलम्ब्य शक्तिपातेन
दीक्षाद्यैरनुगृह्यते ॥२२॥

अत्रापि प्राग्वद्वैचित्र्यमस्तीत्याह

तत्रापि कालशीघ्रत्व-
चिरत्वादिविभेदताम् ।

तथैति शक्तिपातोऽसौ
　　येनायाति शिवात्मताम् ॥२३

तथेति चिरं शीघ्रेण वा ॥ २३ ॥

प्रागुक्तमेव प्रमेयं संचिनोति

इत्थं सृष्टिस्थितिध्वंस-
　　तिरोभावमनुग्रहः ।
इति पञ्चसु कर्तृत्वं
　　शिवत्वं संविदात्मनः ॥२४॥

ननु भवतु संविदः सृष्ट्यादौ कृत्यपञ्चके कर्तृत्वं नाम शिवत्वं, मादृशां पुनरेतदुपदेशेन कोऽर्थ इत्याशङ्क्याह

पञ्चकृत्यस्वतन्त्रत्व-
　　संपूर्णस्वात्ममानिनः ।
योगिनोऽर्चाजपध्यान-
　　योगाः संस्युः सदोदिताः २५

अर्चादीनां हि परतत्त्वानुप्राणित्वं नाम तत्त्वम् । तच्चैवंमानिनो योगिनः सर्वदैवास्तीत्युक्तं तेऽपि सदोदिता इति ॥ २५ ॥

एवं चैतदेव परमुपेयं येन जीवतोऽपि मुक्तिः स्यात्, अतश्च क्षणमात्रावभासिनि कृत्रिमप्राये भोगादावासक्तिर्न कार्येत्याह

ऐन्द्रजालिकवृत्तान्ते
न रज्येत कदाचन ।
सादाशिवोऽपि यो भोगो
बन्धः सोऽप्युचितात्मनाम् २६

ननु ज्ञानक्रियात्मा शिव इत्यस्मन्मतं, तत्कथमुक्तं कर्तृत्वमेव शिवत्वमिति,—इत्याशङ्क्याह

ज्ञातृत्वमेव शिवता
स्वातन्त्र्यं तादिहोच्यते ।

नहि ज्ञानक्रिययोः कश्चिद्भेद इति भावः । यदुक्तं

'न क्रियारहितं ज्ञानं न ज्ञानरहिता क्रिया ।'

इति ॥

कुलालादिन्यायेन निर्मातृतारूपं पुनः कर्तृत्वमत्र न विवक्षितं यतस्तन्न मुख्यम् । तद्धि शुद्धस्वातन्त्र्यात्मनः कर्तृत्वस्याधिष्ठेयं तेन विनास्यानुदयात् । तदाह

कुलालवत्तु कर्तृत्वं
न मुख्यं तदधिष्ठितेः ॥२७॥

ननु तर्हि मादृशामपि कुलालादिवदेव न मुख्यकर्तृत्वमिति कृतमात्मनि शिवत्वाभिमानेन, तथात्वे ह्यस्माकमपीच्छामात्रानुवर्ति जगद्भवेत्, नचैवमित्याशङ्क्याह

इति ज्ञात्वा ग्रहीतव्या
नैव जात्वपि खण्डना ।
शिवोऽहं चेन्मदिच्छानु-
वर्ति किं न जगत्त्विति ॥२८

खण्डनेति पारिमित्यम् ॥ २८॥

तदग्रहणमेवोपपादयति

ममेच्छामनुवर्तन्ता-
मित्यत्राहंविदि स्फुरेत् ।
शिवो वा परमेशानो
देहादिरथ निर्मितः ॥२९॥
शिवस्य तावदस्त्येत-
द्देहस्त्वेष तथा त्वया ।

कुतः कान्या देहतास्य
तत्किं स्याद्वाच्यतापदम् ॥ ३०

अहंविदीति अहंसंवित्तावित्यर्थः । तत्र स्वतन्त्रः शिव एव यद्यत्र स्फुरेत्, तत्स्थितमेव जगतस्तदिच्छानुवर्तित्वम् । अथ निर्मितो देहादिः, कुत एवमस्य भवेत्। स हि जड एव अपहस्ततपूर्णज्ञानक्रियः सृष्टः, अन्यथा हि अस्य देहत्वमेव न स्यात्, तदेतन्नोपालम्भनीयमित्युक्तं तत्किं स्याद्वाच्यतापदमिति। तस्माच्छिव एवाहमभिमानः कार्यो, न देहादौ येन तत्त्वमेव दार्ढ्यातिशयात्प्ररोहमुपगच्छेत्। इयता च ज्ञानपरिपूर्णताख्यं प्रमेयमुक्तं, तदेव च परमुपादेयं येनोक्तं

'ऐन्द्रजालिकवृत्तान्ते न रज्येत कदाचन ।'

इति ॥ ३० ॥

ननु किमत्र प्रमाणमित्याशङ्क्याह

उक्तं च सिद्धसन्तान-
श्रीमदूर्मिमहाकुले ।
ऊर्मिमहाकुले इति ऊर्मिकौले ॥

तदेव पठति

पवनभ्रमणप्राण-
विक्षेपादिकृतश्रमाः ॥३१॥
कुहकादिषु ये भ्रान्ता-
स्ते भ्रान्ताः परमे पदे ।

ननु यद्येवं, तत्कथं प्राणविक्षेपाद्यात्मिकाया उत्क्रान्तेः परपदोपायत्वं सर्वत्रोक्तमित्याशङ्क्याह

सर्वत्र बहुमानेन
याप्युत्क्रान्तिर्विमुक्तये ॥३२॥
प्रोक्ता सा सारशास्त्रेषु
भोगोपायतयोदिता ।

यद्गीतं

'सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥' (८।१२)

इति । सारशास्त्रेष्विति प्रधानेषु ऊर्मिकौलादिष्वित्यर्थः । भोगोपायतयेति न मुक्त्युपायतया । अनेन च उत्क्रान्तेरनुपयुक्तत्वमासूत्रितम् ॥

तदेव उपपादयितुं तत्रत्यमेव ग्रन्थं पठति

यदि सर्वगतो देवो
वदोत्क्रम्य क्व यास्यति॥३३॥
अथासर्वगतस्तर्हि
घटतुल्यस्तदा भवेत् ।
उत्क्रान्तिविधियोगोऽय-
मेकदेशेन कथ्यते ॥३४॥
निरंशे शिवतत्त्वे तु
कथमुत्क्रान्तिसंगतिः ।

घटतुल्य इति नियतदेशकालाकारतया सङ्कुचितप्रायत्वात्। उत्क्रान्तिप्रकारश्चायं योग एकदेशेन नियतदेशतया कथ्यते—यदधराधर-पदत्यागेन ऊर्ध्वोर्ध्वपदाक्रमणमुत्क्रान्तिरिति। नचैतच्छिवतत्त्वे संगच्छते, यतः सदसदादिविकल्पोज्झितत्वात् तन्निरंशम् । तदुक्तं तत्र

‘ उत्क्रान्तिर्विद्यते तत्र यत्र स्यान्मानकल्पना ।
अमाने शून्यनिर्भासे तत्रोत्क्रान्तिर्न विद्यते ॥
अस्ति चेद्भगवान्व्यापी कथयोत्क्रमणेन किम् ।
नास्ति चेद्भगवान्व्यापी कथयोत्क्रमणेन किम् ॥

उत्क्रान्तिविधियोगोऽयमेकदेशेन कथ्यते ॥
विभुत्वादात्मनः सोऽपि शिवस्य च न विद्यते ॥
नास्त्यस्ति नास्ति नास्तीति कोट्यो न स्पृशन्ति यम् ।
वाचामगोचरो यस्मात्तत्तत्त्वमिह कथ्यते ॥'

इत्याद्युपक्रम्य

'यदि सर्वगतो देवो वदोत्क्रम्य क्व यास्यति ।
अथासर्वगतस्तर्हि घटतुल्यस्तदा भवेत् ॥
तस्मादुत्क्रान्तियोगोऽयं भ्रान्तिरेषा तमोमयी ।'

इति ॥

भोगोपायता चास्याः कथं स्यादित्याशङ्क्याह

यथा धरादौ वाय्वन्ते
भृग्वम्ब्वग्न्युपवासकैः ॥३६॥
आत्मनो योजनं व्योम्नि
तद्वदुत्क्रान्तिवर्तना ।

तेन यथा भृग्वादिभिः क्रमेण धरादौ तत्त्वचतुष्टये भोगस्तथाप्यनया आकाशतत्त्वे इति। कारणगुणप्रक्रमेण हि कार्येण भवितव्यमिति भावः ॥

अतश्च न परतत्त्वावासिकामैरेतदनुष्ठेयमित्याह

तस्मान्नोत्क्रमयेज्जीवं
परतत्त्वसमीहया ॥३६॥

ननु यद्युत्क्रान्तेर्मुक्त्युपायत्वं नास्ति, तत्कथं 'स्वशरीरं परित्यज्य शाश्वतं पदमृच्छति ।'(१७।२९) इत्यादि श्रीमालिनीविजयोत्तरे प्रोक्तमित्याशङ्क्याह

श्रीपूर्वशास्त्रे तूक्तं य-
दुत्क्रान्तेर्लक्षणं न तत् ।
मुक्त्युपायतया किंतु
भोगहान्यै तथैषणात् ॥३७॥

तथेत्युत्क्रान्त्यात्मना प्रकारेण ॥ ३७ ॥

एतद्धि पारमेश्वरशक्तिपातवशोन्मिषितपरसंविदैकात्म्यभाजां योगिनां बाह्यविषयोपभोगवैमुख्यात् देहत्याग एव उपायमात्रमिति । तदाह

जपध्यानादिसंसिद्धः
स्वातन्त्र्याच्छक्तिपाततः ।
भोगं प्रति विरक्तश्चे-
दित्थं देहं त्यजेदिति ॥३८॥

नचापूर्वतयैवात्रैतदुपदिष्टमित्याह

स्वच्छन्दमृत्योरपि यद्
भीष्मादेः श्रूयते किल।
भोगवैरस्यसंप्राप्तौ
जीवितान्तोपसर्पणम् ॥३९॥

ननु जीवितान्तस्य भोगवैमुख्यं नाम स्वारसिकं निमित्तं, नहि त्यक्तरसास्वादो जन्तुः कथञ्चिदपि जीवेत् तत्किं तदुपायोपदेशेन, न हि बुभुक्षितोऽश्नीयादित्यादौ शास्त्रमपेक्षणीयमित्याशङ्क्याह

योगमन्त्रामृतद्रव्य-
वरादेः सिद्धिभाक्तनुः।
हातुं नह्यन्यथा शक्या
विनोक्तक्रमयोगतः ॥४०॥

सिद्धिभाक् स्थैर्यं प्राप्तेत्यर्थः ॥ ४० ॥

न चैतत्स्वमनीषिकयैवोक्तमित्याह

उक्तं च मालिनीतन्त्रे
परमेशेन तादृशम्।

सर्वमप्यथवा भोगं
मन्यमानो विरूपकम् ॥४१॥
इत्यादि वदता सर्वै-
रलक्ष्यान्तःसतत्त्वकम् ।

परमेशेन इत्यादि वदता तादृशमुक्तमिति संबन्धः। विरूपकमिति परसंविदावेशचमत्कारतारतम्यात्, नतु त्यक्तरसास्वादत्वात्। सर्वैरिति उत्तानप्रायार्थवेदिभिः । इदमत्रान्तःसतत्त्वं—यदस्य स्वात्मनि शिवाहंभावाभिमानेनैव मुक्तिः, देहत्यागस्त्वनयेति। यदभिप्रायेणैवात्र

'.....शाश्वतं पदमृच्छति ।'(१७।२९)

इति । तथा

'.....दीक्षोक्तं फलमश्नुते ।'

इत्याद्युक्तम् ॥

तस्मात्सृष्ट्यादिपञ्चविधकृत्यकारित्वाभिमान एव स्वात्मनि परं मुक्तावुपाय इत्याह

एवं सृष्ट्यादिकर्तव्य-
स्वस्वातन्त्र्योपदेशनम्॥४२॥

यत्सैव मुख्यदीक्षा स्या-
च्छिष्यस्य शिवदायिनी ।

नचैतदप्रमाणकमित्याह

उक्तं श्रीनिशिचारे च
भैरवीयेण तेजसा ॥४३॥
व्याप्तं विश्वं प्रपश्यन्ति
विकल्पोज्झितचेतसः ।
विकल्पयुक्तचित्तस्तु
पिण्डपाताच्छिवं व्रजेत्॥४४
बाह्यदीक्षादियोगेन
चर्यासमयकल्पनैः ।
अविकल्पस्तथाद्यैव
जीवन्मुक्तो न संशयः॥४५॥

तेजसेति पूर्णज्ञानक्रियात्मनेति, अत एवोक्तं विकल्पोज्झितचेतस इति संविदद्वैतमात्रनिष्ठा इत्यर्थः । विकल्पयुक्तचित्त इति इदानीमेव संविदद्वैतासिद्धेः । अद्यैवेति सत्यपि देह इति यावत् । तदुक्तं तत्र

'तेजसास्य शिवस्यैव व्याप्तं सर्वं चराचरम् ।
पश्यन्ति मुनयः सिद्धा वीरसंज्ञाश्च देवताः ॥
विकल्पोज्झितचित्तास्तु पश्यन्ति भुवि मानवाः ।
विकल्पयुक्तचित्तस्तु पिण्डपाताच्छिवं व्रजेत् ॥
विकल्पक्षीणचित्तस्तु आत्मानं शिवमव्ययम् ।
पश्यते भावशुद्ध्या यो जीवन्मुक्तो न संशयः ॥'

इति । एवं निर्विकल्पवृत्तीनां जीवतामेव मुक्तिरितरेषां तु देहपातानन्तरमिति सिद्धम् ॥

ननु जीवत एव यन्न सिद्धं, तन्मृतस्य भविष्यति,—इत्यत्र किं प्रमाणमित्याशङ्क्याह

संसारजीर्णतरुमूलकलापकल्प-
संकल्पसान्तरतया परमार्थवह्नेः ।
स्युर्विस्फुलिङ्गकणिका अपि चेत्तदन्ते
देदीप्यते विमलबोधहुताशराशिः ४६

संसार एव 'सर्वो ममायं विभवः' इत्यादि-शुद्धविकल्पघुणग्रस्तत्वाज्जीर्णतरुः, तस्यावष्टम्भकतया मूलकलापप्राया ये भेदानुप्राणकत्वादशुद्धाः संकल्पास्तैर्व्यवहितत्वेन साक्षादनभिव्यक्तत्वात् पारमार्थिकस्य बोधहुताशराशेर्विस्फुलिङ्गकणिकाप्राया अपि यदि समाधा-

नादिदशासु त्वदावेशलेशा भवेयुः, तदवश्यमर्थादेहस्यान्ते पुनःपुनरभ्यासफूत्कारोत्तेजितः परमार्थवह्निर्देदीप्यते देहप्रमातृतादिनिर्वापणपूर्वं परप्रमातृत्वमेवात्यर्थं दीप्ततामियादित्यर्थः ॥ ४६ ॥

एतदेव प्रथमार्धेनोपसंहरति

इत्थं दीक्षोपक्रमोऽयं
दर्शितः शास्त्रसंमतः ।

शास्त्रसंमत इति नतु स्वोपज्ञ एवेति शिवम् ॥

अहितिरोहितिविहति-
प्रोन्मोषितस्वात्मपूर्णविज्ञानः ।
अह्नायाह्निकमेत-
चतुर्दशं जयरथः समाचख्यौ ॥

इति श्रीतन्त्रालोकविवेके दीक्षोपक्रमप्रकाशनं
नाम चतुर्दशमाह्निकम् ॥ १४ ॥

अथ

तन्त्रालोकस्य

त्रयोदश-चतुर्दशाह्निकयोर्मूलश्लोकानामकाद्यनुक्रमणिका ।

	पृ. सं.	श्लो. सं.
अक्षत्वं प्रविवेकेन ...	१२०	१८९
अज्ञानमिति यत्प्रोक्तं ...	१२	१६
अज्ञानरूपता पुंसि ...	१३५	२१३
अज्ञानसहकारीदं ...	१०	१४
अज्ञानस्य कथं हानिः ...	१४	२१
अज्ञानाख्याद्वियोक्तेति ...	१७०	२७७
अणिमादिगतं चापि ...	१२३	१९३
अणूनां संभवत्येव ...	२०	३१
अत एव हि सर्वज्ञै- ...	२१२	३५९
अत एवेह शास्त्रेषु ...	२११	३५७
अतश्चाप्युत्तमं शैवं ...	२१२	३५८
अत्र पुंसोऽथ मूलस्य ...	२५	३७
अत्रैव लक्षितः शास्त्रे ...	१३८	२१९
अत्रोच्यते मलस्तावत् ...	३७	५३
अथ प्रत्यात्मनियतो ...	३७	५५
अथ प्रध्वंस एवेद- ...	१६	२३
अथ यस्मिन् क्षणे कर्म ...	१७	२६
अथाज्ञानं नह्यभावो ...	१७	२४
अथाधिकृतिभाजनं ...	१	१
अथानादित्वमात्रेण ...	५६	८२
अथापि कालमाहात्म्य ...	५१	७४
अथासर्वगतस्तर्हि ...	२३२	३४
अथास्य पाको नामैष ...	४१	५९
अद्य मां प्रति किमागतं ...	१७७	२९१
अधराधरमाचार्यं ...	२०९	३५३
अधरेषु च तत्त्वेषु ...	१९७	३३०
अधरोत्तरगैर्वाक्यैः ...	११०	१७४
अनपेक्ष्य शिवे भक्तिः ...	७९	११८
अनयैव दिशा नेयं ...	१७३	२८४
अनादि कर्मसंस्कार- ...	५४	८०
अन्यकर्मफलं प्राच्यं ...	९	१२
अन्यतः शिक्षितानन्त ...	९१	१३९
अन्यथा किं हि तत्स्याद्य- ...	१७१	२८०
अन्ये त्वाहुरकामस्य ...	९५	१४७
अन्योन्यानुप्रवेशश्चा- ...	६७	१०१
अन्योऽपिच तिरोभावः	२२५	१८
अपरः शक्तिपातोऽसौ ...	१५७	२५६
अवश्यमिति कस्यापि ...	१८	२९
असदेतदिति प्राहुः ...	९६	१४९
अस्यार्थ आत्मनः क्वचित्	१२८	२०४
अहेतुकोऽस्य नाशश्चेत् ...	३९	५७
आ तपनान्मोटकान्तं ...	२०६	३४४
आत्मना तेन हि शिवः ...	१७४	२८७
आत्मनो योजनं व्योम्नि	२३३	३६
आदिमत्त्वे हि कस्यापि ...	५२	७६
आदिविद्वान्महादेवः ...	९२	१४१
आदौ मध्ये च चित्रत्वात्	५९	८६
आपत्प्राप्तिस्तन्निरीक्षा ...	६६	९९
आमोदार्थी यथा भृङ्गः.	२०१	३३५
आवारणं चादृश्यत्वं ...	४४	६४

	पृ. सं.	श्लो. सं.
आस्ते तद्वदनुत्तीर्णो ...	२१९	८
आहास्मत्परमेष्ठी च ...	७२	१०८
इच्छन् धियासुर्भवति ...	१५३	२४८
इति चेत्कर्मसंस्कारा ..	६	८
इति ज्ञात्वा ग्रहीतव्या ...	२२९	२८
इति देव्या कृते प्रश्ने ...	१०७	१६८
इति प्रश्ने कृते देव्या ...	१०४	१६५
इति ब्रूते धियासुत्वं ...	१५४	२४९
इत्थं च कल्पिते माया ...	५७	८४
इत्थं दीक्षोपक्रमोऽयं ...	२३९	४७
इत्थं प्रातिभविज्ञानं ...	९५	१४६
इत्थं भ्रान्तिविषावेश– ...	६९	१०२
इत्थं विष्ण्वादयः शैव- ..	२१३	३६०
इत्थं सृष्टिस्थितिध्वंस ...	२२७	२४
इत्थमुच्छिन्न एवायं ...	५९	८७
इत्यपेक्ष्यं यदीशस्य ...	६६	१००
इत्यादिभिस्त्रीशिकोक्तै- ...	९८	१५४
इत्यादिभेदभिन्नो हि ...	१४०	२२५
इत्यादि वदता सर्वै– ...	२३६	४२
इत्याद्युपक्रमं यावत् ...	९४	१४४
इत्युक्ते परमेशान्या ...	१०९	१७३
इत्युक्त्वा तीव्रतीव्राख्य–	१२८	२०१
इत्येष पठितो ग्रन्थः ...	१२५	१९६
इत्येष युक्त्यागमतः ...	२१४	३६२
इयतो भोगपर्यायात् ...	५३	७७
ईशशक्तिसमावेशा– ...	१६६	२७१
ईश्वरेच्छा निमित्तं चे–	१६१	२६२
उक्तं च पूर्वमेवैतत् ...	१४६	२३७
उक्तं च मालिनीतन्त्रे ...	२३५	४१
उक्तं च शास्त्रयोः श्रीमद्	१४३	२३०
उक्तं च सिद्धसन्तान–...	२३०	३१

	पृ. सं.	श्लो. सं.
उक्तं नन्दिशिखातंत्रे ...	१५५	२५१
उक्तं श्रीभैरवकुले ...	१८२	३०२
उक्तं सेयं क्रियाशक्तिः...	१६४	२६६
उक्तः स्वयंभूः शास्त्रार्थ	८८	१३५
उक्तैकवचनाद्विश्व ...	१४५	२३४
उत्तरस्मिन्पुनः पक्षे ...	१८	२८
उत्तरोत्तरमुत्कर्ष ...	२०२	३३७
उत्तरोत्तरविज्ञाने ...	१९४	३२५
उत्पत्त्यभावतस्तेन ...	३१	४७
उपवासादिकं चान्य ...	११	१५
उपायोगक्रमतो ...	१००	१५७
ऊचेऽज्ञाना हि दीक्षायां...	१२४	१९४
एकः स देवो विश्वात्मा ...	२१७	४
एकत्रिकोऽर्य निर्णीतः ...	१४८	२४०
एतेनान्येऽपि येऽपेक्ष्या ...	६५	९७
एनमेवार्थमन्तःस्थं ...	१२७	१९९
एवं प्राग्विषयो ग्रन्थ ...	१३४	२१२
एवकारेण कर्मादि ...	१७४	२८६
ऐन्द्रजालिकवृत्तान्ते ...	२२८	२६
कथङ्कारं पतिपदं ...	१८९	३१६
कम्पमानं हि विज्ञानं ...	९०	१३७
कर्मणा तेन बाध्यन्ते ...	१४४	२३३
कर्म तल्लोकरूढं हि ...	१६१	१६३
कर्मसाम्यमपेक्ष्याथ ...	४६	६७
कर्मसाम्येन यत्कृत्यं ...	६४	९६
कर्मान्तरं फलं सूते ...	६२	९३
कस्माज्ज्ञानं न भाव्यत्र...	१४	२०
कस्मान्न भावि तज्ज्ञानं...	१५	२२
कस्यापि वाथ ज्ञानस्य ...	१२	१७
कालकामान्धकादीनां ...	२२४	१७
कालान्तरे तयोस्तद्वत् ...	६१	९०

	पृ. सं.	श्लो. सं.
किं चानादिरयं भोगः	... ५२	७५
कुर्वन्नधिक्रियां शास्त्र	... १९५	३२६
कुर्वन्ति मध्यतीव्राख्य	... १५३	२४७
कुलकालीविधौ चोक्तं	... १८४	३०६
कुलकौले त्रिके नासौ	... १९२	३२१
कुहकादिषु ये भ्रान्ताः	... २३१	३२
कृत्यै मलं तथा कर्म	... ७६	११४
केवलस्य ध्रुवं मुक्तिः	... १०७	१७०
कैश्चिदेव विशेषैश्चेत्	... २७	४०
कोऽपि प्रधानपुरुष	... १६७	२७२
क्रमाक्रमादिभिर्भेदैः	... १८०	३००
क्रमान्मुख्यातिमात्रेण	... १५१	२४६
क्रियया वान्तराकार	... १४२	२२९
क्रीडासु सुविरक्तात्मा	... ११५	१८१
क्वचिदेव सुवीतैतत्	... ३१	४६
क्षणात्पुंसः कलायाश्च	... १६७	२७३
गुरुशास्त्रप्रमाणादे-	... ९९	१५६
गुर्वायत्ता तु सा दीक्षा	... १०७	१६९
चिदणूनामावरणं	... ३०	४४
छद्मापश्रवणाद्यैस्तु	... १८५	३०९
जगतः कर्म यत्कृत्स्नं	... ५३	७८
जपध्यानादिसंसिद्धः	... २३४	३८
जाते विमोक्ष इत्यास्तां	... ६१	९२
जात्यायुष्प्रदकर्माश-	... ४९	७२
जुगुप्सते तत्तास्मिंश्च	... २१०	३५५
ज्ञत्वकर्तृत्वमात्रं च	... ४३	६३
ज्ञातज्ञेया धातृपदस्था	... २२०	११
ज्ञाता सा च क्रियाशक्तिः	१६४	२६७
ज्ञातृत्वमेव शिवता	... २२८	२७
ज्ञानयोग्यास्तथा केचित्	१०४	१६३
ज्ञानरूपां यथा वेत्ति	... १४१,	२२६

	पृ. सं.	श्लो. सं.
ज्ञानाकलः प्राक्तनस्तु	... १६८	२७४
ज्ञानाचारादिभेदेन	... १८३	३०३
ज्ञानात्कमक्षयश्चेत्तत्	... ७	१०
ज्ञानी न पूर्ण एवैको	... २०४	३४१
ज्ञानेनावरणयेन	... ४५	६५
ज्ञानोपायस्तु दीक्षादि	... ९९	१५५
तं च कालांशकं देवः	... ४७	६९
तं च त्यजेत्पापवृत्तिं	... १८८	३१३
तज्जन्मशेषं विविध-	... १४७	२३८
ततः प्रबुद्धचेष्टासौ	... २२२	१३
ततः प्रातिभसंवित्त्यै	... १०२	१६०
ततोऽत्र स्यात्फले भेदो	७९	११९
तत्त्यजेद्वुद्धिमास्थाय	... ११२	१७९
तत्त्वेभ्य उद्धृतिं क्वापि	... १९६	३२८
तत्पातावेशतो मुक्तः	... ११८	१८७
तत्र केचिदिह प्राहुः	... २	२
तत्र त्वेषोऽस्ति नियम-	१४६	२३६
तत्राणोः सत एवास्ति	... ७३	११०
तत्रानधिकृतो यस्तु	... २०९	३५१
तत्रापि कालशीघ्रत्व-	... २२६	२३
तत्रापि चेच्छावैचित्र्या-	२२४	१६
तत्रापि तारतम्यादि	... १३३	२१०
तत्रापि तारतम्योत्थ	... ८९	१३६
तत्रास्य नाणुगे तावद्	... ७७	११५
तत्रेदं दृश्यमानं सत्	... २	३
तथाभासनमुज्झित्वा	... १२९	२०६
तथाभिसंधिर्नान्यत्र	... ९	१३
तथाविधामेव मतिं	... २१३	३६१
तथाहि कर्म तावन्नो	... ५७	८३
तथाहि त्रीशिकाशास्त्र	... ९६	१५०
तदभावे तदर्थं त-	... ९७	१५१

	पृ. सं.	श्लो. सं.
तदभावे तु विज्ञान	... २०३	३३९
तदैव किल मुक्तोऽसौ	... १४३	२३१
तद्वच्छक्तिसमूहेन	... ८२	१२३
तपोजपादेर्गुरुतः	... ९३	१४३
तमाराध्य ततस्तुष्टाद्	... १२८	२०३
तया शान्त्या तु संबद्धः	१३२	२०९
तस्मात्प्राणहरीं दीक्षां	... १४८	२३९
तस्मात्सांख्यदृशापीद-	२८	४१
तस्मात्सा परमेशेच्छा	... २२३	१५
तस्मात्स्वभ्यस्तविज्ञान	... २००	३३३
तस्मादीक्षा भवत्येषु	... १२४	१९५
तस्मान्न गुरुभूयस्त्वे	... २०८	३४९
तस्य रोद्धी यदा शक्ति	... ३५	५०
ता एव शक्तिपातस्य	... ८६	१३०
तादृक्शक्तिनिपातेद्धो	... १९४	३२४
तार्किकश्रौतबौद्धाहं	... २०६	३४६
तारतम्यादिभिर्भेदैः	... १७९	२९६
तारतम्यादियोगेन	... १४०	२२४
तावन्तं भोगमाधत्ते	... १६६	२७०
तिरोभावप्रकारोऽयं	... १८७	३११
तिरोभावस्वरूपं तु	... २१५	१
तिरोभूतः परेतासु	... २२६	२२
तेन प्राप्तविवेकोत्थ	... १५५	२५०
तेनासंख्यान्गुरून्कुर्या	... २०४	३४२
तेनेशः क्षोभयेदेनां	... ४	६
तेनैकं वस्तु सन्नित्यं	... ३४	४९
तेनोक्तं मालिनीतन्त्रे	... १९९	३३२
ते मन्त्रादित्वमापन्नाः	... १६०	२६०
ते यथेष्टं फलं प्राप्य	... १३९	२२२
तेषां भोगोत्कता कस्मात्	१६२	२६४
ते हि भेदैकवृत्तित्वा-	... १७२	२८१

	पृ. सं.	श्लो. सं.
दक्षे मते कुले कौले	... १८१	३०१
ददात्यस्य च सुश्रोणि	... १०५	१६६
दर्शनाय पुमर्थैक	... २१	३३
दीक्षा भवत्यसंदिग्धा	... ९७	१५२
दुर्लभत्वमरागित्वं	... १७७	२९२
दूराच्छ्रुत्यादिवेधादि	... ११४	१८०
देवः स्वतन्त्रश्चिद्रूपः	... ६९	१०३
देव एव तथासौ चेत्	... ७२	१०७
देवीभिर्दीक्षितस्तेन	... ९३	१४२
देहसंबन्धिताप्यस्य	... १४१	२२७
देहान्ते तत्त्वगं भोगं	... १५०	२४४
द्विगुणा संस्क्रियास्त्येषां	... १७२	२८२
द्विगुणोऽस्य स संस्कारो	१७३	२८३
धर्माधर्मात्मकैर्भावै-	... ८२	१२२
ध्रुवं संशयमापन्न-	... १९०	३१८
न किंचिद्युज्यते तेन	... ७६	११३
न च नित्यस्य भावस्य	... ४०	५८
न चास्य कर्ममहिमा	... २२३	१४
न चास्य समयित्वादि	... ९२	१४०
नतु पर्येनुयुक्तत्वै सा	... १३०	२०७
ननु माभून्मलस्तर्हि	... ५८	८५
न बन्धमोक्षयोर्योगो	... २९	४३
न मनोबुद्धिहीनस्तु	... १२२	१९१
नराः पापैः प्रमुच्यन्ते	... १३८	२२१
नवधा शक्तिपातोऽयं	... १५७	२५४
न वाच्यं तु कथं नाम	... ७१	१०६
न वा वस्त्वर्थकारित्वा-	... ३२	४८
न विशङ्केत तच्च श्री-	... १४४	२३२
न शिवेच्छेति तत्कार्यं	... ६३	९५
नहि कर्मास्ति तादृक्षं	... ८	११
नाणुरस्ति भवे ह्यस्मिन्	१३	१८

	पृ. सं.	श्लो. सं
नानागुर्वागमस्रोतः	... २०५	३४३
नान्यशास्त्राभियुक्तेषु	... १९१	३२०
ना बध्यो बन्धने शक्तिः	१०८	१७१
नास्ति व्यापार इत्येवं	... १५८	२५७
नियतेर्महिमा नैव	... ९६	१४८
निरंशे शिवतत्त्वे तु	... २३२	३५
निर्मलश्चापि तु प्राप्ता-	... १७६	२८९
नैतत्कर्मिकसंशुद्ध	... ४८	७०
नोज्झतीति दृढं वामा-	... १८९	३१५
नोज्झत्येष वपुस्त्यक्त	... २१७	५
पञ्चकृत्यस्वतन्त्रत्व	... २२७	२५
परभावनदार्ढ्यात्तु	... ११७	१८४
परशक्तिनिपातेन	... १०५	१६७
परोपजीविताबुद्ध्या	... १०३	१६१
पुंसश्च निर्विशेषत्वे	... ६	७
पुनरुद्भूतशक्तौ च	... ४१	६०
पुनर्विवेकादुक्तं तद्	... १०८	१७२
पुमर्थस्य कृतत्वेन	... २४	३६
पुराणेऽपि च तस्यैव	... १७४	२८५
प्रकाशः परमः शक्ति-	... १५७	२५५
प्रतिभाचन्द्रिकाशान्त	... ८७	१३३
प्रतिभानात्सुहृत्संगात्	... १३९	२२३
प्रति भिन्नेन भावेन	... ७५	११२
प्रत्यवायं यतोऽभ्येति	... १९०	३१९
प्रत्यवायो य आम्नातः	... २०८	३५०
प्रवृत्तस्य निमित्तानां	... ७२	१०९
प्रवृत्तिरेव प्रथम-	... १६०	२६१
प्रश्नोत्तरमुखेनेति	... १०४	१६४
प्राक्पक्षे प्रलये वृत्ते	... १८	२७
प्राग्भागेऽपेक्षते कर्म	... ८०	१२०
प्राग्वैष्णवाः सौगताश्च	२०८	३४८

	पृ. सं.	श्लो. सं.
प्रातिभे तु समायाते	... ११२	१७८
प्राप्तिमात्राच्च ते सिद्ध	... १५५	२५३
प्रोक्ता सा सारशास्त्रेषु	... २३१	३३
फलतः प्रतिबन्धस्य	... ६३	९४
फलदानाक्षमे योगि-	... २०३	३४०
फलाकाङ्क्षायुतः शिष्य	१८६	३१०
बहुल्पभोगयोगश्च	... १५१	२४५
बाह्यदीक्षादियोगेन	... २३७	४५
बिभासयिषुरास्तेऽयं	... २१८	७
बीजं कालोप्तसंसिक्तं	... १११	१७६
बुद्धिरेवास्मि विकृति	... २३	३५
बुद्धिवृत्त्यविशिष्टत्वं	... २१	३४
बुभुक्षुर्यत्र युक्तस्तद्	... १५०	२४३
भुङ्क्ते दुःखविमोहादि	... २१८	६
भूतेन्द्रियादियोगेन	... ११८	१८६
भूयोऽनुग्रहतः प्राय-	... २२६	२१
भेदयोगवशान्माया-	... १६५	२६९
भेदे प्रमाणाभावाच्च	... ३०	४५
भोगपर्यायमाहात्म्यात्	४६	६८
भोगव्यवधिना कोऽपि	... १८०	२९८
भोगो विवेकपर्यन्त	... २६	३८
भ्रमयत्येव तान्माया	... १९०	३१७
मनोबुद्धी न भिन्ने तु	... १२१	१९०
मन्त्रसिद्धिः सर्वतत्त्व	... १३६	२१५
मन्त्रात्मभूतद्रव्यांश	... १२६	१९८
मन्दतीव्राच्छक्तिबलादू	... १३७	२१८
ममेच्छामनुवर्तन्ता-	... २२९	२९
मलस्य पाकः कोऽयं स्या.	३७	५४
मलान्मन्त्रतदीशादि-	... १६९	२७६
महिमा चेदयं तौ किं	... ५५	८१
मायाधरे तु सञ्ज्येता-	... १६८	२७५

	पृ. सं.	श्लो. सं.
मायीयशास्त्रनिरतो ...	२१०	३५४
मुक्ताणोरपि सोऽस्त्येव...	१३	१९
मोक्षज्ञानपरः कुर्या- ...	२००	३३४
मोक्षप्रदस्तदैवान्य- ...	८६	१३१
यच्चादर्शनमाख्यातं ...	२१	३२
यत्सैव मुख्यदीक्षा स्या—	२३७	४३
यथा यथा परापेक्षा ...	९१	१३८
यदा तु वैचित्र्यवशा-	१८७	३१२
यदा शैवाभिमानेन ...	१५५	२५२
यस्तु प्रातिभबाह्यात्म ...	१०१	१५८
यस्तु भोगं च मोक्षं च	२०२	३३८
यस्तूत्पन्नसमस्ताध्व- ...	१९८	३३१
यस्तूर्ध्वोर्ध्वपथप्रेप्सु ...	२११	३५६
यस्माद्विद्धं सूतकमुख्येन	२२१	१२
युगपत्कर्मणां भोगा ...	७	९
युज्येते तच्च कथित- ...	२८	४२
ये यौष्माके शासन- ...	२२०	१०
योगमन्त्रामृतद्रव्य ...	२३५	४०
योगी तु प्राप्ततत्त्व ...	१९७	३२९
योग्यता शिवतादात्म्य...	१२९	२०५
रुद्राणि प्राप्तकालत्वात्...	६१	९१
रुद्रशक्तिसमाविष्टः ...	१२८	२०२
रुद्रशक्तिसमाविष्ट ...	१३५	२१४
रूपे स्थितो गुरुः सोऽपि	१८०	२९९
रोद्रीति चेत्कस्य नृणां ...	४२	६१
रोद्र्याश्च शक्तेः कस्तस्य	४६	६६
रोधे तयोश्च जात्यायु-...	४९	७१
वक्तव्यं तर्हि किं कर्म ...	१७	२५
वाममार्गाभिषिक्तस्तु ...	१८३	३०४
विकल्पात्तु तनौ स्थित्वा...	१४९	२४२
विकासं तत्त्वमायाति ...	११०	१७५

	पृ. सं.	श्लो. सं.
विचित्रत्वमतः प्राहुः ...	३६	५२
विफलं स्यात्तु तत्पूर्वं ...	२०	३०
विरोधे स्वफले चैते ...	६०	८८
विवेकः सर्वभावानां ...	१२३	१९२
विवेकजं च तद्बुद्ध्या ...	११९	१८८
विवेकोऽतीन्द्रियस्त्वेष ...	११२	१७७
वैराग्यं भोगवैरस्यं ...	६६	९८
वैष्णवादेस्तथा शैवं ...	१८८	३१४
वैष्णवादौ हि या भक्तिः	१७५	२८८
व्यवधानचिरक्षिप्र ...	१७८	२९३
व्याचक्षाणेन मातङ्ग ...	१७८	२९४
व्याप्तं विश्वं प्रपश्यन्ति ...	२३७	४४
व्रजेन्मायानपेक्षत्व ...	७७	११६
शक्तिः पतन्ती सापेक्षा	१७९	२९५
शक्तिपातवशादेव ...	१५९	२५९
शक्तिहीनं गुरुं प्राप्य ...	२०१	३३६
शतशोऽपि ह्लादताप ...	५०	७३
शापानुग्रहकार्येषु ...	११७	१८५
शास्त्रात्संक्रमणात्साम्य ...	१४२	२२८
शिवत्वं क्रमशो गच्छेत ...	१७९	२९७
शिवस्य तावदस्त्येत ...	२२९	३०
शिवशक्तिनिपातस्य ...	६०	८९
शैवैवैमलसिद्धान्ता ...	१८४	३०५
शैवी संबध्यते शक्तिः ...	१२७	२००
श्रीपूर्वशास्त्रे तूक्तं य- ...	२३४	३७
श्रीमता कल्लटेनेत्थं ...	२०६	३४५
श्रीमन्त्रिशाकुलेऽप्युक्तं ...	८४	१२६
श्रीमन्त्रिशाटने चात्म ...	१२५	१३७
श्रीमानुत्पलदेवश्चा- ...	१७६	२९०
श्रीमान्विद्यागुरुश्चाह ...	८५	१२८
श्रीसर्ववीरश्रीब्रह्म ...	९५	१४५

	पृ. सं.	श्लो. सं.
श्रौतं चिन्तामयं द्व्यात्म	१९५	३२७
संबोधोत्कर्षबाहुल्या- ...	२०७	३४७
संसारजीर्णतरुमूल ...	२३८	४६
स इत्यन्तो ग्रन्थ एष ...	१३७	२१७
स गुरुर्मत्समः प्रोक्तो ...	१३८	२२०
स च स्वाच्छन्द्यमात्रेण...	७८	११७
सत्यं साच्छादनात्मा तु...	१३१	२०८
सन्निधानातिरिक्तं च ...	४३	६२
सफलीकुरुते यत्त ...	१९३	३२३
समयोल्लङ्घनोद्भवि ...	२२५	१९
समय्यादिक्रमाल्लङ्घा ...	१८५	३०८
समस्तव्यवहारेषु ...	१३३	२११
समाविशेदयं सूर्य- ...	३५	५१
सर्वसद्दस्ततोऽधःस्थ ...	१९२	३२२
सर्वे तुल्याः कथं चित्रां...	५३	७९
स शिष्टः कर्मकर्तृत्वा ...	८८	१३४
स सिद्धिभाग्भवेन्नित्यं ...	९८	१५३
स स्वयं कल्पिताकार ...	७०	१०४
सा जडा कार्यतादृप्यात्...	४	५
सा भोगमोक्षस्वातन्त्र्य-	१६५	२६८
साभ्येति कर्ममलयो- ...	७४	१११
सामान्येन विशेषैर्वा ...	२६	३९
सिद्धिजालं हि कथितं ...	११६	१८३
सृष्टिसंस्थितिसंहारान् ...	२१६	३
सोऽव्यक्तं तच्च सत्त्वादि	३	४
स्थित्वा मन्त्रादि संगृह्य ...	८१	१२१
स्पृशन्प्रकाशते येन ...	२१६	२
स्फटिकोपलगो रेणुः ...	८४	१२७
स्फुटमेतच्च शास्त्रेषु ...	१०३	१६२
स्वच्छन्दमृत्योरपि यद्...	२३५	३९
स्वच्छन्दशास्त्रे तेनोक्तं ...	१७०	२७८
स्वच्छन्दशास्त्रे संक्षेपा-	१८४	३०७
स्वच्छायादर्शवत्पश्ये- ...	११५	१८२
स्वतारतम्ययोगात्स्यात्	१३६	२१६
स्वमण्डलजिगीषुः सन् ...	२०९	३५२
स्वमुक्तिमात्रे कस्यापि ...	१०१	१५९
स्वयं भोक्ता स्वयं ज्ञाता	८२	१२४
स्वयमेकाक्षरा चैव ...	८२	१२५
स्वयमेव यतो वेत्ति ...	८६	१३२
स्वातन्त्र्यमहिमैवार्यं ...	७०	१०५
स्वातन्त्र्याच्च महेशस्य ...	२२५	२०
स्वातन्त्र्यात्तु तिरोभाव ...	१६२	२६५
स्वात्मनो वेत्ति शिवतां...	१४९	२४१
स्वाधिकारक्षये तैस्तै- ...	१५९	२५८
हुतेर्वा मन्त्रसामर्थ्यात् ...	१४६	२३५
ह्यास्ते मूढ एवं हि ...	२२०	९
हेतुः कर्मश्वरेच्छा वा ...	३८	५६